ISSN– 2320–5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृतदर्शनविभागस्य peer-reviewed शोधपत्रिका)

## द्वादशः अङ्कः

उपदेष्टा

**स्वामी आत्मप्रियानन्दः**

सम्पादकः

**डॉ. राकेशदाशः**

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः** - डॉ. राकेशदाशः
**सम्पादकमण्डली** - डॉ. गोपीकृष्णन् रघुः, डॉ. नीरजकुमारभार्गवः, (डॉ.) स्वामी जपसिद्धानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Gopikrishnan Reghu, Dr. Neeraj Kumar Bhargave, (Dr.) Swami Japasiddhananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः** - कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : `prajnaloka.rkmvu@gmail.com`
website : `https://sanskrit.rkmvu.ac.in/prajnaloka/`

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०२४
Year of Publishing– 2024

मूल्यम्– ₹ १५०/–
Price– ₹ 150/–

Powered by LaTeX 2ε

Printer : Rama Art Press, 6/30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
| --- | --- | --- |
| १. | Foreword<br>Swami Atmapriyananda | i |
| २. | निवेदनम्<br>सम्पादकस्य | iii |
| ३. | सन्दर्भशैली | v |
| ४. | Polarities in Adhyāsa or Superimposition<br>Swami Bhajanananda | १ |
| ५. | सामवेदीयब्राह्मणानां सायणमाधवीयवेदार्थप्रकाशे अन्तर्गतत्वम्<br>ब्रह्मचारी लोकेशचैतन्यः, डॉ. राकेशदाशः | ७ |
| ६. | प्रपञ्चमिथ्यात्वानुमाने पक्षतावच्छेदकता<br>स्वामी नित्ययोगानन्दः | २३ |
| ७. | पातञ्जलव्यासभाष्ययोगकारिकयोः तुलना<br>भजहरिदासः | २९ |
| ८. | विशिष्टाः खलु समासान्ताः<br>डॉ. गोपीकृष्णन् रघुः | ३८ |
| ९. | हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु इति प्रथमपक्षविमर्शः<br>शंखशुभ्रगच्छितः | ४५ |
| १०. | रघुवंशमहाकाव्ये प्रथमसर्गे मत्वर्थभिन्नतद्धितविमर्शः<br>शान्तनुनायेकः | ५५ |
| ११. | पेशलदेवकृतसमासदर्पणग्रन्थस्य परिशीलनम्<br>तुहिनमण्डलः | ६८ |

१२. व्याकरणकौमुदी : वङ्गेषु व्याकरणचर्चायाः नवीना धारा ७७
डॉ. सुस्मिता गोस्वामी

१३. गीताशास्त्रे तत्त्वप्रतिपादनरीतिः ९७
अनन्तमुखार्जी

१४. समाजसंस्कारक-कर्मयोगः १११
सुवर्णापालः

१५. कुवलयानन्ददिशा उपमालङ्कारनिरूपणम् १२७
अमित-कुमार-गराइः

१६. सरस्वती नदीरूपा विद्यारूपा वा १३३
गौराङ्ग-चौधुरी

१७. Advaita Philosophy of Śaṅkarācārya in light of Buddhism १४१
Brahmachari Bhudharachaitanya

१८. Śrī Jagannātha Cult in Tradition १५६
Dr. Nilachal Mishra

१९. Facets of Nature Mysticism १६४
Brahmachari Vedeshachaitanya

२०. The Spiritual Regeneration of Mankind wrought by Swami Vivekananda १७४
Dr. Paromita Roy

RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE
(Formerly known and Ramakrishna Mission Vivekananda University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु मामवतु वक्तारम् ।
ॐ शान्तिः शान्तिः शान्तिः ॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being) ! Reach me through and through ! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace !

The present issue (12th issue) of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies, which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published. This journal, as mentioned in my Foreword to an

earlier issue, is a reverential attempt to worship *Surabhārati* by our faculty of the Department of Sanskrit & Philosophy. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. We offer our humble prostrations to the Revered Swami Bhajananandaji Maharaj, Vice-President of Ramakrishna Math and Ramakrishna Mission, for his enlightening article for this journal.

May *Surabhārati Medhādevi Vāgdevi Sarasvatī* illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Belur Math Swami Atmapriyananda
18 March 2025 Pro-Chancellor & Secratary

# निवेदनम्

रामकृष्णमिशन्विवेकानन्दविश्वविद्यालयस्य संस्कृतदर्शनविभागेन निरवच्छिन्नतया प्राकाश्यम् आनीतायाः अस्याः पत्रिकायाः द्वादशः अङ्कः दिवालोकं पश्यति इति मोमुद्यामहे । द्वादशभिः वर्षैः एकं युगं भवति इति कालगणनायाः रीतिः । युगावतारस्य भगवतः श्रीरामकृष्णस्य परमकारुण्येन प्रज्ञालोकः अपि युगं व्यतीतवान् इति अस्याः पत्रिकायाः सम्पादनसन्दर्भे साहाय्यम् आचरितवतां समेषां कार्तज्ञ्यं व्याहरामः ।

अस्मिन्नङ्के अयं महान् विशेषः यत्, रामकृष्णसङ्घस्य सहसङ्घाध्यक्षाः परमपूज्याः श्रीमन्तः भजनानन्दस्वामिपादाः अध्यासस्य विषये ज्ञानानुभवगर्भं प्रबन्धम् आङ्ग्लभाषामयं लिखितवन्तः इति। तत्र सप्तविधाध्यासस्य विषये अमी शास्त्रसन्दृब्धान् विचारान् समुपास्थापयन् ।

श्रीमता सायणाचार्येण सामवेदस्य कियतः अंशस्य भाष्यं विरचयामासे इति प्रपञ्चितं श्रीमता ब्रह्मचारिणा लोकेशचैतन्यमहाराजेन । अद्वैतवेदान्ते प्रपञ्चस्य मिथ्यात्वानुमितौ पक्षतायाम् अवच्छेदकधर्माः के भवन्ति इति विषये स्वामिनित्ययोगानन्दमहाराजेन विरचितम् ।

पातञ्जलसूत्रे प्रतिपादितानि तत्त्वानि सरलरीत्या कारिकाभिः प्रत्यपीपदन् हरिहरानन्दारण्यमहाभागाः । तेषां योगकारिकायाः व्यासभाष्यस्य प्रकाशे विश्लेषणं कृतं श्रीमता भजहरिदासमहोदयेन ।

व्याकरणशास्त्रे पञ्च प्रबन्धाः पञ्चभिः गवेषकैः विलिखिताः । तेषु समासान्तप्रत्ययानां सुन्दरं विवेचनं प्रास्तौत् गोपीकृष्णन्-रघुमहाभागः । हलन्त्यम् इति सूत्रे हल् इति पदस्य आवृत्त्या एव अन्योन्याश्रयादीनां परिहारः शक्यः न वेति विचारितवान् शङ्खशुभ्रगच्छितः । रघुवंशमहाकाव्ये प्रथमसर्गे मत्वर्थभिन्नानां तद्धितानां प्रयोगे कीदृशं वैलक्षण्यम् अस्ति इति व्यचारयत् शान्तनुनायेकः । पेशलदेवेन समासदर्पणः इति विशिष्टः ग्रन्थः विरचितः । तस्य ग्रन्थस्य सविशेषपरिचयं कारितवान् तुहिनमण्डलः । वङ्गदेशे व्याकरणकौमुदीग्रन्थस्य विशेषस्थानम् अस्ति । तस्य विषये ऐतिहासिकं विवरणं प्रास्तौत् सुस्मितामहोदया ।

गीतायां श्रीमता पद्मनाभेन भगवता कया रीत्या तत्त्वप्रतिपादनं कृतम् इत्यस्य साम्प्रतिकगवेषणापद्धतिदृष्ट्या तौलनिकम् अध्ययनं कृतम् अनन्तमुखर्जीमहाशयेन । स्वामिविवेकानन्दप्रणीतस्य कर्मयोगस्य समाजसंस्कारे किं भागधेयं स्याद् इति विवेचनम् उपस्थापितं पालोपनाम्न्या

सुवर्णया । अप्पयदीक्षितवर्येण विरचिते कुवलयानन्दग्रन्थे उपमालङ्कारस्य विस्तृतं विवेचनम् अस्ति । तस्मिन् विषये प्रबन्धं रचितवान् अमित-कुमार-गड़ाइः । सरिद्रूपा सरस्वती वेदेषु स्तूयते । सरिद्रूपा सरस्वती कथं देवीत्वं प्राप्तवती इति विषये पौराणिकम् ऐतिहासिकं विवेचनं प्रास्तौत् श्रीमान् गौराङ्ग-चौधुरी-वर्येण ।

बौद्धमतेन अद्वैतवेदान्तमतस्य कीदृशं सादृश्यम् अस्ति इति विचारितं ब्रह्मचारिणा भूधरचैतन्यमहाराजेन । जगन्नाथाराधनस्य ऐतिह्यं विचारितवान् नीलाचलमिश्रवर्यः । ब्रह्मचारिणा वेदेशचैतन्येन नैसर्गिकरहस्यविद्याविषये मनोज्ञं विवेचनं प्रास्तौत् । स्वामिविवेकानन्दः मानवजातेः अभ्युन्नतये कान् मार्गान् उपादिशत् इति विवेचितवती पारमितारायमहाभागा ।

एवम् आहत्य विंशतिः प्रबन्धाः प्रकाशिताः सन्ति । इत्थं द्वादशवर्षेभ्यः अस्याः पत्रिकायाः अविच्छिन्नतया प्रकाशनाय विशेषेण कृतज्ञतां व्याहरामः विश्वविद्यालयस्य पूज्यानां प्रतिकुलाधिपतिमहाभागानां आत्मप्रियानन्दस्वामिचरणानां, कुलपतीनां सर्वोत्तमानन्दमहाराजपादानां, कुलसचिवानां कालेशानन्दमहाराजानां च । अस्मद्विभागीयानाम् अध्यापकानां तथा शोधच्छात्राणां श्रमं विना इयं पत्रिका प्राकाश्यं न गच्छेत् इति तेषाम् आधमर्ण्यं प्रकटयामः । विशेषधन्यवादभाजः सन्ति ब्रह्मचारी लोकेशचैतन्यः, श्रीमान् शान्तनुनायेकः, श्रीमान् तुहिनमण्डलः च ।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः ।

सम्पादकाः

# सन्दर्भशैली
# Reference Style

पत्रिकायां सन्दर्भदानाय, ग्रन्थसूच्यां च विलक्षणा शैली उपयुज्यते । सा शैली प्रचलिताभ्यः APA, MLA इत्यादिभ्यः शैलीभ्यः भिद्यते अंशतः । तस्याः शैल्याः निर्देशः अत्र क्रियते । **ग्रन्थावल्यां (Bibliography)** ग्रन्थस्य उल्लेखे इयं रीतिः अनुस्रियते–

- ❖ **ग्रन्थः** (book)– *ग्रन्थस्य नाम (टीकादीनां नामभिः संवलितम्)*; ग्रन्थकारः; टीकाकारः; सम्पादकः; प्रकाशकः/प्रकाशनसंस्था; प्रकाशनस्थानम्; प्रकाशनवर्षम्; शृङ्खला; संस्करणम्; खण्डः/भागः; ISBN।
- ❖ **प्रबन्धः** (article)– *प्रबन्धस्य शीर्षकम्*; प्रबन्धकारः; *पत्रिकायाः नाम*; (ISSN); सम्पादकः; प्रकाशकः/प्रकाशनसंस्था; प्रकाशनस्थानम्; प्रकाशनवर्षम्; खण्डः/भागः ।
- ❖ **शोधबन्धः** (dissertation)– *प्रबन्धस्य शीर्षकम्*; शोधकर्ता; मार्गदर्शकस्य नाम; (प्रकाशितम्/अप्रकाशितम्); संश्लिष्टसंस्था; स्थानम्; वर्षम् ।
- ❖ **अन्तर्जालसूची** (website)– url of the website; सन्दर्भदर्शनस्य दिनाङ्कः (dd/mm/yyyy, समयः h :m :s) ।

अत्र ग्रन्थप्रबन्धादीनां नामानि यथा ग्रन्थे वर्तन्ते तथैव लिख्यन्ते । एवं च ग्रन्थकर्तृ-सम्पादकादीनां नामानि अपि यथा मुद्रितानि तथा लिख्यन्ते, न तु पाश्चात्त्यरीत्यनुसारं नाम्नः विपर्यासः सम्पाद्यते ।

एवम् एव **सन्दर्भदाने (reference)** अपि विशिष्टा रीतिः अनुस्रियते । अस्माभिः पादटिप्पणी (footnotes) एव उपयुज्यते, न तु प्रबन्धान्त्यटिप्पणी (endnotes)। पादटिप्पणीनां द्विधा व्यवस्था। प्राचीनग्रन्थानाम्, अर्वाचीनग्रन्थानां च । क्रमेण अत्र सर्वम् उल्लिख्यते ।

- ❖ **वेदः, उपनिषद्, रामायणं, श्रीमद्भगवद्गीता, महाभारतं, पुराणम्** इत्यादिभ्यः उद्धरणं तथा सूत्राणाम् उद्धरणम् । वेदादिभ्यः मन्त्राणां श्लोकानां वा उद्धरणे मन्त्रस्य/श्लोकस्य पार्श्वे एव [] (Square Bracket) मध्ये ग्रन्थनाम, अध्यायः, श्लोकसङ्ख्या च लेख्यम् । उदाहरणम्–

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद् गहनं गभीरम् ॥
[ऋग्वेदसंहिता १०/१२९/१]

ॐ केनेषितं पतति प्रेषितं मनः
केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति
चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ [केनोपनिषत् १/१]

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम् ॥
[श्रीमद्भगवद्गीता ४/७]

इयं सीता मम सुता सहधर्मचरी तव ॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।
पतिव्रता महाभागा छायेवानुगता सदा ॥
[वाल्मिकीयरामायणम् ७३ /२६-२७]

- ❖ **सूत्राणाम् उद्धरणे** अपि इयम् एव व्यवस्था। यथा वृद्धिरादैच [अष्टाध्यायी १/१/१], अथ योगानुशासनम् [योगसूत्रम् १/१ ], शास्त्रयोनित्वात् [ब्रह्मसूत्रम् १/१/३] इत्यादि ।
- ❖ **काव्यादीनां, शास्त्रीयप्रकरणग्रन्थानां** च विषये अपि एवं व्यवस्था । यथा–

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
[रघुवंशम् १/१]

अनाघ्रातं पुष्पं किसलयम् अलूनं कररुहैर्
अनाविद्धं रत्नं मधु नवम् अनास्वादितरसम् ।
अखण्डं पुण्यानां फलम् इव च तद् रूपम् अनघं
न जाने भोक्तारं कम् इह समुपस्थास्यति भुवि ॥
[अभिज्ञानशाकुन्तलम् २/११]

शब्दस्पर्शौ रूपरसौ गन्धो भूतगुणा इमे ।
एकद्वित्रिचतुःपञ्चगुणा व्योमादिषु क्रमात् ॥
[पञ्चदशी २/२]

❖ यदि प्रकरणग्रन्थः गद्यात्मकः, तत्र केवलं ग्रन्थस्य नाम प्रकृतप्रसङ्गः उत प्रकरणम् **पादटिप्पण्याम्** उल्लेखनीयम् । यथा–
*अस्येयं समष्टिरखिलकारणत्वात् कारणशरीरम् आनन्दप्रचुरत्वात् कोशवद् आच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानम् इति च उच्यते ॥* इति पङ्क्तेः पादटिप्पणी भवति– [वेदान्तसारः ; ईश्वरनिरूपणम्]

❖ एवं नाट्यस्य वचनम् उद्धृतं चेत् इयम् एव व्यवस्था अनुसर्तव्या । तत्र **रूपकस्य नाम, अङ्कः, संवादकर्तॄणां नामानि, प्रकृतसंलापस्य वक्ता च उल्लेखनीयम्** । यथा–
*तपस्विन्निति गुणवान् खल्वयम् आलापः । अपरिचयात् तु न श्लिष्यते मे मनसि ।* इति पङ्क्तेः पादटिप्पणी भवति– **भासकृते स्वप्नवासवदत्ते प्रथमाङ्के काञ्चुकीययौगन्धरायणयोः संवादे यौगन्धरायणस्य वचनम्**

❖ **टीकानाम्** अथवा **अर्वाचीनग्रन्थानां** पङ्क्त्य उद्ध्रियन्ते चेत् तेषां व्यवस्था इत्थम्–

✍ यदि ग्रन्थः टीकारूपः स्यात् तर्हि मन्त्रस्य/सूत्रस्य/श्लोकस्य/मूलपङ्क्तेः वा स्थानं लेख्यम् । यथा– *न च देहाद्यात्मप्रत्ययभ्रान्तिसन्तानविच्छेदेषु सुषुप्तिसमाध्यादिषु कर्तृत्वभोक्तृत्वाद्यनर्थ उपलभ्यते ।* इति पङ्क्तेः पादटिप्पणी भवति– *श्रीमद्भगवद्गीतायां १८.६६ श्लोकस्य शाङ्करभाष्यम् ।*

✍ आधुनिकग्रन्थानां विषये ग्रन्थस्य नाम तथा पृष्ठसङ्ख्या लेखनीया । ग्रन्थस्य सम्पूर्ण विवरणं तु ग्रन्थसूच्यां देयम् । यथा–
… the definition of the Bhāṇa from Bharata down to Viśvanātha has remained severely stereotyped. इति पङ्क्तेः पादटिप्पणी भवति– *Aspects of Sanskrit Literature*, p2

✍ यदि प्रबन्धविशेषस्य अंशः उद्ध्रियते तर्हि इत्थम् उल्लेखः । (वक्राक्षरेण) *प्रबन्धस्य शीर्षकं*; पृष्ठसंख्या । प्रबन्धस्य वर्णनं ग्रन्थसूच्यां निर्दिष्टप्रकारेण प्रदेयम् ।

✍ यस्माद् ग्रन्थाद् उद्धरणं दीयते तस्य ग्रन्थस्य विवरणं ग्रन्थसूच्यां देयम् । ग्रन्थसूची जालपुटे प्रदत्तायां सूच्यात्मकसञ्चिकायाम्

(excel-सञ्चिकायां) अपि प्रदातुं शक्यते ।

✍ **ग्रन्थकारस्य/सम्पादकस्य/अनुवादकस्य/टीकाकारस्य नाम यथा मुद्रितं तथा एव लेख्यम् । पदव्याः पूर्वम् उल्लेखः न कर्तव्यः ।** ग्रन्थकारस्य नाम यदि Sushil Kumar De इति अस्ति तर्हि **सुशीलकुमारदे** इत्येव लेखनीयम् । न तु **दे, सुशील कुमार** इति लेख्यम् । एवम् एव **जीवानन्दविद्यासागरभट्टाचार्यः, तारानाथतर्कवाचस्पतिः, गिरिधरशर्मचतुर्वेदः** इत्येवं रूपेण यथा मुद्रितपुस्तके नाम वर्तते तथा एव नाम्नः सूचना कर्तव्या । पाश्चात्त्यरीतिम् अनुसृत्य नाम्नः विकृतिः न सम्पादनीया ।

✶✶✶

# Polarities in Adhyāsa or Superimposition*

**Swami Bhajanananda†**

## Introduction

The most well-known and distinguishing feature of Advaita Vedanta is its concept of Ignorance, known as *ajñāna* or *avidyā* or *māyā*. Ignorance is accepted as an important concept in all schools of Hindu philosophy, no doubt. But in the school of Advaita Vedanta, the concept of Ignorance assumes several unique features. One of these unique features is that *ajñāna* is not absence of knowledge but a kind of superimposition, known as *adhyāsa* or *adhyāropa*. It means, mistaking one thing for something else, mistaking, for instance, a piece of rope for a snake, or mistaking the mother-of-pearl for silver.

*Adhyāsa*, however, is not a single, unitary concept. There are several types of *adhyāsa*, some of which are mentioned by Sri Shankaracharya himself in his Introduction to his own commentary on Brahma Sutras, known as *Adhyāsa-bhāṣya*. An attempt is made in the narrative below to explicate the different types of *adhyāsa*. This narrative is based on the Bengali translation of *Brahma sutra-bhāṣya* of Sri Shankaracharya by Swami Viswarupanandaji Maharaj.[1]

## FIVE POLARITES IN ADHYĀSA

### 1. *Dharmi-adhyāsa* versus *Dharma-adhyāsa*

### (Substantive Superimposition versus Attributive Superimposition)

Suppose you are walking along a lonely road in a village in India at dusk. Suddenly you see a snake near your feet, and

* Invited article

† Vice Precident, Ramakrishna Math and Mission

1 Published by Udbodhan office, Baghbazar, Kolkata.

you jump up in fright. Then you bring a light. In the light you find that what you had mistaken to be a snake was nothing but a piece of rope. You had by mistake 'superimposed' an unreal snake on a real rope. This superimposition of an unreal thing on a real thing is known as *adhyāsa* or *adhyāropa*.

In the above case, one entity *(dharmin)* is superimposed on another entity *(dharmin)*. This kind of superimposition is called *dharmi adhyāsa*. This is the type of superimposition that takes place when we mistake the human body or mind to be the true Self. The true Self is the Ātman which is of the nature of pure consciousness. Owing to ignorance, we superimpose the body and mind, which are unconscious *(jada)*, on the Ātman. It is this kind of *dharmi adhyāsa*, that make us think, 'I am the body' or 'I am so and so'.

Along with this *dharmi-adhyāsa* (substantive superimposition) we also superimpose the attributes of the body and mind on the attributes of the Ātman. The Ātman is ever-pure, ever-awake, ever-free and is of the nature of absolute knowledge, existence and bliss. But, instead of identifying ourselves with these attributes of the Ātman, we think 'I am impure, ignorant, bound and full of sorrow'. This superimposition of the qualities of one thing upon the qualities of another thing is called *dharma-adhyāsa* or 'Attributive superimposition'.

Thus we see that the human personality is a false structure constructed by *dharmi-adhyāsa* and *dharma-adhyāsa*. Our real nature, real Self, is the Ātman. We have to discover it, realize it by undergoing a spiritual awakening.

**2. *Anyonya adhyāsa* versus *Ekonmukha adhyāsa***
**(Mutual Superimposition versus Unilateral Superimposition)**

If, owing to the superimposition described above, the Ātman is completely covered by the mind and the body, how

can we know about the Ātman at all ? If a light is completely covered by a dark screen the light cannot be seen. But the case of the Ātman is different. The light of the Ātman is so powerful that it penetrates through the covering of mind and body and comes out. In fact, it is

through Ātman's light that we see all objects in the world. Advaitins explain this phenomenon by stating : just as mind and body are superimposed upon the Ātman, so the Ātman is also simultaneously superimposed upon the mind and body. Thus the superimposition that creates the human personality is a mutual, two-way process and is known as *'anyonya adhyāsa'*.[2]

By contrast, in a purely objective superimposition, such as the superimposition of a snake on a piece of rope, there is no mutual superimposition. It is a one-way unilateral superimposition of snake upon rope. This kind of superimposition is known as *'ekonmukha adhyāsa'*.

**3. *Tādātmya adhyāsa* versus *Saṃsarga adhyāsa***
**(Identification Superimposition versus Contact Superimposition)**

In the illusion of a rope appearing as a snake, the identification between the two is so complete that you see only one at a time. When you see the snake, the rope is not seen and, when the rope is seen, the snake has disappeared. Similar is the illusion of mother-of-pearl appearing as silver. When the silver is seen, the mother-of-pearl is not seen, and when the mother-of-pearl is seen, the silver has disappeared. This kind of superimposition in which the illusory object is completely identified with the real object is known as *tādātmya adhyāsa*. This is the kind of superimposition that takes place when the

---

2 See *"tathāpi anyonyasmin anyonyātmakatām anyonya-dharmāṃśca..."* Shankaracharya in the early part of his Adhyāsa-Bhāṣya on Brahma-sutras.

body and mind are superimposed upon the Ātman. We see only the body, not the Ātman.

Take another kind of illusion : if you keep a red flower near a crystal or glass cube, the glass appears to be red. But in this case, you see both the glass and the flower although you are not able to distinguish between the two. This kind of superimposition is caused by contact or close proximity of two objects, and is known as *saṃsarga adhyāsa*. Another example is a red-hot iron ball. Here the

fire and iron ball get so much identified with each other that they appear to be one. This is the kind of superimposition that takes place when the Ātman is superimposed upon the mind and body. It is owing to the proximity of the Ātman that the mind and body appear to be conscious.

**4. *Kāraṇa adhyāsa* versus *Kārya adhyāsa***
**(Casual Superimposition versus Effect Superimposition)**

According to the Advaita School, ignorance is of two main types : *kāraṇa-ajñāna* or *mula-avidyā* (Causal ignorance) and *kārya-ajñāna* or *tūla-avidyā* (Effect ignorance).

*Kāraṇa-ajñāna* is one, infinite and universal, and is more popularly known as maya. It coexists with Brahman from beginningless time. It covers Brahman and prevents us from knowing the real nature of Brahman. The superimposition of *kāraṇa-ajñāna* on Brahman is known as *kāraṇa adhyāsa*. All objects in the universe (both gross and subtle - including the mind) are created by *kāraṇa adhyāsa*.

*Kārya-ajñāna* or *tūla-avidyā* (Effect ignorance) is the ignorance in individual beings. It is a product *(kārya)* of *kāraṇa-ajñāna*; that is why it is called Effect ignorance ; it may also be called secondary ignorance. The superimposition of *kārya-ajñāna* on the individual self or *pratyagātman* is known as *kārya-adhyāsa*. It is owing to this *kārya-adhyāsa*

that the jiva identifies itself with the mind and the body first and then with the external objects. It is *kārya-adhyāsa* that causes attachment and aversion with regard to people and things in the world.

According to Vidyaranya's *Pañcadaśī*, the whole world, including *jīvatva* or selfhood is created by God; this is *Īśvara-sṛṣṭi*. It does not by itself cause any bondage. Apart from it, the *jīva* creates its own imaginary world and lives in it; it *jīvasṛṣṭi*. This 'constructed world' of ours distorts our perceptions of the world around us. We project our likes and dislikes upon others, we cherish desires and hopes and experience joys, sorrows, fears, frustrations, sufferings-all because of *kārya-adhyāsa*.

*Jīvatva*, selfhood, is caused by *kāraṇa-adhyāsa*, whereas jīva's attachment to the objects of the world is caused by *kārya-adhyāsa*. Through *Śravaṇa* and *Manana* or through *Upāsanā*, service to the Guru and Karma Yoga, it is possible to remove *kārya-ajñāna* and be free from *kārya-adhyāsa*. A person who achieves this becomes free from attachments and aversions and becomes like *jīvanmukta*, unaffected by the evils and troubles of the world. But to know the true nature of Ātman or Brahman, he should destroy *kāraṇa-ajñāna* and eliminate *kāraṇa-adhyāsa*. This is possible only through a genuine spiritual awakening, direct transcendental experience or God realization which only a small number of people ever attain through intense *sadhana* and divine grace.

**5. *Jñāna-adhyāsa* versus *Artha-adhyāsa***
**(Cognitive Superimposition versus Objective Superimposition)**

In order to understand these two kinds of superimposition, we have to understand first the very nature of illusion *(bhrama)* itself and the views on illusion held by different schools of Vedanta.

Take, for instance, the illusion of mother-of-pearl appearing as silver. Most of the schools of Vedanta hold this illusion to be a purely mental error, a mental confusion, caused by the identification of the memory of silver seen elsewhere with the mother-of-pearl in the shell. In other words, it is a cognitive error ; this cognitive error is called *jñāna-adhyāsa* by *Advaitins*.

But according to Advaitins, mistaking mother-of-pearl for silver is not mere, *jñāna-adhyāsa*, not mere mental confusion. If it were so, a person would not extend his hand to take the silver. The fact that the person extends his hand to take the silver lying in front of him shows that he actually sees the silver, and this implies that, in some mysterious way, silver is actually or virtually created during the illusory process. It is this actual silver that is superimposed upon the mother-of-pearl. This kind of superimposition is called *artha-adhyāsa* or objective superimposition or material superimposition.

Though this may at first appear to be an absurd proposition, it provided a more plausible explanation of *dharmi-adhyāsa* discussed earlier. The mind and body that are superimposed on the Ātman are not entirely unreal. They are, for all practical purposes, real to us and we identify ourselves with them. They have a degree of reality known as *vyāvahārika sattā* or empirical reality. As long as we have not realized Ātman-Brahman, the mind and body are real to us.

Thus, according to Advaitins, illusions involve two processes-the mixing up of two objects *(artha-adhyāsa)* and the mixing up of two cognitions *(jñāna-adhyāsa)*. This dual nature of illusion is a unique feature of the Advaita view. No other school of Indian philosophy accepts the theory of *artha-adhyāsa*.

* * *

# सामवेदीयब्राह्मणानां सायणमाधवीयवेदार्थप्रकाशे अन्तर्गतत्वम्

**ब्रह्मचारी लोकेशचैतन्यः (शुभदीपः)***
**डॉ. राकेशदाशः †**

## Abstract

[सायणाचार्यैः वेदस्य बहूनां भागानां भाष्यं विरचितम् । सामवेदस्य बहूनि ब्राह्मणानि विद्यन्ते । तेषु केषाञ्चन ब्राह्मणानां भाष्यं सायणाचार्यैः कृतम् । एतेषु कानि भाष्याणि प्रकाशितानि, कदा प्रकाशितानि, केन सम्पादितानि, कानि एतावता सम्पादनीयानि इत्यादयो विषया अस्मिन् प्रबन्धे विचार्यन्ते ।]

### ०. उपक्रमः

चतुर्दशशतकीयश्रीसायणाचार्यप्रणीतत्वेन प्रसिद्धः चतुर्वेदभाष्यग्रन्थः सायणमाधवीयवेदार्थप्रकाशाख्यः इति[१] तु सर्वेषामस्माकं विदितचरमेव । एवं हि चतुर्वेदभाष्यकाररूपेण तस्य भुवनविजयकीर्तिरपि प्रसिद्धिम् एति । तत्र दीर्घेण कालेन अनुष्ठातॄणां कामोद्भवात् हीयमानविवेकविज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे च विस्तृतवेदराशेः लोपः सञ्जातः । प्रतिशाखं मन्त्राः न समानाः, अथ शाखान्तरेण वेदस्य इयत्ता कर्तुं न शक्यते इति विदुषां मतम् । शाखालोपे क्वचित् तत्तत्छाखीयानां वंशलोपः कारणं, क्वचिच्च भारतवर्षे वैदेशिकराजशक्तीनां प्रादुर्भावः । अवैदिकाः वेदं नाशितवन्त इत्यस्मिन् विषये इतिहास एव प्रमाणम् ।

एवं हि ऋगादिभेदेन वेदचतुष्टये ऋङ्मन्त्रसम्बद्धं गानम् एव सामशब्देन कथ्यते । सामानि यो वेत्ति स वेद तत्त्वम् इत्येषा बृदद्देवतायाः उक्तिः सामवेदस्य महिमानम् उच्चैः घोषयन्ति, भगवता अपि गीतायां भणितं– "वेदानां सामवेदोऽस्मि" [श्रीमद्भगवद्गीता, १०.२२] इति । तत्र गानपूर्वकम् उपासनम् एव प्रतिपादितम् ।

---

* अन्तेवासी, वेलुडमठस्थितस्य रामकृष्णमठस्य ब्रह्मचारिप्रशिक्षणकेन्द्रे, हाओड़ामण्डले, पश्चिमवङ्गेषु ७११२०२ shubhadip@gm.rkmvu.ac.in

† सहायकाचार्यः, बेलुडमठस्थितस्य रामकृष्णमिशन्विवेकानन्दशैक्षणिकशोधसंस्थानस्य संस्कृतदर्शनविभागे rakdas@gm.rkmvu.ac.in

१ प्रकृतप्रबन्धेस्थानसङ्कोचनाय वेदार्थप्रकाशः इत्याख्यायते । परन्तु भाष्यस्य प्रकृतनाम 'सायण-माधवीय-वेदार्थप्रकाशः' इति ।

## १. प्रकृताध्ययनविषयीभूतो वाङ्मयः

"सहस्रवर्त्मा सामवेदः"[२] इति महाभाष्यकाराः, ततश्च पौराणिकैरपि सामवेदस्य सहस्रशाखत्वं स्वीक्रियते। जैमिनीयगृह्यसूत्रेषु सामवेदस्य त्रयोदशशाखानाम् उल्लेखो लभ्यते। अपि चास्य वेदस्य अष्टाधिकसहस्रशाखाया उल्लेखो दिव्यावदानग्रन्थे दृश्यते। तत्र चरणव्यूहे सामवेदस्य सप्तानां मुख्यशाखानां निर्देशः परिलक्ष्यते। यथा– राणायनीया, शात्यमुग्रा, कलापी, महाकलापी, शार्दुली, लाङ्गलायनी, कौथुमी च। तत्र कौथुमशाखायाः पञ्चभेदाः आसन्, यथा– आसुरायणी, वातायनी, प्राञ्जलिद्वैतभृत्, प्राचीनयोग्या, नैगेया इति। परन्तु इदानीम् एतासु शाखासु कौथुमी, जैमिनीया, राणायनीया इति तिसृणाम् एव उपलब्धिः भवति। अपि च देशभेदे शाखाभेदस्यापि निर्देशः चरणव्यूहे उपलभ्यते। तत्र कौथुमशाखा वङ्गदेशे गुर्जरप्रदेशे च, जैमिनीयशाखा कर्णाटकप्रदेशे, अपि च राणायनीयशाखाया विस्तारो महाराष्ट्रे आसीत् इति। सत्यव्रतसामश्रमिणा[३] सामवेदस्य त्रयोदशशाखानाम् उल्लेखः कृतः। परन्तु प्रपञ्चहृदयग्रन्थानुसारेण सामवेदस्य सहस्रशाखासु द्वादशानामेव प्राप्तिरासीत्। परन्तु एतासु तिसृणामेव उपलब्धिः जायते, ताश्च—

**१.१. कौथुमशाखा**— शाखेयं लोकप्रसिद्धास्ति। अस्याः नामान्तरं ताण्ड्य इति वर्तते। अस्याः शाखायाः प्रभावः प्राचीनकाले आसीत्। भगवत्पादश्रीशङ्कराचार्यैरपि स्वप्रस्थानत्रयभाष्ये नैकेषु स्थलेषु अस्याः चर्चा विहिता। अतः अस्याः शाखाया महत्त्वम् अनुमातुं शक्यते। तत्र पञ्चविंशत्यध्यायात्मकं ताण्ड्यब्राह्मणमपि एतच्छाखासम्बद्धम् एव। छान्दोग्योपनिषदपि अनया सह सम्बद्धास्ति इति भगवत्पादः स्वभाष्ये स्पष्टं लिलेख। तथाहि "यथा ताण्डिनामुपनिषदि षष्ठे प्रपाठके स आत्मा"[४] इति, "स आत्मा...छान्दोग्योपनिषद्"[५] इति, तथा "अन्येऽपि शाखिनः ताण्डिनः शाट्यायनिः"[६] इति।

**१.२. राणायणीयशाखा**— इयं संहिता कौथुमीयशाखातः कथञ्चिदपि भिन्ना

---

२ महाभाष्ये पस्पशाह्निके।

३ बङ्गवेदविद्वान्, "Sayana of Bengal" इत्याख्यया अभिधीयते अयम्।

४ छान्दोग्योपनिषत्, शाङ्करभाष्यम्, ३.३.३६

५ छान्दोग्योपनिषत्, शाङ्करभाष्यम्, ६.८.७

६ छान्दोग्योपनिषत्, शाङ्करभाष्यम्, ३.४.२७

नास्ति । मन्त्रगणनादृष्ट्या शाखाद्वयं प्रायः समानम् । केवलम् उच्चारणे क्वचित् पार्थक्यम् उपलभ्यते । यथा आपिशलीशिक्षाकृता तथा च महाभाष्यकारेण च स्पष्टतया निर्देशितं सात्यमुग्रिया एकारस्य ओकारस्य च स्थाने ह्रस्वोच्चारणं कुर्वन्ति । तथाहि- "छन्दोगानां सात्यमुग्रिराणायनीया ह्रस्वानि पठन्ति । इति आपिशलीशिक्षा, अपि च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारं...अर्धमोकारं च अधीयते । सुजाते ए अश्वसूनृते । अध्वर्यो ओ अद्रिभिः सुतम्"[७] इति ।

**१.३. जैमिनीयशाखा**— अस्याः शाखायाः सम्पूर्णरूपेण ब्राह्मण-श्रौत-गृह्यसूत्रसंहिताः समुपलब्धाः सन्ति । जैमिनीयसंहिता देवनागरीलिप्यां लाहौरनगरात् प्रकाशिता । अस्याः संहिताया मन्त्रसंख्या १६८७ वर्तते । तलवकारशाखा अस्या एव अवान्तरभेदः । तलवकारोऽयं जैमिनेः मुख्यशिष्य आसीत् । कौथुमीयसामसंहितया साकम् अस्य महान् भेदो न भवति । परन्तु प्रकारे भेदो दृश्यते । मातृकारूपेण अस्याः संहिताया इतोऽपि अवशेषो वर्तते ।

## २. शोधसमस्या (Research Problem)

अथ तिसृषु शाखासु उपलब्धानि सर्वाण्यपि ब्राह्मणानि अद्यापि विलसन्ति । तेषु कानिचन सायणभाष्ययुतानि कानिचन तु न । ततश्च संशयः सर्वाण्यपि ब्राह्मणानि उपलब्धानि परन्तु भाष्यकारेण श्रीसायणाचार्येण केषाञ्चित् एव ग्रहणं किमर्थं कृतमिति । अपि च येषु भाष्यं लभ्यते ते पूर्णतया भाष्ययुता उत कालेन अंशत्वमेव प्राप्ता इति विचारणीयम् । एवम् उपलब्धेषु अष्टब्राह्मणेषु छान्दोग्यब्राह्मणं सम्पूर्णरूपेण सायणभाष्यसहितं न वा इत्यपि संशयस्थलम् । तत्र विद्वत्सु काचित् शङ्का तदीयग्रन्थेषु परिलक्षिता, एवं केनोपनिषदि सायणाचार्याणां भाष्यमस्ति इति तैः उह्यते । ततश्च एतेषु विषयेषु स्वभावत एव जिज्ञासास्माकम् उपजायते । अतः विषयम् इमम् आधारीकृत्य शोधार्थं नः प्रवृत्तिरिति ।

## ३. शोधपद्धतिः (Research Methodology)

एवं संशये प्रकृतप्रबन्धे अस्माभिः काचित् प्रक्रिया अवलम्बिता । तत्र प्रथमं मूलतः मातृकागारेषु पाण्डुलिपीनाम् अनुसन्धानसमये सायणाचार्यकृतस्य सामवेदीयब्राह्मणभाष्यस्य उपरि आदौ अस्माभिरवलोकनं कृतम्, मातृकासंग्रहार्थं "New Catalogus

[७] महाभाष्यम् १.१.४.४८

Catalogorum"[८] इति ग्रन्थमालायाः प्रधानतया उपोयागः कृतः, अपेक्षितस्थलेषु अस्माभिः "Catalogus Catalogorum"[९] इति ग्रन्थोऽपि दृष्टः । अन्यच्च मातृकाविषये तथ्यसङ्ग्रहार्थं "National Manuscript Mission"[१०] इति जालपुटस्यापि व्यवहारः कृतः । एवं हि तथ्यसङ्ग्रहणाय मातृकाग्रन्थालयानां विस्तारितमातृकासूचीनाम् अपि (Descriptive Catalogue) उपयोगः कृतः । ततस्तेषां ब्राह्मणग्रन्थानां तालिका अस्माभिः प्रस्तुता । एवञ्च विदुषाम् अस्मिन् विषये मतान्तराण्यपि सङ्कलितानि । ततश्च सायणभाष्यसहितं प्रकाशितब्राह्मणग्रन्थानाम् अपि सङ्ग्रहे यत्नो विहितः ।

अथ मूलप्रबन्धे आदौ अस्माभिः प्राप्तभाष्याणां व्याप्त्युपलब्धि-सायणकर्तृत्वस्य च विचारः सामान्येन प्रस्तूयते ।

## ४. सामवेदीयब्राह्मणेषु सायणीयं भाष्यम्

अथ सामवेदीयब्राह्मणप्रसङ्गे श्रीसायणाचार्याः सामविधानब्राह्मण-भूमिकायाः भाष्यप्रारम्भे लिलिखुः–

"अष्टौ हि ब्राह्मणग्रन्थाः प्रौढं ब्राह्मणमादिमं
षड्विंशाख्यं द्वितीयं स्यात् ततः सामविधिर्भवेत् ।
आर्षेयं दैवतञ्चैव मन्त्रं वोपनिषत्ततः ।
संहितोपनिषद् वंशो ग्रन्था अष्टावितीरिताः ॥"[११]

तत्र सामसंहिताया ब्राह्मणस्य सङ्ख्या अधिका वर्तते, शाखान्तरगतत्वेन कौथुमशाखाया अष्टौ ब्राह्मणानि सन्ति । ते यथा प्रौढ-षड्विंश-साम-विधान-आर्षेय-देवताध्याय-मन्त्र-संहितोपनिषद्-वंशब्राह्मणानि । तत्र मोक्षमूलरमहोदयेनापि[१२] सामवेदस्य अष्टौ ब्राह्मणानि आसन् इत्युक्तम्, अपि च तत्र कारणम् अपि दर्शितं तेन ।[१३] अथेदानीं ब्राह्मणानां सङ्ख्याविषये अस्माकं मनसि काचन शङ्का उदेति, किमिदं छान्दोग्यमिति । अत्र शङ्कायाः

[८] Catalogus Catalogorum, Theodor Aufrecht, 3 volume, 1962

[९] New Catalogus Catalogorum, University Of Madrass, 42 volume.

[१०] Catalogus Catalogorum <https ://www.namami.gov.in/catalogus-catallogurum>

[११] सामविधानब्राह्मणम्, भूमिकाभागः ।

[१२] प्रबन्धे अस्माभिः सर्वत्र 'Max-muller' इत्यस्य स्थाने मोक्षमूलर् इत्यभिधानेन अभिहितम्, यतो हि तेन स्वयमेव मोक्षमूलरभट्टः इत्येवं रूपेण प्रयुक्तः, यथा 'भट्टमोक्षमूलारेण सम्पादितः'(ऋग्वेदसंहिता, प्रथमभागः, पुटम् xxxi) इति ।

[१३] Rig-Veda-Samhita, Ed. Max Muller, Preface xxvii, footnote (x)

समाधानादौ सत्यव्रतीसामश्रमिकृतस्य विचारः समासेन विस्तार्यते । तेषां मते ताण्ड्य इत्याख्यम् एकमेव सामवेदीय-कौथुमशाखीयं ब्राह्मणम्, ऋक् अपि च यजुः इत्युभयोः गद्यपद्यात्मकस्य अखिलस्य छन्द इति नामधेयम्, छन्दसा गीयते चेत् तत् गीतमिति लोकः । अतः सामवेदीयब्राह्मणस्य छन्दोग इति नामान्तरं वर्तते । तत्र छन्दोरूपेण प्रकाशितत्वात् छन्दोगैः गीतत्वाद् वा ग्रन्थस्य नामान्तरं भवति छान्दोग्यम्, एवं छान्दोग्यम् इति तु यौगिकम् आख्यानम् । अपि च ताण्डि इत्युपाधेयैः सामगाचार्यैः प्रकाशितत्वात् ताण्ड्यमिति अभिधानम् । तत्र प्रकृतप्रसङ्गे श्रीसायणाचार्यैः उल्लिखितं प्रौढमिति नामकरणं तु अस्य ब्राह्मणस्य पूर्वार्धं सूचयति । अपि च यथा शतपथब्राह्मणं चत्वारिंशति अध्यायेषु विभक्तम्, तत्र याज्ञिकम् औपनिषदम् इति च अस्यावान्तरभेदौ, तद्वत् सामवेदस्य कौथुमशाखीयस्य अस्य ब्राह्मणप्रसङ्गे अपि तथैव । एवम् अत्रापि याज्ञिकांशः तु पूर्वार्धे त्रिंशति अध्यायेषु विभक्तः, अपि च अन्तिमस्य दशाध्यायस्य औपनिषदम् इति प्रसिद्धिः । किञ्च पूर्वभागे आदिमाध्यायद्वये यथा श्रौतकार्यनिरूपणाय मन्त्राणाम् उपयोगो वर्तते, तथैव उत्तरकाण्डे अध्यायद्वये गृह्यकार्यविषयकस्य मन्त्रस्य उपलब्धिर्वर्तते । अतः श्रीसायणाचार्यैः त्रिंशदध्यायात्मकस्य प्रथमभागस्य आपञ्चविंशत्यध्यायं प्रौढम् इति नामकरणं कृतम्, तथैव षड्विंशाद्यन्तिमाध्यायपञ्चकं षड्विंशत्वेन अभिहितम् । अत्र मूलश्लोके “षड्विंशाख्यं द्वितीयं स्यात्” इत्यादिरूपेण निर्देशितं ग्रन्थभागं तु प्रौढब्राह्मणस्य याज्ञिकभागस्य अन्तिमः षड्विंशाद्यध्यायपञ्चकः । तत्र षड्विंशाख्यस्य ब्राह्मणभागस्य अन्तिमाध्याये अद्भुतशान्ते उपायस्य उपदिष्टत्वात् केचन अन्तिमभागस्य अद्भुतब्राह्मणम् इत्याख्येन निर्देशम् अकुर्वन् । एवं कौथुमशाखीयस्य ब्राह्मणस्य सङ्ख्या एका वर्धिता, अद्भुतब्राह्मणस्य एतेषु परिगणितत्वात् । एवं षड्विंशम् अपि च अद्भुतम् इति द्वावपि ताण्ड्यब्राह्मणस्य याज्ञिकभागस्य अन्तिमभागौ । एवं श्रीसायणाचार्यकृतविभागेषु षष्ठब्राह्मणस्य प्रकृतस्य नाम, न तु मन्त्रं न वा उपनिषदिति । अपि तु आदिमाध्यायद्वयं मन्त्रब्राह्मणम् अपि च अन्तिमाध्यायाष्टकं छान्दोग्योपनिषद् इत्याख्यानम् । साकल्येन दशाध्यायात्मकं ब्राह्मणम् इदं ताण्ड्यब्राह्मणस्य अवशेष इति । एवं सर्वम् आहत्य सामवेदस्य एकम् एव ब्राह्मणं छान्दोग्यम् इति ।

एवं सामविधिः सामविधानं वा, आर्षेयं, दैवतं देवताध्यायं वा,

संहितोपनिषद् अपि च वंशाख्यान्तः पञ्चब्राह्मणम् इदं न प्रकृतब्राह्मणत्वेन विद्वद्भिर्गण्यते । परं वैदिकवाङ्मये ब्राह्मणसदृशः सम्माननीयश्च । अत एतेषाम् अनुब्राह्मणम् इति नामान्तरम् । तत्र कैश्चित् एवम् आक्षिप्यते यत्– यदि इमे ब्राह्मणग्रन्थाः भवेयुः, तर्हि निदानसूत्रं प्रभृतिग्रन्थेषु उल्लिखितम् अनुब्राह्मणं किम्, एवञ्च भगवता पाणिनिना विरचितस्य अनुब्राह्मणादिनिः (अष्टाध्यायी ४.२.६२) इति सूत्रस्य क आशयः, इति विचारणीयम् ।

अतः छान्दोग्यब्राह्मणस्य स्वरूपनिर्धारणाय आदौ सामवेदीयस्य कौथुमशाखीयब्राह्मणानां विभागेषु अवधानं दातव्यम्, तत्र अष्टसु ब्राह्मणेषु प्रौढब्राह्मणं समग्रस्य छान्दोग्यब्राह्मणस्य पञ्चविंशखण्डात्मकम्, एवञ्च द्वितीयं षड्विंशब्राह्मणं तु पञ्चखण्डात्मकम् । तत्रापि षड्विंशब्राह्मणस्य अद्भुतब्राह्मणत्वेन प्रसिद्धत्वात् पृथक् संज्ञा । एवं षड्विंशब्राह्मणस्य अग्रिमाध्यायद्वयस्य मन्त्रब्राह्मणम् उपनिषद्ब्राह्मणम् इति वा नामधेयम् । इतोऽपि अपर एको भागो दृश्यते, यत्र दशप्रपाठकविशिष्टस्य छान्दोग्यब्राह्मणस्य प्रथमप्रपाठकद्वयस्य मन्त्रब्राह्मणत्वेन, अन्तिमस्य अष्टमप्रपाठकस्य छान्दोग्योपनिषद् इति नाम ।

अथेदानीम् उपलब्धेषु अष्टब्राह्मणेषु प्रतिब्राह्मणं व्याप्त्युपलब्धि-सायणकर्तृत्वादिक्रमेण विचार्यते ।

**४.१. प्रौढब्राह्मणम्**— प्रौढं वा पञ्चविंश वा इति कौथुमशाखीयस्य सामवेद-ब्राह्मणस्य आदिमं ब्राह्मणम् । अत्र पञ्चविंशतिः अध्यायाः सन्ति, एतेषां विषये आदौ एव आलोचितम् ।

**४.१.१. प्रथमं संस्करणम्**— अथेदानीं प्रकाशितग्रन्थस्य विषये अस्माभिः अवलोक्यते । तत्र आदौ अस्माकं परिलक्षितेषु प्रकाशकग्रन्थेषु सायणाचार्य-भाष्यसहिततया आनन्दाचार्य-वेदान्तवागीशेन सम्पादितस्य ग्रन्थस्य विषये विचार्यते । बिबलियोटिका इण्डिका इति ग्रन्थमालायां राजते अयं ग्रन्थः, अस्य क्रमो भवति ६२ इति । भागद्वयात्मकमिदं सम्पादनम् । कलिकाता-नगराद् एसियाटिक्-सोसाइटि इत्यस्मात् अस्य प्रकाशनं जातम्, प्रकाशनकालश्च १८७०-७४ इति । एवम् अस्य सम्पादनस्य आदौ भूमिकायां मातृकाणां विषये विस्तारेण आलोचितम्, ततश्च साक्षाद् ग्रन्थारम्भः । पठनसौकर्याय विषयसूची मन्त्राणाम् अनुक्रमणिका वा किम् अपि न योजितं तेन । परन्तु ग्रन्थान्ते च अध्यायानुसारं मन्त्राणां क्रमः अभिहितः । एवं सम्पादनम् इदम् न पाठसमीक्षात्मकम् इति निश्चयेन वक्तुं शक्यते, यद्यपि

मातृकाणां विषये एतैः आदौ एव विस्तारितम्, तथापि पाठभेदादिविषयो न योजितो ग्रन्थे कुत्रापि ।

**४.१.२. द्वितीयं संस्करणम्**— एवम् इदानीम् अस्माभिः परिलक्षितेषु ग्रन्थेषु द्वितीयं भवति श्रीचिन्नस्वामिशास्त्रिणा सम्पादितं, वाराणसीप्रदेशाच्च प्रकाशितम् । ग्रन्थोऽयं हरिदाससंस्कृतग्रन्थमालासमारूप-काशीसंस्कृत-सिरिज्पुस्तकमालायाः १०५ इति सङ्ख्यके वेदविभागे षष्ठपुष्पे च वर्तते । प्रकाशनमिदं खण्डद्वयात्मकमिति, अस्य प्रकाशनकालः १९३५ क्रिस्ताब्दः । सम्पादनम् इदं न पाठसमीक्षात्मकं, यद्यपि अयं बहुविस्तरेण भुमिकां रचयामास, परन्तु मातृकागतविचारः क्वचिद् अपि न लक्ष्यते ।

**४.१.३. तृतीयं संस्करणम्**— ततश्च अवलोकितेषु ग्रन्थेषु तृतीयं भवति 'डब्लु. कालण्ड' (W. Caland) सम्पादितम् आङ्गलानुवादसहितं प्रकाशनम् । अस्य प्रकाशनकालः १९३१ क्रिस्ताब्दः । ग्रन्थोऽयं बिबलियोटिका इण्डिका इति ग्रन्थमालायां २५५ इति संख्यके एसियाटिक सोसाइटि कलिकातातः प्रकाशितः । अस्मिन् ग्रन्थे मूलम्, अनुवादः अपि च क्वचित् स्थलेषु भाष्यानुसारं टिप्पनी अपि दृश्यते ।

**४.२. षड्विंशब्राह्मणम्**— अथ अष्टसु ब्राह्मणेषु द्वितीयं भवति षड्विंशब्राह्मणम्, षड्विंशाख्यं द्वितीयं स्यात् इत्युक्तत्वात्, वस्तुत इदं ताण्ड्यब्राह्मणस्य अंशभूतम् । अतः अस्य ताण्ड्यशेष इत्यप्यपरं नाम । सायणाचार्यैरपि अथास्मिन् ताण्ड्यशेषब्राह्मणे इत्येव भाष्यमवतार्यते ।

**४.२.१. प्रथमं संस्करणम्**— अस्माभिः परिलक्षितेषु ताण्ड्यशेषब्राह्मणग्रन्थेषु प्रथमं भवति सत्यव्रतसामश्रमिभट्टाचार्येण सम्पादितं सायणभाष्यसहितं पूर्णसम्पादनम् । संस्करणमिदम् कलिकातानगरात् जातम् इति, अस्य प्रकाशनस्य कालः १९३१ क्रिस्ताब्दः ।

**४.२.२. द्वितीयं संस्करणम्**— द्वितीयं 'कुर्ट क्लेम' (Kurt Klemm) सम्पादितं प्रकाशनम्, मूलतः जार्मानभाषायां राजते अयं ग्रन्थः, सायणाचार्यकृतभाष्यात् सारः, अपि च जार्मानभाषया अनुवादः वर्तते, गुटार्स्लह (Gutersloh) इति प्रदेशात् १८९४ क्रिस्ताब्दे अस्य सम्पादनं जातम् । अस्य सम्पादने बहूनां मातृकाणामुपयोगः तैः कृतः ।

**४.२.३. तृतीयं संस्करणम्**— एवम् अस्माभिरवलोकितेषु ग्रन्थेषु तृतीयत्वेन 'एइच. एफ. एलसिंग' (H. F. Eelsingh) सम्पादितस्य ग्रन्थस्य आलोचनं क्रियते । अनेन सायणाचार्यकृतभाष्यसहिततया एव अस्य ब्राह्मणस्य

सम्पादनं कृतम् । लेइडेन (Leiden) इति प्रदेशात् १९०८ क्रिस्ताब्दे अस्य प्रकाशनं जातमिति ।

**४.२.४. चतुर्थं संस्करणम्**— अथ चतुर्थत्वेन अस्माभिः बि. आर. शर्मना सम्पादितस्य सायणाचार्यभाष्यसहितस्य अस्य ब्राह्मणस्य विषये आलोच्यते । केन्द्रीय-संस्कृतविद्यापीठग्रन्थमालायाः नवमक्रमे अस्य प्रकाशनं जातम् । तत्र तिरुपतिप्रदेशात् १९६७ क्रिस्ताब्दे अस्य प्रकाशनं जातमिति । प्राकाशनमिदं समालोचनात्मकमिति दृश्यते । अनेन प्रकाशकेन बहुविस्तरेण भूमिकाभागो विरच्य तत्र स्वीयसम्पादने उपयुक्तानां मातृकाणां विषयेऽपि विस्तारेण आलोचितम् ।

**४.२.५. पञ्चमं संस्करणम्**— अथेदानीम् अन्तिमत्वेन अस्माभिः परिलक्षित-प्रकाशनस्य विषये विचारयामः । सम्पादनमिदं मुख्यतया आङ्गलभाषया अस्य ब्राह्मणस्य अनुवादात्मकम् । 'डब्लु. बि. बोले' (W. B. Bollee) इत्यनेन सम्पाद्य 'आर्टरिच्ट' (Utrecht) इति नगरात् १९५६ क्रिस्ताब्दे प्रकाशितम् ।

ब्राह्मणमिदं सम्पूर्णतया सायणभाष्यसहितमिति दृश्यते ।

**४.३. सामविधानब्राह्मणम्**— षड्विंशस्य परं भवति सामविधानम्, ततः सामविधिर्भवेत् इति आचार्यकृतभाष्यप्रमाणात् । अत्र मुख्यतया कृच्छ्र-चान्द्रायणादीनि प्रायश्चित्तानि विधीयन्ते, तत्तत्पापक्षयार्थम् । अथेदानीम् अस्य ब्राह्मणस्य प्रकाशितरूपेण अस्माभिरवलोकितग्रन्थानाम् आलोचनं क्रियते ।

**४.३.१. प्रथमं संस्करणम्**— तत्र प्रथमं भवति ए. सि. बार्णेल महोदयेन सम्पादितं सायणभाष्यसहितं प्रकाशनम्, इदं तु रोमान्-लिप्यां वर्तते । सम्पादनमिदं लण्डनप्रदेशात् १८७३ क्रिस्ताब्दे जातम् । अस्य ब्राह्मणस्य प्रथमतया अनेन सम्पादनं कृतमिति ज्ञायते ।

**४.३.२. द्वितीयं संस्करणम्**— द्वितीयं तु सत्यव्रतसामश्रमिना कृतं सम्पादनम्, इदं प्रथमतया देवनागरीलिप्यां सायणभाष्यसहिततया अस्य ब्राह्मणस्य सम्पादनम् । कलिकाता-नगरात् १८९५ क्रिस्ताब्दे अस्य प्रकाशनं जातम् । अस्य प्रकाशनस्यादौ सम्पादने उपयुक्तानां मातृकाणां विषये विस्तारेण आलोचनं वर्तते ।

**४.३.३. तृतीयं संस्करणम्**— अत्र परिलक्षितेषु तृतीयं भवति, बि. आर. शर्मणा सम्पादितं भरतस्वामी सायणाचार्यः इत्युभयोः भाष्यसहिततया

प्रकाशनम् । अस्य कालः १९६४ क्रिस्ताब्दः । ग्रन्थोऽयं केन्द्रीय-संस्कृत-विद्यापीठ-ग्रन्थमालायां राजते ।

इदमपि ब्राह्मणम् आमूलचूडं सायणीयभाष्यसहितम् इति ।

**४.४. आर्षेयब्राह्मणम्**— तत आर्षेयब्राह्मणम्, एतद् अपि प्रपाठकत्रय-परिमितम् । तत्र संहिताग्रन्थोक्तानां साम्नाम् ऋष्यादिकं प्रतिपाद्यते । अथेदानीम् अस्माभिरवलोकितानां सम्पादनानां विषये विचार्यते ।

**४.४.१. प्रथमं संस्करणम्**— तत्र प्रथमं तु ए. सि. बार्णेल महोदयेन सम्पादितं सायणभाष्ययुतं प्रकाशनम्, मैङ्गलूर्-प्रदेशात् १८७६ क्रिस्ताब्दे अस्य प्रकाशनं जातम् । इदं प्रथमतया अस्य ब्राह्मणस्य सम्पादनम इति वक्तुं शक्यते ।

**४.४.२. द्वितीयं संस्करणम्**— द्वितीयत्वेन सत्यव्रतसामश्रमिभट्टाचार्येण सम्पादितं वङ्गभाषया अनुवादसहिततया प्रकाशनम् । अनेन अनुवाद-सहिततया क्वचित् स्थलेषु भाष्यात् टिप्पणी अपि विरच्य दत्ता । परन्तु न सम्पूर्णस्य इति ।

**४.४.३. तृतीयं संस्करणम्**— एवं तृतीयत्वेन बि. आर. शर्मणा सम्पादितं सम्पूर्णसायणभाष्यसहितं प्रकाशनम् । केन्द्रीय-संस्कृत-विद्यापीठ-ग्रन्थमालाया अष्टसङ्ख्यकक्रमे अस्य प्रकाशनं जातमिति ।

ब्राह्मणम् इदं सम्पूर्णतया सायणीयभाष्यसहितम् इति अवलोकितम् अस्माभिः ।

**४.५. देवताध्यायब्राह्मणम्**— अनन्तरं दैवतब्राह्मणम्, देवताध्यायब्राह्मणं वा । तच्च खण्डत्रयात्मकम् । तत्र देवता, छन्दांसि, तेषां वर्णसंख्या, देवतानां नामनिर्वचनं च प्रतिपाद्यन्ते । अथेदानीम् अस्माभिरवलोकितानां ग्रन्थानां विचारोऽत्र प्रस्तूयते ।

**४.५.१. प्रथमं संस्करणम्**— तत्र प्रथमम्, 'ए. सि. बार्णेल' महोदयेन सम्पादितम्, केवलं मूलमात्रम् । अनेन मैङ्गलूर्-प्रदेशात् १८७३ क्रिस्ताब्दे अस्य ब्राह्मणस्य प्रकाशनं कृतम् । अयं रोमान्-लिप्याम् अस्य प्रकाशनम् अकरोत् । अनेन स्वीयसम्पादनाय सायणाचार्यकृतभाष्यस्यापि उपयोगः कृतः । अनेन अस्य सम्पादनाय सप्त मातृकाः व्यवहृताः ।

**४.५.२. द्वितीयं संस्करणम्**— ततो द्वितीयं भवति सत्यव्रतसामश्रमि-भट्टाचार्येण सम्पादितम्, वङ्गभाषया अनुवादसहिततया प्रकाशनम् । अनेन १८७६ क्रिस्ताब्दे कलिकातानगराद् अस्य प्रकाशनं कृतम् । अनेन अनुवादेन सह अत्र स्वीयटिप्पणमपि योजितम् ।

**४.५.३. तृतीयं संस्करणम्**— एवं तृतीयं तु जीवानन्दविद्यासागरेण सम्पादितं सायणाचार्यकृतं भाष्यसहितं प्रकाशनम्। अस्य प्रकाशनकालः १८८१ क्रिस्ताब्दः, कलिकातातः अस्य प्रकाशनं जातम् ।

**४.५.४. चतुर्थं संस्करणम्**— ततश्च एम. रामनाथ-दीक्षितर् इत्यनेन सम्पादितं भाष्यसहितं प्रकाशनम् । चेन्नै नगरात् मैलापुर-प्रदेशात् संस्कृत-विश्वविद्यालात् १९५९ क्रिस्ताब्दे अस्य प्राकशनं जातम् ।

**४.६. मन्त्रब्राह्मणम्**— अथेदानीं मन्त्रब्राह्मणस्य स्वरूपं निर्णीयते, तत्र अस्य ब्राह्मणस्य अध्यायद्वयं वर्तते, प्रतिप्रपाठकम् इति वा नामान्तरम् । प्रत्यधायञ्च अष्टौ खण्डाः सन्ति, एवम् आहत्य अध्यायद्वये षोडशखण्डाः सन्ति ।

**४.६.१. मन्त्रब्राह्मणम्**— अतः ब्राह्मणस्य खण्डद्वये जातकर्मादिसंस्काराद् आरभ्य विवाहाद्यखिलस्य गार्हस्थ्यकर्मणां सङ्कलनं वर्तते, तत्र प्रथमप्रपाठके संस्काराङ्गत्वेन मन्त्रा निबद्धाः, अपि च द्वितीयप्रपाठके शान्तिविधायकमन्त्राणाम्, अग्रहायणम्, अग्निसंस्कारं, श्राद्धाङ्गादि-नानाविधमन्त्राणां सङ्कलनं दृश्यते। अतः सामवेदीयगृह्यकर्मसमूहे अस्य ब्राह्मणस्य नामान्तरं भवति मन्त्रयोनि (यदि पुंलिङ्गे तर्हि मन्त्रयोनिरिति) इति। एवञ्च प्रथमभागे सामवेदीयकौथुमशाखीयानां ब्राह्मणानां विवाहादिसंस्काराणां मन्त्रसमूहस्य उल्लेखो वर्तते, अतोऽस्याः शाखाया ब्राह्मणानाम् अतिप्रयोजनीयत्वाद् अस्य प्रसिद्धिः । विशेषतो वङ्गप्रदेशे प्रायः सर्वे ब्राह्मणाः सामवेदीया इति तु प्रसिद्धिः । तथापि आदिमाध्यायद्वयात्मकस्य मन्त्रब्राह्मणस्य कथं लोपः सञ्जात इति तु आश्चर्यम्, तत्र श्रौतकर्मादिषु ब्राह्मणानाम् अनीहा एव अस्य लोपस्य कारणत्वेन अस्माभिरुह्यते। यद्वा भवतु अस्य मन्त्रात्मकस्य ब्राह्मणभागस्य गुणविष्णुः सायाणाचार्य इत्युभाभ्यां भाष्यं बहुपूर्वं कृतं वर्तते । अथेदानीम् अस्माभिरवलोकितानां ग्रन्थानां विचारोऽत्र प्रस्तूयते ।

तत्र प्रथमतया श्रीदुर्गामोहनभट्टाचार्येण कलिकाता-संस्कृत-महाविद्यालय-गवेषणाग्रन्थमालायाः प्रथमग्रन्थाङ्के अस्य भाष्यद्वयस्य प्रकाशनं १९५८ ईसवीयाब्दे विहितम् । तत्र पूर्वं तु सत्यव्रतसामश्रमी १८७२ ईसवीयाब्दे अस्य मन्त्रब्राह्मणस्य वङ्गभाषया अनुवादम् अपि च टीकाम् एकां विरच्य प्रत्नकम्रनन्दिनी इति पत्रिकायां प्रकाशयामास। अपि च अन्यदेकं व्याख्यानं तैः विरच्य तत्र १८९० ईसवीयाब्दे प्रकाशयाम्बभूव । द्वियीयव्याख्याने तु तैः पूर्वस्य क्वचित् संशोधनम् अपि विहितम् इति ज्ञायते ।

**४.६.२. उपनिषद्ब्राह्मणम्**— उपनिषद्ब्राह्मणम् इति नामकरणं तु प्रकृतप्रसङ्गे श्रीसायणाचार्यकृतस्य "मन्त्रं वोपनिषत्ततः"[१४] इति उक्त्या अस्य ब्राह्मणस्य अन्तिमाष्टमौ तु उपनिषत्त्वेन गण्येते, अस्यैव नामान्तरं छान्दोग्योपनिषदिति । 'ओमित्येतदक्षरम्' इत्याद्यष्टाध्यायी छान्दोग्योपनिषद् इति भगवत्पादेनापि अस्य अष्टाध्यायीत्वं सूच्यते । मुख्यासु दशोपनिषत्सु अस्याः स्थानम् अन्यतमम् । अत्र भाष्यकारत्वेन व्याख्याकारत्वेन वा ब्रह्मानन्दि-द्रामिडा-चार्य-श्रीशङ्करभगवत्पाद-भाष्करभट्ट-नरेन्द्रपूरि-माधवाचार्य-आनन्दगिरि-सुदर्शनसुरि-ज्ञानान्द-बालकृष्णानन्दप्रभृतीनां नामानि ग्रहीतुं शक्यन्ते । एवञ्च अन्येषामपि केषाञ्चित् नामानि अनुवादकृत्सु गणयितुं शक्यन्ते, तेषु दाराशुकस्य पारसिकभाषायाम् अनुवादः, राघवेन्द्रयतेः व्याख्यानम्, अप्पय्यदीक्षितस्य अद्वैतपरकं भाष्यम्, अद्वैतानन्दतीर्थस्य भाष्यम्, भाष्करपरिव्राजकस्य पदार्थविवरणं प्रभृतयः ।

एवं प्रसङ्गेऽस्मिन् श्रीसायणाचार्यकृतछान्दोग्योपनिषद्भाष्यस्योपरि भाष्यमिदम् छान्दोग्योपनिषद्दीपिकेति नाम्ना प्रसिद्धम् । अनेन भाष्यकारेण स्वीये भाष्ये भगवत्पादकृतस्य भाष्यस्य वैयासिकन्यायमालायाश्च उपयोगः कृतः । तैः भाष्यभूमिकायां लिलेख यत् - "छान्दोग्योपनिषद्व्याख्यां श्रीमच्छङ्करमार्गतः । कुर्वे वैयासिकन्यायैः संयुक्तां तत्त्वबुद्धये ।"[१५] विषयस्तु प्रबन्धाग्रे शोधनिष्कर्षस्य विचारसमये यथामूलं विस्तार्यते । एवं हि विषयोऽयं "सायणीयच्छान्दोग्योपनिषद्भाष्यस्य व्याप्त्युपलब्धिसायणकर्तृत्वविचारः" इति शीर्षकाङ्किते प्रबन्धे विशदेन प्रतिपादितः ।

**४.७. संहितोपनिषद्ब्राह्मणम्**— अस्माभिः परिलक्षितग्रन्थेषु सायणभाष्य-सहिततया एकस्यैव ग्रन्थस्य प्राप्तिर्जाता, सा खलु बि. आर. शर्मणा सम्पादितम् प्रकाशनम् । अस्मिन् सम्पादने भाष्यद्वयस्य संग्रहः तेन विहितः, प्रथमं तावत् द्वैजराजस्य भाष्यम्, द्वितीयं तु सायणाचार्यस्यैव । क्रेन्दीयसंस्कृतविद्यापीठग्रन्थमालायां तिरुपतिप्रदेशात् १९६५ क्रिस्ताब्दे अस्य ग्रन्थस्य प्रकाशनं जातम् । सम्पादनम् इदं समालोचनात्मकं वर्तते । विस्तारेण भूमिकां विरच्य, तत्र सम्पादने उपयुक्तानां मातृकाणाम् उल्लेखोऽपि तेन कृतः । एतेन प्रकाशितग्रन्थद्वयस्य अपि च सर्वम् आहत्य नवमातृकाणाम् उपयोगः कृतः, तेषु द्वौ भवतः सायणाचार्यकृतभाष्यसहितौ, अनन्तरद्वयं तु

[१४] छान्दोग्यब्राह्मणम्, पृ.३.
[१५] छान्दोग्योपनिषद्दीपिका, पृ.१.

द्वैजराजकृतभाष्यस्य, अवशिष्टपञ्चकं तु केवलं ब्राह्मणस्यैव । अपि च तासु, कतमः प्रधान इति सुनिपुणतया विचार्य प्रतिष्ठापितम् ।

**४.७.१. प्रथमं संस्करणम्**— अस्य ब्राह्मणस्य प्रथमतया सम्पादनं कृतम् ए. सि. बार्णेल महोदयेन । अनेन रोमान्-लिप्यां द्वैजराजस्य व्याख्यानसहिततया मैङ्गलूर्-प्रदेशात् १८७७ क्रिस्ताब्दे अस्य सम्पादनं कृतम् ।

**४.७.२. द्वितीयं संस्करणम्**— अनन्तरं भवति एम. रामनाथ-दीक्षितर् (M. Ramanath Dikshtar) इत्यनेन सम्पादितम्, अनेन देवताध्यायब्राह्मणसहितं संहितोपनिषद्ब्राह्मणस्य प्रकाशनं कृतम्, अपि च क्वचित् स्थलेषु सायणाचार्यविरचितस्य भाष्यस्यापि संयोजनं कृतम् इति । परन्तु आचार्यकृतभाष्यं केवलं प्रथमकाण्डे वर्तते । अनेन चेन्नै नगरस्थ-मैलापुरम् इति प्रदेशात् संस्कृतमहाविद्यालयात् १९५९ क्रिस्ताब्दे अस्य प्रकाशनं कृतम् ।

**४.८. वंशब्राह्मणम्**— अनन्तरं वंशब्राह्मणाख्यम् अन्तिमं ब्राह्मणम् । तत्र च सम्प्रदायप्रवर्तकानाम् आचार्याणां परम्परानुकीर्तनम् अस्ति । सेयं विद्यापरम्परा न तु वंशपरम्परा । वंशो हि द्विविधो– विद्यया जन्मना च । सेयं विद्या-परम्परेत्यवगन्तव्यम्, अष्टसु अन्तिमत्वाद् अत्रैव च आलोचितोऽयं विषयः ।

**४.८.१. प्रथमं संस्करणम्**— एवम् अस्माभिः पर्यालोकितेषु वंशब्राह्मणेषु प्रथमं भवति 'ए. ओवेबार्' (A. Weber) इत्यस्य सम्पादनम् । अनेन 'इन्डिके स्टाडिन्' (Indische Studien) इति ग्रन्थमालायाः चतुर्थखण्डे प्रकाशितोऽयं ग्रन्थः । अस्य ब्राह्मणस्य व्याख्याकाराणां विषये तस्य मतं यत् - "One fact deserves to be especially noticed here, namely, that several of the teachers mentioned in the Vamsa Brahmana, by their very names, points us directly to the north-west of India, e.g. Kamboja Aupamanyava, Madaragara Saungayani, Sati Aushtrakshi, Salamkayana and Kauhala"[१६] इति । एवं वंशब्राह्मणस्य इदं प्रथमं सम्पादनम् इति ज्ञायते । अस्य प्रकाशनकालः १८५८ क्रिस्ताब्दः ।

**४.८.२. द्वितीयं संस्करणम्**— अनन्तरम् 'ए. सि. बार्णेल' (A. C.

---

[१६] The history of Indian literature, 2001 (edition), pp 74/75, fn 71, Albrecht Weber ; See also I St., IV, pp 378-80.

Burnell) महोदयेन सम्पादितस्य ग्रन्थस्य विषये आलोच्यते । सम्पादनम् इदं मैङ्गलूर् इत्यस्मात् प्रदेशात् १८७३ क्रिस्ताब्दे अभवत् । अत्र वार्णेल-महोदयेन रोमान्-लिप्याम् अस्य ग्रन्थस्य सम्पादनं कृतम् । अयम् अत्र सायणाचार्यकृतभाष्यसहिततया अस्य सम्पादनमकरोत् ।

**४.८.३. तृतीयं संस्करणम्**— एवं तृतीयत्वेन सत्यव्रतसामश्रमिभट्टाचार्येण सम्पदितस्य ग्रन्थस्य अवलोकनं कृतम् । ग्रन्थोऽयं कलिकातानगरात् १८९२ क्रिस्ताब्दे प्रकाशितम् । प्रायः देवनागरीलिप्याम् इदं प्रथमं सम्पादनम् । अनेनापि स्वीयसम्पादनाय मातृकाणाम् अपि च पूर्वं प्रकाशितग्रन्थस्यापि उपयोगः कृतः । अनेन अत्र वङ्गभाषया अनुवादः संयोजितः, अपि च स्वीयसम्पदनाय सायणाचार्यकृतभाष्यस्यापि उपयोगः कृतः ।

**४.८.४. चतुर्थं संस्करणम्**— अथ चतुर्थत्वेन बि. आर्. शर्मणा सम्पादितस्य ग्रन्थस्य विषये विस्तार्यते । इदं संस्करणं केन्द्रीय-संस्कृत-विद्यापीठ-ग्रन्थमालायाः अन्तर्गतत्वेन प्रकाशितम् । सम्पादनस्य अस्य कालः १९६५ क्रिस्ताब्दः । अस्य सम्पादनाय अनेन पूर्वोक्तानां प्रकाशितग्रन्थानाम्, अपि च सप्तमातृकाणामुपयोगः कृतः ।

**५. शोधनिष्कर्षः**

अथ एतेषाम् अष्टब्राह्मणानां सायणमाधवीय-वेदार्थप्रकाशे अन्तर्गतत्वात्, सायणाचार्यकृतिषु एतेषां ब्राह्मणानां भाष्यं गण्यते न वा इति संशये आमूलचूडं भाष्याणाम् अध्ययने प्रवृत्तेन मया एतावता निश्चितं यत्—

**५.१.** यद्यपि वेदार्थप्रकाशस्य एककर्तृत्वे संशयोऽस्ति तथापि एतेषां ब्राह्मणानां भाष्यं तेषां मार्गदर्शनेन सम्पादनेन वा शिष्यैः कृतम् इति ।

**५.२.** एवञ्च भाष्यस्य भाषाशैलीविषये केचन अंशा अत्र उल्लिख्यन्ते, तत्र भाषायां धातूनां प्रयोगे, शब्दचयने आभाष्यं समानता दृश्यते ।

**५.३.** अपि च सिद्धान्तव्यवस्थापनाय तैः शास्त्रान्तरेषु प्रमाणान्तराणां प्रयोगेऽपि सारस्यं लक्षणीयम् एव, यथा प्रतिशाखं शिक्षादिवेदाङ्गानि भिन्नानि, प्रातिशाख्यम् अपि पृथक् पृथग् एव, यथा भगवत्पादैः श्रीशङ्कराचार्यैः स्वसिद्धान्तव्यवस्थापनाय श्रुति-स्मृति-पुराणानाम् उपयोगः कृतः, तद्वत् सायणाचार्यैरपि श्रुति-स्मृत्यादिप्रमाणभूतशास्त्राणां प्रयोगः कृत इति भाष्यावलोकनेन दरीदृश्यते ।

अथ च शाखान्तरस्य जैमिनीयस्य अवान्तरासु तिसृषु शाखासु तलवकारब्राह्मणस्योपरि सायणाचार्यैः भाष्यं कृतम् आसीद् इति विदुषाम् अभिप्रायः, परन्तु तथ्यम् इदं न यथायथम् इति मातृकादिभाष्यग्रन्थानाम् अवलोकनेन स्पष्टं ज्ञायते, एवं हि "केनोपनिषदम् आश्रित्य शङ्काद्वयस्य समाधानम्" इति शीर्षकाङ्किते प्रबन्धे विस्तारेण आलोचितम्। अथ निर्णयरूपेण इदं वक्तुं शक्यते यत्, कौथुमशाखाया अष्टब्राह्मणानाम् एव भाष्यम् एतावता उपलब्धम्।

एवं हि शाखागतस्य एकस्य व्याख्यानावसरे सम्पूर्णस्य वेदभागस्य एव भाष्यम् अकरोत् सायणाचार्यः इति सामान्यरूपेण अस्माभिरेतावता परिलक्षितम्। एवञ्च सामवेदस्य कौथुमशाखायाम् अष्टौ एव ब्राह्मणानि आसन्निति तु विदितगोचरम्, ततश्च मन्त्रबाह्मणस्य अंशभूतत्वात्, छान्दोग्योपनिषदोऽपि उपलब्धिर्जाता इति। एवं हि एतेषां ब्राह्मणानां सम्पूर्णरूपेण सायणाचार्यकृतभाष्यसहितम् इदम् इति निश्चयेन वक्तुं शक्यते।

### ६. उपसंहारः

सहस्रवर्त्मनः सामवेदस्य अधुना उपलभ्यमानासु तिसृषु शाखासु कौथुमशाखीयस्य अष्टब्राह्मणानाम् उपरि सायणाचार्यैः भाष्यम् अरीरचत् इति एतावता सिद्धम्। अथ वेदार्थप्रकाशे एतेषाम् अष्टब्राह्मणानाम् अन्तर्भावः मध्याह्नमार्तण्डवत् स्पष्टम् इति शिवम्।

* * *

## Bibliography


1. *Vedera Paricaya* (Ben.) (3rd Edition) ; Yogiraj Basu ; Farma K. L. Private Limited ; Kolkata ; 2009
2. *Brāhmaṇasaṃgrahaḥ* (Eng.) ; Samirancandra Chakraborty ; Sāhitya Akādemī ; Kolkata ; 2004
3. *Chāndogyobrāhmaṇamn* (San.), (*Both the Commentary of Guṇaviṣṇuḥ and Sāyaṇācāryaḥ*) ; Durgamohan Bhattacharya (Ed.) ; Sanskrit College ; Calcutta ; 1958
4. __, (*With the Commentary of Guṇaviṣṇuḥ*) ; Durgamohan Bhattacharya (Ed.) ; Sanskrit Sahitya Parishad ; Calcutta ; 1930

5. *Das Mantrabrāhmaṇa* (Eng.) (First Prapāṭhakaḥ) ; Heinrich Stönner (Ed.) ; Halle a. S ; 1901
6. *Das Mantrabrāhmaṇa* (Eng.) (Second Prapāṭhakaḥ) ; Hans Jørgensen (Ed.) ; Darmstadt ; 1911
7. Gode, P. K. "*Oldest Dated Manuscript of Sāyaṇa's commentary on the Sāmaved*" Annals of the Bhandarkar Oriental Research Institute, 1938-39, Vol. 20, No. 2 (1938-39), pp. 145-152.<http ://www.jstor.com/stable/41688875>
8. *Caraṇavyūhasūtram* (San.) (*With the commentary of Ācārya Mahidāsa*) ; Maharṣiśonakaḥ ; Kāśī Saṃskṛta Granthamālā 132 ; Caukhāmbhā Saṃskṛta Saṃsthāna ; Varanasi ; 1994 (4th Edition)
9. *Mantrabrāhmaṇa* (San.) ; Satyavrata Samashrami (Ed.) ; Pratnakamranandinī (Vol. V) ; Sereampore ; 1872
10. __ ; Satyavrata Samashrami (Ed.) ; Kolkata ; 1890
11. *Sacred Books of The East* (*by Various Original Scholars*) (Eng.) ; Vol I. ; Muller, F. Max ; Oxford ; London ; 1900
12. Narasimhacharya, R. "*Madhavacharya and his younger Brother.*" Indian Antiquary (A journal of Oriantal Research). Vol XLV. Ed. Sri Richard Carnac Temple and Prof Devadatta Ramakrishna Bhandarkar. Bombay, 1916. <https ://indianculture.gov.in/flipbook/32843>
13. *New Catalogus Catalogorum*, (*An Alphabetical Register of Sanskrit and Allied works and Authors*) ; Vol XXXVII ; Dr. Siniruddha Dash (Ed.) ; University of Madras ; 2015
14. __, __ ; Vol XXXVIII ; Dr. Siniruddha Dash (Ed.). University of Madras 2015.
15. __, __ ; Vol XXXIX ; Dr. Siniruddha Dash (Ed.) ; University of Madras ; 2015
16. Sastri, S. Srikanta. "*Development of Sanskrit Literature under Vijayanagara,*". <www.srikanta-sastri.org>
17. *Vedabhāṣyabhūmikāsaṃgrahaḥ* (San.) ; Sāyaṇācāryaḥ ; Baladeva Upādhyāyaḥ (Ed.) ; Kāśī Saṃskṛta Granthamālā 102 ; Caukhāmbā Saṃskṛta Series Office ; Varanasi ; 1958 (2nd Edition)
18. *Śrīmadbhagavadgītāṣyam* (San.) (Khaṇḍaḥ 1) ; Śrīśaṅkarācāryaḥ ; Shri Mani Dravid Shastri (Ed.) ; Sri Dakshinamurthy prakashana ; Varanasi ; 2015
19. .__, __ ; (Khaṇḍaḥ 2) ; Shri Mani Dravid Shastri (Ed.) ; Sri Dakshinamurthy prakashana ; Varanasi ; 2015
20. *Upaniṣadbhāṣyam*. (San.) (Khaṇḍaḥ 1) ; Śrīśaṅkarācāryaḥ ; S.

Subrahmanya Sastri (Ed.) ; Sri Dakshinamurthy prakashana ; Varanasi ; 2018

21. __, __, (Khaṇḍaḥ 2) ; S. Subrahmanya Sastri (Ed.) ; Sri Dakshinamurthy prakashana ; Varanasi ; 2018
22. __, __, (Khaṇḍaḥ 3) ; S. Subrahmanya Sastri (Ed.) ; Sri Dakshinamurthy prakashana ; Varanasi ; 2018

<https ://advaitasharada.sringeri.net/> Advaitasāradā
<https ://vmlt.in/ncc/1 ?page=1> New Catalogus Catalogorum
<https ://archive.org/> Internet Archive
<https ://ndl.iitkgp.ac.in/> National Digital Library of India
<https ://www.namami.gov.in/> National Manuscript Mission
<http ://vedicheritage.gov.in/> Vaidic Heritage Portal
<https ://borilib.com/repository> Bori Online Library
<https ://www.worldcat.org/> World Catalogue
<https ://indcat.inflibnet.ac.in/index.php/search> Indian Catalogue

✳ ✳ ✳

# प्रपञ्चमिथ्यात्वानुमाने पक्षतावच्छेदकता


## स्वामी नित्ययोगानन्दः *



## Abstract

[अद्वैतसिद्धौ प्रपञ्चमिथ्यात्वानुमाने पक्षविशेषणानि कानि इत्येतत् प्रदर्श्यते। पक्षविशेषणावगमे विवक्षितसाध्यसिद्धिरवगम्यते। मिथ्यात्वसाधने हि प्रपञ्चस्य पक्षता ब्रह्मप्रमातिरिक्ताबाध्यत्वादिविशेषणत्रयवैशिष्ट्येन। प्रत्येकं विशेषणस्य निवेशः च बाधादि तत्तद्दोषवारणाय आवश्यकः। ततश्च प्रयुज्यमानानुमानेन पक्षे साध्यसिद्धिः निष्प्रतिबन्धा स्यात्। तत्रापि च प्राचीननव्यमतभेदेन क्वचिदेकस्य क्वचिच्च द्वयोः विशेषणयोर्निवेशः आवश्यकः इति प्रदर्श्यते।]


## ०. अवतारिका

प्रपञ्चमिथ्यात्वानुमाने विप्रतिपत्तिवाक्यमिदमुच्यते मधुसूदन-सरस्वतीपादैः – **“ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि न वा”** [अद्वैतसिद्धिः]। अत्र पक्षः “ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नम्”, साध्यन्तु “प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्”। पक्षविशेषणानि त्रीणि, ब्रह्मप्रमातिरिक्ताबाध्यत्वं, सत्त्वेन प्रतीत्यर्हत्वं, चिद्भिन्नत्वं च। पक्षता नाम— *“सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः, यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम्”* [तत्त्वचिन्तामणिः, पक्षतासिद्धान्तः]। अस्यायम् अर्थो बोद्धव्यः— “तथा च विशेषणताविशेषसम्बन्धेन समवायसम्बन्धावच्छिन्न-प्रतियोगिताकनिरुक्तसाध्यनिश्चयाभाववत्त्वम् अनुमितिजनकत्वं पक्षत्वम् इति फलितम्” [चिन्तामणिरहस्यम्]। पक्षत्वम् एव पक्षता। व्याप्ति-पक्षधर्मतयोरनुमित्यात्मकैककार्यानुकूलत्वमेव एककार्यत्वं सङ्गतिः। अत्रानुकूलत्वञ्च कारणतावच्छेदकसाधारणं प्रयोजकत्वम्। तस्मादाद्ये पक्षतावच्छेदकताविचारः कार्यः अनुमितिं प्रति पक्षतायाः मुख्यकारणत्वात्।

## १. पक्षविशेषणानि

साध्याभाववत्पक्षः बाधः। पक्षे यानि विशेषणानि तानि उभयसम्मतानीति नियमः। प्रपञ्चे मिथ्यात्वं साध्यते न तु ब्रह्मणि, अतः ब्रह्मव्यावृत्त्यर्थं “चिद्भिन्नम्” इति पक्षविशेषणम्, अलीके

---


* प्रशिक्षणकेन्द्रम्, बेलुरमठेषु

(तुच्छे/असति) न मिथ्यात्वम् इति बाधवारणाय “सत्त्वेन प्रतीत्यर्हम्” (सत्वेन प्रतीतियोग्यमित्यर्थः) इति पक्षविशेषणम्। ब्रह्मप्रमातिरिक्तत्वं व्यावहारिके प्रातिभासिके च अस्ति [न च “प्रमा” इत्यनेन तत्प्रकारकत्वमिति वाच्यं निर्विकल्पब्रह्मप्रमायाः निष्प्रकारकत्वात्। अत्र “विशेष्यावृत्ति-अप्रकारकत्वम्” “अबाधितज्ञानत्वम्” वा प्रमायाः लक्षणमिति ग्राह्यम्]। तत्र व्यावहारिकेण प्रातिभासिकस्य बाधिततत्वमस्ति, अबाध्यत्वं नास्ति। व्यावहारिकेण प्रपञ्चस्य अबाधिततत्वम् अस्ति। अतः प्रातिभासिके सिद्धसाधनवारणाय “ब्रह्मप्रमातिरिक्त-अबाध्यत्वे सति” इति। प्रातिभासिके मिथ्यात्वसाधने सिद्धसाधनदोषः। प्रातिभासिके तु “ब्रह्मप्रमातिरिक्तबाध्यत्वम्” अस्ति, न तु अबाध्यत्वम्। “ब्रह्मप्रमा”स्थले “ब्रह्मज्ञानम्” इति न वक्तव्यं यतो हि घटज्ञानमपि ब्रह्मविषयकज्ञानम् - “घटः अस्ति” इत्यत्र “अस्ति” इति ज्ञानं (सदंशविषयकम्) सद्विषयकम्। *“सर्वप्रत्ययवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते” – इति वार्तिककारः।* निर्विकल्पेन संसर्गानवगाहिशुद्धब्रह्म-ज्ञानमेवाज्ञानस्य निवर्तकं भवति। या प्रमा शुद्धब्रह्मविषयिका तज्ज्ञाने अज्ञाननिवृत्तिर्भवति। संसर्गविशिष्टज्ञानेन घटादिसविकल्पज्ञानेन अज्ञानस्य निवर्तनं न भवति। “ब्रह्मप्रमातिरिक्त-अबाध्यत्वम्” ब्रह्मणि अस्ति, तुच्छे अपि “ब्रह्मप्रमातिरिक्त-अबाध्यत्वम्” अस्ति यतो हि ब्रह्मप्रमया तुच्छस्य अभावनिश्चय न भवति, बाधः = अभावनिश्चयः। ब्रह्मप्रमयाऽपि ब्रह्म न बाध्यते, किन्तु ब्रह्मप्रमा स्वयमेव बाध्यते (शुद्धब्रह्मज्ञानेन)। ब्रह्मप्रमातिरिक्तेनापि ब्रह्म न बाध्यते। ब्रह्मप्रमातिरिक्तेन प्रातिभासिकं बाध्यते, अतः ब्रह्मप्रमातिरिक्त-अबाध्यत्वं प्रातिभासिके नास्ति। व्यावहारिके ब्रह्मप्रमातिरिक्त-अबाध्यत्वमस्ति। अतः तुच्छव्यावृत्यर्थं “सत्वेन प्रतीत्यर्हम्” इति विशेषणं देयम्।

अत्र सरस्वतीपादैरुच्यते— **अत्र च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः उद्देश्यत्वात् “पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति” मते शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतर-अबाध्यत्वं पक्षविशेषणम्।**

### २. द्विविधा अनुमितिः

अनुमितौ पक्षमुद्देश्यीकृत्य एव अनुमानं क्रियते। अयं पर्वतो वह्निमानित्यनुमानेन ‘अस्य पर्वतस्य सर्वांशे वह्निः’ इत्यपि अनुमितिज्ञानं स्यात्। वस्तुगत्या पर्वतस्य एकांशे एव वह्निः अनुमेयः न सर्वांशे। अत्र पक्षतावच्छेदकं पर्वतत्वम्। अतः पर्वतो वह्निमानिति कथने यत्र पक्षतावच्छेदकं पर्वतत्वमस्ति तत्र वह्निः साध्यते। किन्तु यदि

पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिर्भवति तदा *पक्षतावच्छेदकस्य समाने एकस्मिन् अधिकरणे साध्यवृत्तितया* भवति साध्यसिद्धिः । पक्षतावच्छेदकं पर्वतत्वम् । अतः यत्र पर्वतत्वं वर्तते तत्र वह्निः साध्यते । तत्साध्यः वह्निः पक्षतावच्छेदकसामानाधिकरण्येन साध्यस्य निश्चयः अनुमितिः, तदेकमनुमितिरुद्देश्यं भवति ।

द्विविधा भवति अनुमितिः – पक्षतावच्छेदकसामानाधिकरण्येन अनुमितिः, पक्षतावच्छेदकावच्छेदेन अनुमितिः च । "पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति" मते नव्यमते इत्यर्थः । "पर्वतो वह्निमान्", "पर्वतस्य सर्वांशः वह्निमान्" इत्याकारौ । पक्षतावच्छेदकसामानाधिकरण्येन साध्यः यत्र भासते, तत्र पक्षः पक्षतावच्छेदकसामानाधिकरण्येन पक्षतावच्छेदक-समानाधिकरण-साध्य-प्रतियोगिता(साध्यता)-सम्बन्धेन साध्ये वर्तते । यत्र अनुमितौ साध्यं पक्षतावच्छेदकसामानाधिकरण्येन भासते सा पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिः अनुमितिः– यथा "पर्वते एकांशस्य वह्निमत्त्वे सति पर्वतस्य सर्वांशः वह्निमान्" । यत्र तु पक्षः पक्षतावच्छेदक-व्यापकप्रतियोगितासम्बन्धेन साध्ये भासते तत्र पक्षतावच्छेदक-व्यापकवह्निर्भवति अनुमितौ साध्यः, सा अनुमितिर्भवति पक्षतावच्छेदकावच्छेदेन अनुमितिः साध्यसिद्धिर्भवति । तत्र *सर्वस्मिन्नेव पक्षे साध्यवृत्तितया* भवति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिः । यस्याम् अनुमितौ पक्षः पक्षतावच्छेदक-व्यापकप्रतियोगितासम्बन्धेन साध्ये भासते सा अनुमितिः पक्षतावच्छेदकावच्छेदेन अनुमितिः – यथा "पर्वतो वह्निमान्" । अनुमितिं प्रति सिद्धिः (साध्यनिश्चयः) प्रतिबन्धिका । "पर्वतो वह्निमान् धूमात्" इत्यनुमाने पर्वतो वह्निमान् इति साध्यनिश्चयः । संयोगेन पर्वतो वह्निमान् इति विवक्षितः । संयोगेन वह्निनिश्चयः अनुमितेः प्रतिबन्धकः । साध्यनिश्चये संशयाभावः भवति, अतः पक्षता नास्ति । किन्तु सिसाधयिषाविरहसहकृतसिद्ध्यभावरूपा पक्षता अस्ति । प्रतिबन्धकस्य वह्निनिश्चयस्य सत्त्वेऽपि यदि सिसाधयिषा अस्ति तर्हि अनुमित्सास्ति इत्यतः अनुमितिर्भवत्येव । सिसाधयिषायाः अभावे साध्यनिश्चयसत्त्वे अनुमितिर्न भवति साध्यनिश्चयस्य सिद्धेः प्रतिबन्धकत्वात् । किन्तु प्रतिबन्धकसत्त्वेऽपि यदि उत्तेजिका अस्ति (सिसाधयिषा) तदा *प्रतिबन्धक-समानकालीनकार्यजनकत्वम् उत्तेजकत्वम्* इति उत्तेजकस्य लक्षणम् । चन्द्रकान्तमणिसत्त्वेऽपि तत्समानकालीनदाहजनकत्वं सूर्यकान्तमणौ अस्तीति तस्य उत्तेजकत्वम् । *प्रतिबन्धकतावच्छेदकीभूत-*

*अभावप्रतियोगित्वम् उत्तेजकत्वम्* इति उत्तेजकस्य अपरं लक्षणम् । उत्तेजकाभावविशिष्टमणिर्भवति प्रतिबन्धकः, तत्र प्रतिबन्धकता उत्तेजकाभावविशिष्टे चन्द्रकान्तमणौ अस्ति । तस्मात् चन्द्रकान्तमणिः भवति प्रतिबन्धकः, प्रतिबन्धकतावच्छेदकः अस्ति उत्तेजकाभावः (सूर्यकान्तमणेः अभावः) यतो हि प्रतिबन्धकसत्त्वेऽपि यदि उत्तेजको भवेत्तदा प्रतिबन्धके प्रतिबन्धकत्वं न भवति – चन्द्रकान्तमणौ दाहप्रतिबन्धकता नास्ति उत्तेजकसत्त्वे । उत्तेजकस्य सूर्यकान्तमणेः अभावे एव चन्द्रकान्तमणेः प्रतिबन्धकत्वम् । सूर्यकान्तमण्यभावविशिष्टचन्द्रकान्तमणेः प्रतिबन्धकता । अतः प्रतिबन्धकतावच्छेदको भवति सूर्यकान्तमण्यभावः, तस्य प्रतियोगी भवति सूर्यकान्तमणिः । *प्रतिबन्धकतावच्छेदकीभूत-अभावप्रतियोगित्वम् सूर्यकान्तमणौ ।* तत्र सिसाधयिषासत्त्वे सिद्धिसत्त्वेऽपि अनुमितिर्जायते सिसाधयिषायाः उत्तेजकत्वात् ।

अनुमितिं प्रति प्रतिबन्धकः साध्यनिश्चयः । पक्षतावच्छेदक-सामानाधिकरण्येन अनुमितिं प्रति पक्षतावच्छेदकसामानाधिकरण्येन साध्यनिश्चयः प्रतिबन्धकः । "अयं पर्वतो वह्निमान्" इत्यनेन "पर्वतस्य एकांशः वह्निमान्" इति यदि निश्चयः अस्ति तदा "पर्वतस्य सर्वांशः वह्निमान्" इति अनुमितेरपि प्रतिबन्धकः भवति । किन्तु पक्षतावच्छेदकावच्छिन्न-अनुमितिं प्रति "अयं पर्वतो वह्निमान्" इत्यनेन यदि "पर्वतस्य एकांशः वह्निमान्" इति निश्चयः अस्ति तदा "अयं पर्वतो वह्निमान्" इति अनुमितिं प्रति प्रतिबन्धकः न भवति पर्वतस्य एकांशे वह्निनिश्चयसत्त्वेऽपि पर्वतस्य अन्येषु अंशेषु वह्निनिश्चयस्य अभावात् । पक्षतावच्छेदकावच्छिन्ने अनुमितिं प्रति पक्षतावच्छेदकावच्छिन्ने साध्यनिश्चयः (सिद्धिः) प्रतिबन्धको भवति । किन्तु पक्षतावच्छेदकसामानाधिकरण्येन अनुमितिं प्रति सिद्धिमात्रस्य प्रतिबन्धकत्वम् (सिद्धिमात्रे = पक्षतावच्छेदकसामानाधिकरण्यस्य साध्ये निश्चयः), किन्तु सिसाधयिषासत्त्वे **नव्यानां मते "ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति" इति पक्षविशेषणम् ।**

प्रकृते तु प्रपञ्चस्य च मिथ्यात्वं साध्यते । प्रपञ्चत्वं व्यावहारिकेऽपि अस्ति, प्रातिभासिकेऽपि अस्ति । इदानीं यदि पक्षतावच्छेदकसामानाधिकरण्येन साध्यं सिध्यति प्रपञ्चत्ववति व्यावहारिके प्रपञ्चे मिथ्यात्वं साध्यते । किन्तु मिथ्यात्वं प्रातिभासिके (शुक्ति-रजते, स्वप्नदृश्ये) पूर्वमेव निश्चितं भवति । तस्मात् पक्षतावच्छेदकं भवति प्रपञ्चत्वम् । प्रपञ्चत्वसामानाधिकरण्येन प्रातिभासिके साध्यस्य

मिथ्यात्वनिश्चये सति प्रपञ्चत्वसामानाधिकरण्येन व्यावहारिके प्रपञ्चेऽपि अनुमितिर्न भवति इति एकं मतम् (नव्यमतम्) । अतः नव्यमतानुसारेण प्रातिभासिके मिथ्यात्वनिश्चये जाते प्रपञ्चत्वसामानाधिकरण्येन व्यावहारिकेपि मिथ्यात्वसाधने प्रतिबन्धकः भवति प्रातिभासिके साध्यनिश्चय इति सिद्धसाधनतादोषः । एतत्सिद्धसाधनतादोषवारणाय प्रातिभासिकव्यावृत्यर्थं "ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति" इति विशेषणमुक्तम् । तद्विशेषणदाने पक्षमध्ये प्रपञ्चे तस्य प्रातिभासिकस्य ग्रहणं न भवति, अतः सिद्धसाधनतादोषो अपि न भवति । तत्रोच्यते - पक्षैकदेशे प्रातिभासिके, साध्यसिद्धावपि सिद्धसाधनेति मते नव्यानां मते, शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतर (अत्र ज्ञानशब्दः प्रमापरः)- अबाध्यत्वं पक्षविशेषणम् (पक्षः = "ब्रह्मप्रमातिरिक्त-अबाध्यत्वे सति सत्वेन प्रतीत्यर्हं चिद्भिन्नम्" - चिद्भिन्नम् विशेष्यम्, तस्य ब्रह्मप्रमातिरिक्त-अबाध्यत्वम् एकं विशेषणम्, सत्वेन प्रतीत्यर्हत्वम् इति अपरं विशेषणम्) । प्रपञ्चत्वसामानाधिकरण्येन व्यावहारिके प्रपञ्चे मिथ्यात्वसिद्धिः अनुमितिः यदि उद्देश्या भवति तदा पक्षतावच्छेदकसामानाधिकरण्येन प्रातिभासिके प्रपञ्चे मिथ्यात्वनिश्चयः अस्ति एव, व्यावहारिकप्रपञ्चे साध्यनिश्चयं प्रति अयं निश्चयः प्रतिबन्धको भवति, पक्षतावच्छेदकसामानाधिकरण्येन साध्यनिश्चयः पक्षतावच्छेदकसामानाधिकरण्येन अनुमितिं प्रति अपि प्रतिबन्धकः - इति नव्यानां मतम् । "ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति" इति विशेषणप्रदाने पक्षमध्ये प्रातिभासिकस्य ग्रहणं न भवति, केवलं व्यावहारिकस्यैव ग्रहणं भवति । तदा व्यावहारिकस्य मिथ्यात्वसाधने सिद्धसाधनतादोषो न भवति । प्राचीनमते तु पक्षतावच्छेदकावच्छेदेन अनुमितेर्ग्रहणं भवति । तन्मते यदा पक्षे साध्यनिश्चयः तस्यामेव व्यक्तौ अनुमितिर्मास्तु, व्यक्त्यन्तरे तु अनुमितिर्भवति एव - यस्मिन् पर्वते एकांशे वह्निनिश्चयः जातः तस्मिन् पर्वते तदंशे अनुमितिं प्रति सः निश्चयः प्रतिबन्धकः भवतु, अन्यस्मिन् अंशे तु पर्वते "पर्वतो वह्निमान्" इति अनुमितिं प्रति एकांशो वह्निमान् इति निश्चयो न भवति अपरांशस्य प्रतिबन्धकः । तदा प्राचीनमते सिद्धसाधनतादोषः नास्ति एव अतः प्राचीनमते "ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति" इति विशेषणमनावश्यकमित्यतो वक्ष्यति– "यदि पुनः" इति । नव्यानां मते तु "ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति" इति विशेषणं सार्थकमित्यभिप्रायः ।

**"यदि पुनः पक्षतावच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्या, तदा एकदेशे साध्यसिद्धौ अपि सिद्धसाधनताभावात् तद्वारकं विशेषणमनुपादेयम् ।"**

### ३. प्राचीनानां मते केवलं विशेषणद्वयम्

एकदेशे साध्यसिद्धौ अपि सिद्धसाधनाभावात् = एकस्मिन् अंशे पर्वते “पर्वतो वह्निमान्” इति निश्चयसत्त्वेऽपि (सिद्धसाधनेऽपि) “पर्वतस्य सर्वांशः वह्निमान् न वा” इति संशयो भवति (प्रतिबन्धको न भवति अतः अनुमितिर्भवति एव) इति प्राचीनानां मतम् ।

तस्मात् पक्षतावच्छेदकसामानाधिकरण्येन साध्यनिश्चयः प्रतिबन्धकः न भवति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेः उद्देश्यत्वे अनुमितेः – सिद्धसाधनदोषः नास्ति । तदा तद्वारकं विशेषणमनुपादेयम् = “ब्रह्मप्रमातिरिक्त-अबाध्यत्वे सति” न उपादेयं न आवश्यकम् ।

### ४. इतरविशेषणद्वयम्

**“इतरविशेषणद्वयं तु तुच्छे ब्रह्मणि च बाधवारणाय आदरणीयम्”**- ब्रह्मतुच्छयोरबाध्यत्वं सिद्धम् । इदं विशेषणद्वयायोगे सति ब्रह्मतुच्छयोः बाधः स्यात् । अतः तुच्छे बाधवारणाय “सत्वेन प्रतीत्यर्हं” विशेषणम्, ब्रह्मणि बाधवारणाय “चिद्भिन्नम्” विशेषणम् इति विशेषणद्वयम् इतरविशेषणद्वयं प्राचीननव्योभयसम्मतम् ।

* * *

## Bibliography


1. *अद्वैतसिद्धिः*, (*कैलासविद्याप्रकाशिका-सत्यानन्दप्रबोधिकाव्याख्या- द्वयोपेता*) ; मधुसूदनसरस्वती ; स्वामिविशुद्धानन्दगिरिः (व्याख्याकारः सम्पादकश्च) ; स्वामिभोलानन्दविद्याभवनम् ; वाराणसी ; २००७
2. *अद्वैतसिद्धिः* ; (*बालबोधिन्याख्यया व्याख्ययोद्भासिता*) ; मधुसूदनसरस्वती ; योगेन्द्रनाथदेवशर्मा (व्याख्याकारः) ; तारा पब्लिकेशन्स ; वाराणसी ; १९७१


* * *

# पातञ्जलव्यासभाष्ययोगकारिकयोः तुलना

**भजहरिदासः** *

## Abstract

[योगसूत्राणां व्याख्यानपरेषु ग्रन्थेषु सुप्रसिद्धः मुख्यः भवति महर्षिव्यासेन विरचितं भाष्यम् । एतद्विहाय अन्ये योगकारिका इत्याद्याः ग्रन्थाः अपि सुप्रसिद्धाः । तदत्र व्यासभाष्यं योगकारिका इत्यनयोः टीकयोः तुलनात्मकम् आलोचनं विहितम् । योगसूत्रे पञ्चभूमयः वर्णिताः । किन्तु व्यासभाष्ये तासां विषये तथा विस्तरेण विवरणं न कृतम् । किन्तु योगकारिकायां तु एतद्विषये स्पष्टं विवृतं च व्याख्यानम् उपलभ्यते सदाऽस्थिरा भवेत् क्षिप्ता इत्यादिकारिकाभिः । एवं चित्तस्य बाह्यवस्तूपरागहेतुत्वादिविषये व्यासभाष्ये विस्तृतं विवरणं नोपलभ्यते । किन्तु योगकारिकायां अबाधितो ह्यर्थबोधः प्रमा...इत्यादिकारिकाभिः सुस्पष्टं विवरणं कृतम् । एवं बहुत्र व्यासभाष्ययोगकारकयोः भेदः परिलक्ष्यते । अत्र केचन तथा दिग्दर्शनार्थम् उपस्थापिताः । कुत्रचित् व्यासभाष्ये एव सम्यक् विवरणम् उपलभ्यते । कुत्रचित् योगकारिकायां विस्तरेण सरलभाषया वर्णनं कृतम् । अन्ततः एतद्वक्तुं शक्यते- योगकारिकया योगसूत्रस्य तत्त्वं स्पष्टतया अस्माभिः ज्ञातुं शक्यते इति ।]

महर्षिपतञ्जलिविरचितानां योगसूत्राणाम् आधारेण महर्षिभिः योगिभिः प्राचीनकालात् आरभ्य अर्वाचीनकालपर्यन्तं बहूनि टीकाभाष्याणि रचितानि । तन्मध्ये विशेषोल्लेखयोग्यानि महर्षिव्यासविरचितं व्यासभाष्यं, वाचस्पतिमिश्र-विरचिता तत्त्ववैशारदी, भोजराजकृतः राजमार्तण्डः, सदाशिवेन्द्रसरस्वती-कृतः योगसुधाकरः, नागेशकृता छायाव्याख्या, हरिहरानन्दारण्यककृता योगकारिका इत्यादीनि ।

वस्तुतस्तु योगकारिका व्यासभाष्यावलम्बनेन रचिता । ये नूतनच्छात्राः व्यासभाष्यावबोधने काठिन्यम् अनुभवन्ति तेषां कृते एषा योगकारिका उपकाराय भवति । बहुविधविषयाः महर्षिभिः व्यासैः सङ्केतरूपेण प्रदत्ताः, ते विषयाः योगिहरिहरानन्दारण्येन कारिकया अत्यन्तसरलरूपेण योगकारिकायां दत्ताः । उदारहणार्थं यथा योगसूत्रस्य आदिमं सूत्रम् 'अथ योगानुशासनम्' [योगसूत्रम् १.१] इति । सूत्रस्य व्याख्यानावसरे महर्षिव्यासेन चित्तस्य पञ्च भूमयः वर्णिताः । ताः च– क्षिप्तं मूढः विक्षिप्तम् एकाग्रं निरुद्धम् इति । किन्तु तासां भूमीनां विस्तरेण विवरणं न कृतम् । हरिहरानन्दमहोदयेन कारिकायां

* सहायकाचार्यः, हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य संस्कृतविभागे, bhajahari.das@rediffmail.com

स्पष्टतया अत्यन्तसरलरूपेण लिखितम् । यथा–

सदाऽस्थिरा भवेत् क्षिप्ता मूढा मोहवशा तथा ।
क्षिप्ताद् विशिष्टा विक्षिप्ता स्थैर्यास्थैर्यात्मिका हि सा ॥

[योगकारिका १.९]

चित्तस्य या अवस्था सदा अस्थिरा भवेत् सा क्षिप्ता ; मोहवशा मूढा ; क्षिप्तात् विशिष्टा या हि स्थैर्यास्थैर्यात्मिका सा विक्षिप्ता । एवम् एव एकाग्रा चित्तभूमिः, निरुद्धा चित्तभूमिः इति विषये एकादश्यां द्वादश्यां च कारिकायां स्पष्टरूपेण योगिभिः उक्तम् । यथा–

एकस्मिन्निष्ठ एवार्थे संसक्तं यत्र लीलया ।
एकाग्रा चित्तभूमिः सा सम्प्रज्ञानप्रसूर्मता ॥
संस्कारमात्रशेषा या प्रत्ययरहिता सदा ।
सा निरुद्धा समाख्याता योगस्य मुख्यभूमिका ॥

[योगकारिका १.११-१२]

एवम् एव पातञ्जलयोगसूत्रस्य व्यासभाष्यस्य गूढतत्त्वानि योगिहरिहरानन्दारण्यैः कारिकया स्पष्टरूपेण प्रदत्तम् ।

पातञ्जलयोगसूत्रस्य द्वितीयं सूत्रं 'योगश्चित्तवृत्तिनिरोधः' [योगसूत्रम् १.२] इति । योगः नाम चित्तस्य पञ्चवृत्तीनां निरोधः । तर्हि अत्र अवधेयं चित्तवृत्तिः नाम का? महर्षिव्यासः कथयति "चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्"[१] इति । अर्थात् चित्तं प्रख्या प्रकाशः । प्रकाशशीलतत्वात्, प्रवृत्तिशीलत्वात्, स्थितिशीलत्वात् च सत्त्वं रजः तमः इति त्रिगुणात्मकम् । प्रख्यारूपं चित्तसत्त्वं रजस्तमोगुणाभ्यां संसृष्टत्वात् ऐश्वर्यविषयप्रियं भवति । तत्र एव चित्तं तमसा अनुविद्धम् अधर्माज्ञानावैराग्यानैश्वर्येषु आसक्तं भवति । चित्तवृत्तिविषये हरिहरानन्दारण्येन योगकारिकायां विस्तरेण उक्तम् । यथा–

अन्तःकरणधर्मा याः प्रख्यास्थितिप्रवृत्तयः ।
त्रैगुणास्तद्भवेच्चित्तं संस्कारप्रत्ययात्मकम् ॥
प्रख्यारूपं चित्तसत्त्वं सर्वविज्ञानलक्षणम् ।
लयोदयशीलावस्था तस्य वृत्तिरितीरिता ॥

[योगकारिका १.६-७]

प्रख्या बोधरूपा सात्त्विकी । प्रवृत्तिः चेष्टारूपा राजसी । स्थितिः संस्काररूपा तामसी । प्रख्यास्थितिप्रवृत्तयः त्रिगुणात्मकाः अन्तकरणस्य धर्माः ते चित्तं इत्यभिधीयते । चित्तं संस्कारप्रत्ययात्मकम् । संस्काराः

---

१ पातञ्जलव्यासभाष्यम् १.२

अपरिदृष्टाः स्थितिधर्माः । प्रत्ययः परिदृष्टः मनोभावः प्रख्या प्रवृत्तिस्वरूपा । क्रियाप्रधानायाः प्रवृत्तेरपि ज्ञानस्वरूपत्त्वात् तदपि प्रत्ययः । स्थितिः संस्कारस्वरूपा । अस्मिन् शास्त्रे ज्ञानावस्थामात्रमेव चित्तवृत्तिरूपेण परिभाषितम् । प्रख्यारूपचित्तसत्त्वं सर्वविधविज्ञानस्वरूपम् । तस्य विज्ञानस्य या लयोदयशीलावस्था सा चित्तवृत्तिः इत्युच्यते । अथवा खण्डशः या ज्ञानावस्था सा चित्तवृत्तिरिति ।

तर्हि इदानीं उच्यते वृत्तिः द्विविधा । क्लिष्टा अक्लिष्टा च । अविद्याद्या क्लेशमूला या वृत्तिः सा क्लिष्टा, विद्यापूर्वकं या क्लेशनिवृत्तिकारिणी चित्तप्रशान्तेः हेतुः सा अक्लिष्टा वृत्तिः । एषा वृत्तिः पञ्चप्रकारा । तदेव सूत्रकारेण उक्तं यत् 'प्रमाणविपर्ययविकल्पनिद्रास्मृतयः' [योगसूत्रम् १.६] इति । अत्र प्रमाणानि त्रीणि । 'प्रत्यक्षानुमानागमाः प्रमाणानि' [योगसूत्रम् १.७] इति योगसूत्रम् । प्रत्यक्षविषये महर्षिव्यासेन उक्तं यथा "इन्द्रियप्रणालिकया चित्तस्य बाह्यवस्तूपरागात्[२] तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणाप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम् ।"[३] अर्थात् इन्द्रियप्रणालीद्वारा चित्तस्य बाह्यवस्तूपरागहेतुः वाह्यविषया सामान्यविशेषात्मविषयोर्मध्ये विशेषावधारणा प्रधाना वृत्तिः प्रत्यक्षप्रमाणम् । अस्मिन् विषये योगिहरिहरानन्दारण्यकेन न्यायशास्त्रशैल्या कारिकायाम् उक्तम् । यथा-

अबाधितो ह्यर्थवोधः प्रमा तत्करणं मतम् ।
सद्भूतार्थं प्रमाणं हि मिथ्याज्ञानस्य बाधकम् ॥
विषयैश्चित्तसंयोगाद् बुद्धीन्द्रियप्रणालिकात् ।
प्रत्यक्षं साम्प्रतं ज्ञानं विशेषस्यावधारकम् ॥

[योगकारिका १.२१, २३]

अर्थात् अबाधितः अर्थबोधो हि प्रमा । तत्करणं प्रमाणम् । येन प्रमा साधिता तत् प्रमाणम् । प्रमाणं सद्भूतार्थकं यथार्थविषयकं मिथ्याज्ञानस्य बाधकमिति । ज्ञानेन्द्रियात् (चक्षुकर्णादिपञ्चकात्, मनसः अनुभवशक्तिः) प्रणालिकायाः चित्तसंयोगात् वर्तमानपदार्थविषयकं ज्ञानमुत्पन्नं भवति तत् प्रत्यक्षम् ।

प्रत्यक्षं साम्प्रतम्, अर्थात् वर्तमानकालीनज्ञानम् । प्रत्यक्षेण विशेषज्ञानस्य अवधारणा जाता । प्रत्येकपदार्थानां ये शब्दादयः गुणाः आकारादयगुणाश्च

---

[२] स्वव्यञ्जकं- स्वकारणं, अञ्जनं- यस्य आकारः । अर्थात् यस्य आकारः स्वकारणेन जायते ।

[३] पातञ्जलव्यासभाष्यम् १.७

इन्द्रियैः विज्ञायन्ते तद् विशेषज्ञानम् । प्रमाणविषये भोजराजेन उक्तम् अविसंवादि ज्ञानं प्रमाणमिति ।[४] तदनन्तरं साक्षात् व्यासभाष्यम् अवलम्ब्य प्रत्यक्षविषये उक्तम् ।

महर्षिव्यासेन अनुमानविषये उक्तम् "अनुमेयस्य तुल्यजातीयेषु अनुवृत्तो भिन्नजातीयेभ्यो व्यावृत्तः सम्बन्धो यः तद्विषया सामान्यावधारणा प्रमाणा वृत्तिरनुमानम् । यथा देशान्तरप्राप्तेः गतिमच्चन्द्रतारकं चैत्रवत्, विन्ध्यश्चाप्राप्तिरगतिः ।"[५] अर्थात् अनुमेयस्य तुल्यजातीयेषु वस्तुषु अनुवृत्तः भिन्नजातीयेभ्यः वस्तुभ्यः व्यावृत्तः सम्बन्धः यद्विषया सामान्या अवधारणा प्रधाना वृत्तिः अनुमानम् । देशान्तरप्राप्तिहेतुः चन्द्रतारकाग्रहगणाः गतिमान्, यथा चैत्रवत् इति । विन्ध्याचलस्य देशान्तरप्राप्तिः नैव भवति अतः सः अगतिमान् । अनुमानप्रमाणविषये योगिहरिहरानन्दारण्यकेन उक्तं यथा–

असहभावसम्बन्धं ज्ञात्वा च सहभावकम् ।
हेतुः पुर्वानुमानं या सामान्यार्थविनिश्चितिः ॥

[योगकारिका १.२४]

सहभावासहभावः[६] सम्बन्धज्ञानान्तरं हेतुपूर्वकं हेतुमतः पदार्थस्य निश्चयज्ञानमेव अनुमानम् । शब्दार्थज्ञानेन एतेन त्रयेण ज्ञानं जायते अतः अनुमानेन आगमेन सत्तामात्रं सामान्यज्ञानं भवति । यतो हि शब्दाः सामान्यार्थेषु सङ्केतीकृताः । यथा धूमं पश्यन् अग्नेः निश्चयज्ञानं भवति । अत्र अग्निज्ञानं सामान्यरूपेण जायते न तु विशेषरूपण । सामान्यरूपस्यार्थः साधारणं न तु विशेषः ।

आप्तप्रमाणं विषये महर्षिव्यासेन उक्तं यथा "आप्तेन दृष्टोऽनुमितो वार्थः परत्र स्वबोधसङ्क्रान्तये शब्देनोपदिश्यते, शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः । यस्याऽश्रद्धेयार्थो वक्ता न दृष्टानुमितार्थः स आगमः प्लवते, मूलवक्तरि तृ दृष्टानुमितार्थे निर्विप्लवः स्यात् ।"[७] आप्तपुरुषेण दृष्टः अनुमितः अर्थः अपरव्यक्तिं प्रति स्वबोधसङ्क्रान्तिहेतुः स्वज्ञानेन शब्देन उपदिश्यते । एतस्मात् कारणात् उपदेशात् अर्थविषया या वृत्तिः सा श्रोत्रा आगमप्रमाणम् ।

---

४ राजमार्तण्डवृत्तिः १.७

५ पातञ्जलव्यासभाष्यम् १.७

६ सहभावः असहभावः द्विविधः सम्बन्धः भवतीति । सहभावसम्बन्धः यथा अग्निः अस्ति तापः अस्ति, अग्निः नास्ति तापोऽपि नास्ति । असहभावसम्बन्धः यथा अग्निः अस्ति शैत्यं नास्ति, अग्निः नास्ति शैत्यम् अस्तीति ।

७ पातञ्जलव्यासभाष्यम् १.७

यस्य आगमस्य वक्ता अश्रद्धेयार्थः वञ्चकपुरुषः तस्य अर्थः न दृष्टः न अनुमितः, सः मिथ्यागमः । तत् न आगमप्रमाणम् । यः विषयः मूलवक्तुः दृष्टानुमितः तद्विषयः आगमः निर्विप्लवः सत्यं स्यात् । अस्मिन् विषये कारिकायां हरिहरानन्दारण्यकेन उक्तं यथा–

आप्तोक्तशब्दशक्त्या यः श्रोतुस्तदर्थनिश्चयः ।
प्रमाणमागमः स स्याद् यः सिद्धेदविचारतः ॥

[योगकारिका १.२५]

अर्थात् आप्तवक्त्रा कथितस्य शब्दस्य वाक्यस्य वा श्रवणेन श्रोतुः अविचारपूर्वकं वाक्यार्थानां निश्चयज्ञानं स्यात्, तद् आगमप्रमाणम् । यः वक्ता शक्तिविशेषेण अन्यवक्तॄणां विचारतः अविचारसिद्धः स्यात् सः व्यक्तिः आप्तपुरुषः । एवमेव प्रमाणविषये महर्षिव्यासेन, हरिहरानन्दारण्यकेन च स्वमतं प्रकटितम् ।

विपर्ययवृत्तिविषये महर्षिपतञ्जलिः कथयति– 'विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठानम् ॥' [योगसूत्रम् १.८]

विपर्ययः अतद्रूपप्रतिष्ठं मिथ्याज्ञानम् । वास्तवज्ञेयविषयात् भिन्नः अन्यज्ञेयविषयः अतद्रूपप्रतिष्ठः । अस्मिन् विषये महर्षिव्यासेन उक्तं "यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात् प्रमाणस्य । तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टं तद्यथा द्विचन्द्रदर्शनं सद्विषयेणैकचन्द्रदर्शनेन बाध्यत इति ।" प्रमाणस्य विषयः यथाभूतः, किन्तु विपर्ययस्य विषयः अयथाभूतः । प्रमाणस्य भूतार्थविषयः प्रमाणेन बाध्यते तदेव विपर्ययज्ञानम् । तत्र प्रमाणेन अप्रमाणस्य बाधः दृश्यते । यथा द्विचन्द्रदर्शनं सद्विषयेण एकचन्द्रदर्शनेन बाध्यत इति । अत्र द्विचन्द्रदर्शनं विपर्ययवृत्तिः । हरिहरानन्देन कारिकायां उक्तं यथा-

यद्वस्तुस्वरूपं तस्मात् भिन्नरूपस्य तत्र या ।
ख्यातिर्विपर्ययो वृत्तिर्मिथ्याज्ञानस्वरूपिका ॥

[योगकारिका १.२६]

कस्यचित् वस्तुनः यत् स्वरूपं तस्मात् स्वरूपात् भिन्नरूपस्य ज्ञानमेव विपर्ययः । तस्मिन् वस्तुनि या ख्यातिः सः विपर्ययः नाम मिथ्याज्ञानस्वरूपिका वृत्तिः । अत्र मिथ्याज्ञानं इत्युक्ते विपरीतज्ञानं, न तु ज्ञानाभावः इति । उदाहरणार्थं यथा रज्जौ सर्पज्ञानम् । एकस्मिन् वस्तुनि रज्जौ रज्जुभिन्नस्य सर्पस्य ज्ञानं विपर्ययः । रज्जौ या सर्पख्यातिः सा मिथ्याज्ञानस्वरूपिका वृत्तिः ।

विकल्पवृत्तिविषये योगसूत्रे महर्षिः पतञ्जलिः कथयति– ‘शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ।’ [योगसूत्रम् १.९]

विकल्पवृत्तिः शब्दज्ञानानुपाती वस्तुशून्यः[८] । शब्दस्य पदस्य अर्थमात्रः विषयः व्यवहारः लोके दृश्यते किन्तु सः वास्तविकरूपेण वस्तुशून्यः । महर्षिव्यासेन उक्तं “वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबन्धनो व्यवहारः दृश्यते, तद्यथा चैतन्यं पुरुषस्य स्वरूपमिति । यदा चितिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते, भवति च व्यपदेशे वृत्तिर्यथा चैत्रस्य गौरिति । तथा प्रतिषिद्धवस्तुधर्मो निष्क्रियः पुरुषः ।”[९] वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यः निबन्धनविकल्पः व्यवहारः लोके दृश्यते । यथा चैतन्यः पुरुषस्य स्वरूपम् । यत्र चितिशक्तिरेव पुरुषः तदा विशेष्यपदवाच्यः चैतन्यः किमर्थं विशेषितः । विशेष्यविशेषेण वाक्यवृत्तिर्जायते चैत्रस्य गौरिति । अत्र चैतन्यः पुरुषस्य स्वरूपं व्यवहारः अनावश्यकम् । अस्मिन् विषये हरिहरानन्दारण्यकेन उक्तम् । यथा-

अवस्तुवाचकात् शब्दात् प्रत्ययो बुद्धिनिर्मितः ।
यावद् भाषानुगा चिन्ता व्यवहार्यो विकल्पकः ॥

[योगकारिका १.२७]

अवस्तुवाचकं शब्दं श्रूत्वा या बुद्धिर्निर्मिता, यावद् भाषानुगा चिन्ता तावद् व्यवहार्यः प्रत्ययो जायते सः विकल्पः । विपर्ययज्ञानस्य व्यवहार्यता नास्ति । प्रमाणेन यथार्थज्ञानेन विपर्ययज्ञानम् अपसरति, किन्तु विकल्पः तथा नास्ति । यथा अभावः, अनन्तः, राहोः शिरः, चैतन्यं पुरुषस्य स्वरूपमित्यादयः । अभाव इति पदस्य यद् ज्ञानं तद् विकल्पस्य उदाहरणम् । यः चैतन्यः सः पुरुषः, यः राहुः सः शिरः । तथापि तेषां भिन्नभाषानुसारेण वक्तव्यमिति विकल्पः । दिक् कालः अपि वैकल्पिकः पदार्थः । एतेषां अवस्तुवाचकशब्देन व्यवहारः दृश्यते ।

निद्रावृत्तिविषये महर्षिपतञ्जलिः योगसूत्रे कथयति– ‘अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।’ [योगसूत्रम् १.१०]

मनुष्याणां तिस्रः अवस्थाः । जाग्रदवस्था स्वप्नावस्था सुषुप्त्यवस्था चेति । निद्रावृत्तिविषये व्यासभाष्ये उक्तमस्ति यथा “सा च सम्प्रबोधे

---

८ भोजराजेन राजमार्तण्डवृत्तौ उक्तं शब्दजनितज्ञानं शब्दज्ञानम् । तदनुपतितं शीलं यस्य सः शब्दज्ञानानुपाती । शब्देन यत् ज्ञानमुत्पद्यते सः शब्दज्ञानानुपाती । एतत् ज्ञानं वास्तविकरूपेण न विद्यते अतः वस्तुशून्यः ।

९ पातञ्जलव्यासभाष्यम् १.९

प्रत्यवमर्शात् प्रत्ययविशेषः । कथं सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदी करोति... सा च सामाधावितरप्रत्ययवन्निरोद्धव्येति ।”[१०] जाग्रत्स्वप्नयोः जडताविशेषस्य अभावप्रत्ययस्य हेतुभूतालम्बना[११] वृत्तिः निद्रा । जागरितमनुष्याणां स्मरणं भवति, अतः निद्रा प्रत्ययविशेषः । यथा अहं सुखेन अस्वाप्स्वम्, मे मनः प्रसन्नं जातम्, मे प्रज्ञा स्वच्छा जाता । अथवा अहं कष्टेन अस्वाप्स्वम्, मे मनसः जाड्यम् आगतम्, अनवस्थात् भ्रमति । अन्यच्च गाढरूपेण मुग्धभावेन अहं निद्राम् आसं, मे गात्राणि गुरूणि जातानि, मे चित्तमलसं क्लान्तं अपहरणमिव तिष्ठतीति । यदि निद्राकाले प्रत्ययानुभवः(प्रत्यवमर्शः) न स्यात् तर्हि जागरितकालेऽपि प्रत्यवमर्शः न स्यात् । तदाश्रिताः स्मृतयश्च तद्विषया न स्युः । तस्मात् कारणात् निद्रा प्रत्ययविशेषः । सा च समाधिकाले इतरप्रत्ययवत् निरोद्धव्येति ।

अस्मिन् विषये स्वकारिकायां योगिहरिहरानन्दारण्यकेन उक्तं यथा–

कारणं यत्तमोरूपमभावे स्वप्नजाग्रतोः ।
तज्जाड्यावलम्बनो निद्रा प्रत्ययस्तामसो मता ॥

[योगकारिका १.२८]

स्वप्नजाग्रतोः अवस्थयोरभावे कारणं यत् तमोरूपं जडताविशेषः, तज्जडताविषयः तामसः प्रत्ययः निद्रावृत्तिः । जाग्रदवस्थायां स्वप्नावस्थायां च प्रमाणादिवृत्तिः तिष्ठति । स्वप्नहीननिद्रावस्थायां शरीरेन्द्रियचित्तानि जडत्वं प्राप्नोति । सुखमहं अस्वाप्स्वम् इत्यादि स्मृत्यनुभवात् निद्रा प्रत्ययविशेषः । तस्या विषयः चित्तेन्द्रियदेहानां जडावस्थाविशेषः । जाग्रदवस्था सात्त्विकी, स्वप्नावस्था राजसिकी, सुषुप्त्यवस्था तामसिकी भवति । सुषुप्त्यवस्था एव हि निद्रावृत्तिः प्रत्ययः । सा तमःप्रधाना इतरवृत्तिवत् त्रिगुणात्मिका । तदेव उक्तमस्ति “या सन्ततम् उद्रिक्तत्वात्[१२] तमसः समस्तविषयपरित्यागेन प्रवर्तते वृत्तिः सा निद्रा ।”[१३] अर्थात् या वृत्तिः विस्तृतरूपेण तमोगुणस्य अधिकताकारणात् समस्तविषयपरित्यागेन प्रवर्तते सा निद्रावृत्तिरिति ।

स्मृतिविषये महर्षिपतञ्जलिना उक्तम्– ‘अनुभूतविषयासम्प्रमोषः स्मृतिः ।’ [योगसूत्रम् १.११]

अनुभूतविषयस्य असम्प्रमोषः अर्थात् तदनुरूपः आकारयुक्तवृत्तिः

---

[१०] पातञ्जलव्यासभाष्यम् १.१०

[११] आलम्बनं आश्रयस्थानम् । अभावप्रत्ययः आलम्बनं यस्याः सा तथोक्ता (निद्रावृत्तिः) । राजमार्तण्डवृत्तिः ।

[१२] अधिकताकारणात्

[१३] राजमार्तण्डवृत्तिः १.१०

स्मृतिः। असम्प्रमोषः इत्युक्ते निजस्वरूपमात्रग्रहणम्। स्मृतौ पूर्वानुभूत-विषयस्य पुनरनुभूतिर्भवति। पूर्वाननुभूतविषयस्य ग्रहणपूर्वकं स्मृतिः नैव भवति। महर्षिव्यासदेवेन उक्तं "किं प्रत्ययस्य चित्तं स्मरति आहोस्वित् विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारः निर्भासस्तथाजातीकं संस्कारमारभते। स संस्कारः स्वव्यञ्जकाञ्जनः[१४] तदाकारमेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तत्र ग्रहणकारपूर्वा बुद्धिर्ग्राह्याकारपूर्वा स्मृतिः। सा च द्वयी भावितस्मर्तव्या चाऽभावितस्मर्तव्या च। स्वप्ने भावितस्मर्तव्या, जाग्रत्समये त्वभावितस्मर्तव्येति।"[१५] चित्तं किं पूर्वानुभवप्रत्ययं स्मरति आहोस्वित् विषयम्। ग्राह्योपरक्तप्रत्ययस्य ग्राह्यग्रहणयोः उभयाकारयोः स्वरूपं प्रकाशितम्। तेन तज्जातीकः संस्कारः उत्पन्नः भवति। सः संस्कारः स्वव्यञ्जकेन[१६] प्रेरितः। तद् स्वकारणाकारः ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति। तयोः बुद्धिः ग्रहणाकारपूर्वा, स्मृतिः ग्राह्याकारपूर्वा। सा स्मृतिः द्विविधा भावितस्मर्तव्या अभावितस्मर्तव्या च। स्वप्ने भावितस्मर्तव्या,[१७] जाग्रत्समये अभावितस्मर्तव्या जायत इति। अस्मिन् विषये हरिहरानन्दारण्यकेन उक्तम्–

विषयस्यानुभूतस्य या पुनरनुभूतता।
सतः संस्कारभूतेन सा सर्वविषया स्मृतिः॥

[योगकारिका १.२९]

अनुभूतविषयाणां संस्कारभूतत्वात् चित्ते संस्कारः तिष्ठति। तस्य संस्कारस्य पुनः अनुभूतिः एव स्मृतिः। स्मृतिः सर्वविषया, प्रमाणविपर्ययविकल्पनिद्रास्मृतिभिः यद् विषयीकृतं तद् सर्वं स्मृतिः विषयीकरोति इति। इतोऽपि तेन व्यासभाष्यस्य आलोचना प्रसङ्गे वङ्गीयटीकायां उक्तम्। यथा समस्तानुभवे ग्राह्यग्रहणं विद्यते। उभयोरपि संस्कारस्वरूपः। अतः उभाभ्यां प्रत्ययज्ञानं जायते। तन्मध्ये ग्राह्यसंस्कारजनितं प्रत्ययज्ञानं स्मृतिः अपरस्य ग्रहणसंस्कारजनितं प्रत्ययज्ञानं मानसक्रिया, ज्ञातुं (ज्ञानलाभार्थं) शक्तिः। ज्ञातुं शक्तेः या मानसक्रिया सा

---

[१४] स्वव्यञ्जकं- स्वकारणं, अञ्जनं- यस्य आकारः। अर्थात् यस्य आकारः स्वकारणेन जायते।

[१५] पातञ्जलव्यासभाष्यम् १.११

[१६] उपलक्षणादिद्वारा

[१७] कल्पितप्रत्ययानुगतविषयस्य स्मरणकारिणी भावितस्मर्तव्या। यथा अहं राजा अस्मिन् प्रत्यये प्रासादः सिंहासनादि स्वप्नगतेस्मृतेः स्मर्तव्यः। जाग्रत्काले अनुद्भावितप्रत्ययस्य स्मृतिर्जायते।

सम्पूर्णा न पूर्ववत् । सा क्रिया प्रत्ययज्ञानं, तदेव प्रमाणम् ।

एवमेव पातञ्जलव्यासभाष्ययोगकारिकयोः तुलना मया कृता । कुत्रापि योगसूत्रस्य व्याख्या व्यासभाष्ये सम्यगस्ति । कुत्रापि विस्तरेण सरलतया योगकारिकायां वर्णनमस्ति । सर्वोपरि योगकारिकया योगसूत्रस्य तत्त्वं स्पष्टतया अस्माभिः ज्ञातुं शक्यत इति ।

✶✶✶

## Bibliography


1. *पातञ्जल योगदर्शन* (*व्यासभाष्योपेतम्, हिन्द्यनुवादसहितम्*) ; पतञ्जलिः ; स्वामी हरिहरानन्दारण्यः (व्याख्याकारः) ; डा. रामशङ्करभट्टाचार्यः (सम्पादकः) ; मोतीलाल बनारसीदास ; वाराणसी ; २०१०
2. *पातञ्जल-योगदर्शनम्* (*तत्त्ववैशारदीसंवलित-व्यासभाष्यसमेतम्*) ; पतञ्जलिः ; डा. रामशङ्करभट्टाचार्यः (सम्पादकः) ; भारतीय-विद्या-प्रकाशन ; वाराणसी ; २००१
3. *पातञ्जलयोगदर्शनम्* (*व्यासभाष्यसंवलितम्, योगसिद्धि-हिन्दी- व्याख्योपेतम्*) ; पतञ्जलिः ; सुरेशचन्द्र-श्रीवास्तव्य-शास्त्री (व्याख्याकारः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २००२
4. *पातञ्जलयोगसूत्रम्* (*भोजदेवकृतराजमार्तण्डवृत्तिसमेतम्*) ; पतञ्जलिः ; डा. रामशङ्करभट्टाचार्यः (सम्पादकः) ; भारतीय-विद्या-प्रकाशन ; वाराणसी ; १९०७


✳ ✳ ✳

# विशिष्टाः खलु समासान्ताः

डॉ.गोपीकृष्णन् रघुः *

## Abstract

[अच्, टच्, डच्, षच्, असिच्, अनिच्, इच्, कप्, अप्, ष, अ इत्येते एकादशप्रत्ययाः समासान्ताः इति नाम्ना व्यवह्रियन्ते । 'समासान्ताः' इति पञ्चमाध्यायस्य चतुर्थपादस्य अष्टषष्टितमं सूत्रम् । इदं सूत्रमधिकारसूत्रम् । अस्य सूत्रस्याधिकारः पञ्चमाध्यायसमाप्तिपर्यन्तं गच्छति । अस्मिन् अधिकारे ये प्रत्यया विधीयन्ते ते समासान्ता इत्युच्यते । सर्वे समासान्तप्रत्ययाः तद्धितप्रत्ययाः सन्ति । परन्तु तेषां प्रयोगः समासप्रक्रियां विहाय अन्यत्र न भवति । एतेषां विषये महाविभाषा अपि न प्रयुज्यते । समासान्तो नाम समासस्य अन्तावयवः । यत्र समासान्तप्रत्यया विहितास्तत्र प्रत्ययविधानादनन्तरमेव समासः सम्पूर्णो भवति । अस्मिन् प्रबन्धे समासान्तप्रत्ययानां समाससंज्ञायां तद्धितसंज्ञायां च किं प्रयोजनं, समासान्तप्रत्ययानां कदा प्रवृत्तिः, समासान्तस्य उत्तरपदावयवत्वं वा समासावयत्वं वा, समासान्तप्रत्ययः उत्तरपदसुब्विभक्तेः पूर्वं वा परं वा, ङ्याप्प्रातिपदिकात् इति सूत्रेण सह समासान्तस्य सम्बन्धः अस्ति न वेति विषयाः अत्र सारल्येन समुपस्थापिताः ।]

**कुञ्चीशब्दाः-** समासान्ताः, समासः, तद्धितः, उत्तरपदं, समासावयवः, अव्ययीभावः, तत्पुरुषः, द्वन्द्वः, बहुव्रीहिः

## ०. भूमिका

अच्, टच्, डच्, षच्, असिच्, अनिच्, इच्, कप्, अप्, ष, अ इत्येते एकादशप्रत्ययाः समासान्ताः इति नाम्ना व्यवह्रियन्ते । 'समासान्ताः' इति पञ्चमाध्यायस्य चतुर्थपादस्य अष्टषष्टितमं सूत्रम् । इदं सूत्रमधिकारसूत्रम् । अस्य सूत्रस्याधिकारः पञ्चमाध्यायसमाप्तिपर्यन्तं गच्छति । अस्मिन् अधिकारे ये प्रत्यया विधीयन्ते ते समासान्ता इत्युच्यते । सर्वे समासान्तप्रत्ययाः तद्धितप्रत्ययाः सन्ति । परन्तु तेषां प्रयोगः समासप्रक्रियां विहाय अन्यत्र न भवति । एतेषां विषये महाविभाषा अपि न प्रयुज्यते । समासान्तो नाम समासस्य अन्तावयवः । यत्र समासान्तप्रत्यया विहितास्तत्र प्रत्ययविधानादनन्तरमेव समासः सम्पूर्णो भवति ।

अस्मिन् प्रबन्धे समासान्तप्रत्ययानां समाससंज्ञायां तद्धितसंज्ञायां च किं प्रयोजनं, समासान्तप्रत्ययानां कदा प्रवृत्तिः, समासान्तस्य उत्तरपदावयवत्वं

* सहायकाचार्यः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थाने

वा समासावयत्वं वा, समासान्तप्रत्ययः उत्तरपदसुब्विभक्तेः पूर्वं वा परं वा, ङ्याप्प्रातिपदिकात् इति सूत्रेण सह समासान्तस्य सम्बन्धः अस्ति न वेति विषयाः अत्र सारल्येन समुपस्थापिताः ।

## १. समासान्तप्रत्ययानां संज्ञाद्वयप्रयोजनम्

समासान्तप्रत्ययानां समाससंज्ञा तद्धितसंज्ञा वर्तते । एतेन संज्ञाद्वयेन किं सिद्ध्यतीत्यत्र विचार्यते ।

### १.१. समाससंज्ञा

महाभाष्ये समासान्तप्रत्ययानां समाससंज्ञायां प्रयोजनानि प्रतिपादितानि । तथाहि तत्रस्थं वार्तिकं – 'प्रयोजनमव्ययीभावद्विगु-द्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः'[१] इति । एतस्य वार्तिकस्यार्थस्तावत् अव्ययीभावः, द्विगुः, द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः चेति संज्ञाः यथा स्युस्तदर्थम् अन्तग्रहणं कर्तव्यम् । अव्ययीभावसमासे समासान्तप्रयुक्तमदन्तत्वमाश्रित्य 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' [अष्टाध्यायी २.४.८३] इति सूत्रप्रयुक्तामादेशो जायते । टजादयः प्रत्ययाः यदि समासात् बहिर्भूताः स्युः तर्हि शरदः समीपम् इति विग्रहे उप शरद् इति स्थिते 'अव्यवीभावे शरत्प्रभृतिभ्यः' [अष्टाध्यायी ५.४.१०७] इति सूत्रेण टच्प्रत्यये अनुबन्धलोपे उप शरद् अ इति स्थिते समासान्तप्रत्ययस्य टचः समासबहिर्भूतत्वात् उप शरद् इत्यंशस्यैव समाससंज्ञा स्यात् । तस्य च अदन्तत्वाभावात् 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' [अष्टाध्यायी २.४.८३] इति सूत्रेण सोरमादेशो न स्यात् । तथा च उपशरदम् इति रूपं न स्यात् । टचः समासावयवत्वे स्वीकृते उप शरद् अ इति समुदायस्यैव अव्ययीभावसमासः सिध्यति । तेन अकारान्तत्वात् ततः परं विहितस्य सोरमादेशे उपशरदमिति रूपं सिध्यति ।

एवमेव द्विगुसमासे द्विधुरी, त्रिधुरी इत्यादिषु 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति वार्तिकस्य प्राप्तिः, द्वन्द्वसमासे कोशश्च निषच्च कोशनिषदम्– कोशनिषदिनी इत्यत्र 'द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः' [अष्टाध्यायी ५.२.१२८] इति सूत्रेण इनिप्रत्ययः, तत्पुरुषसमासे निर्धुरः इत्यादौ प्रकृतिस्वरः, बहुव्रीहिसमासे च उच्चधुरः, नीचधुरः इत्यादौ 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' [अष्टाध्यायी ६.२.१] इति सूत्रेण पूर्वपदप्रकृतिस्वरः च यथा स्युः तदर्थमपि समाससंज्ञा कर्तव्या ।

१ भार्गवशास्त्रिजोशिसंशोधिते व्याकरणमहाभाष्ये चतुर्थे खण्डे ४१५-पृष्ठे ।

ननु द्विगुसमासे द्विधुरी, त्रिधुरी इत्यादौ उत्तरपदस्य अकारान्तत्वाभावात् कथम् अकारान्तोत्तरपदत्वप्रयुक्तं स्त्रीत्वमिति चेन्नागेशेन उच्यते उद्योते– "लिङ्गस्य लोकाश्रयत्वेनादोषात्। लिङ्गप्रकरणं ह्युदाहरणमात्रं, न नियम इति बोध्यम्। अत एव द्विनावम् अर्धखारम् इत्यादौ परवल्लिङ्गशास्त्रसत्त्वेऽपि नपुंसकत्वं दृश्यते"[२] इति। केषाञ्चिन्मते द्विधुरीत्याद्युदाहरणेषु वाचनिकस्त्रीत्वाभावेऽपि धूःशब्दस्य स्वाभाविक-स्त्रीत्वात् परवल्लिङ्गताप्राप्तिरिति। परन्तु तन्न युज्यते, तस्य 'स नपुंसकम्' [अष्टाध्यायी २.४.१७] इति सूत्रेण बाधात्।

### १.२. तद्धितसंज्ञा

सर्वे समासान्तप्रत्ययाः तद्धितप्रत्ययाः अपि सन्ति। तद्धितप्रत्ययस्य यानि विशिष्टानि कार्याणि तानि कारयितुम् एतेषाम् तद्धितसंज्ञा भवति। यथा 'नस्तद्धिते' [अष्टाध्यायी ६.४.१४४] इति टिलोपः, 'तद्धितस्य' [अष्टाध्यायी ६.४.१४४] इति स्वरविधानम् इत्यादयः। मद्रराजः इत्युदाहरणम्। तथाहि- 'मद्राणाम् राजा' इत्यत्र 'षष्ठी' [अष्टाध्यायी २.२.८] इति षष्ठीतत्पुरुषसमासे 'राजाहस्सखिभ्यष्टच्' [अष्टाध्यायी ५.४.९१] इति 'टच्' प्रत्ययः। अयम् समासान्तप्रत्ययः अस्ति इत्यतः तस्य तद्धितसंज्ञा अपि अस्ति। तेन मद्र राजन् अ इति स्थिते 'नस्तद्धिते' [अष्टाध्यायी ६.४.१४४] इति टिलोपे मद्रराज इति रूपं भवति। अन्यथा नलोपः न स्यात्।

पुनः एते प्रत्ययाः प्रातिपदिकात् विधीयन्ते, एतेषाम् योजनेन चापि प्रातिपदिकमेव सिद्ध्यति, अतः एतेषाम् 'तद्धित' इत्येव संज्ञा समीचीना।

## २. समासान्तप्रत्ययविधानम्

### २.१. समाससंज्ञासमकालविधानम्

समासान्तप्रत्ययः अलौकिकविग्रहवाक्ये एव भवति, तत्रैव समकालमेव च समाससंज्ञापि भवति। समाससंज्ञायाः पूर्वं समासान्तप्रत्यये कृते समासान्तः इति नाम्नि एव असङ्गत्यापत्तिः, तदानीं समाससंज्ञाभावात्। समासविधानात् परं समासान्तप्रत्ययविधानं चेत् तदा समासान्तप्रत्ययाः समासस्य अन्त्यावयवा न स्युः। तेन उपशरदमित्यादिषु 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' [अष्टाध्यायी २.४.८३] इति सूत्रं न प्रवर्तेत। अतः अलौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासान्तप्रत्ययानां

[२] तत्रैव ४१६-पृष्ठे।

विधानं भवति ।

समासान्तप्रत्ययप्रवृत्तिसमकालमेव समाससंज्ञाविधानात् बहुकुमारीकः इत्यत्र 'गोस्त्रियोरुपसर्जनस्य' [अष्टाध्यायी १.२.४८] इति सूत्रेण ह्रस्वो न भवति । तथाहि बहु जस् कुमारी जस् इति अलौकिकविग्रहवाक्ये कब्विधानसमकालमेव समाससंज्ञाविधानात् बहु जस् कुमारी जस् क इति समुदायस्यैव समाससंज्ञा भवति । समाससंज्ञायां सत्यां बहु जस् कुमारी जस् क इति समुदायस्यैव 'कृत्तद्धितसमासाश्च' [अष्टाध्यायी १.२.४६] इति सूत्रेण प्रातिपदिकसंज्ञा भवति । 'गोस्त्रियोरुपसर्जनस्य' [अष्टाध्यायी १.२.४८] इति सूत्रस्यार्थस्तावत् उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तञ्च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यादिति । अत्र प्रातिपदिकसंज्ञा तु कप्समासान्तसहितस्यैव, न तु बहु जस् कुमारी जस् इत्यस्य । अतः 'गोस्त्रियोरुपसर्जनस्य' [अष्टाध्यायी १.२.४८] इति सूत्रेण ह्रस्वो न भवति । किञ्च, कप् अन्तरङ्गः, ह्रस्वस्तु बहिरङ्गः । तादर्थ्यात् ताच्छब्द्यम् इति न्यायेन समासार्थः कप् समासान्तर्गत्वेन अन्तरङ्ग एव भवति, ह्रस्वत्वं च उपसर्जनस्त्रीप्रत्ययसापेक्षत्वात् बहिरङ्गत्वम् । अतः आदौ कबेव भवति ।

समासान्तप्रत्ययः समाससंज्ञाविधानकाले एव भवति इत्यत्र महाभाष्यकारवचनं प्रमाणमस्ति । तथाहि पतञ्जलिना उच्यते– "येषां पदानां समासो, न तावत् तेषामन्यद् भवति, कपं तावत् प्रतीक्षते" इति । अर्थात् समासान्तप्रत्ययप्रवृत्त्युत्तरमेव कार्यान्तरं भवति, न ततः पूर्वमिति ।

**२.२. समासान्तस्य उत्तरपदावयवत्वनिरासः**

'गोस्त्रियोरुपसर्जनस्य' [अष्टाध्यायी १.२.४८], 'सरूपाणामेकशेष एकविभक्तौ' [अष्टाध्यायी १.२.६४] इति सूत्रयोः व्याख्यानकाले कैयटः समासान्तस्थसमासपदस्य समासार्थविग्रहवाक्यस्थोत्तरपदे लक्षणां स्वीकरोति । तथा च समासान्तपदेन समासार्थबोधकविग्रह-वाक्यस्थोत्तरपदस्य अन्त्यावयवत्वमित्यर्थो लभ्यते । परन्तु इदं मतं न समीचीनम् । एतादृशलक्षणाकरणे किमपि फलं नास्ति । अत्र पुनः शङ्का उत्पद्यते यदि समासस्य उत्तरपदे लक्षणा न स्वीक्रियते तदा द्वयोः पुरोः समाहारः इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' [अष्टाध्यायी २.१.५१] इति सूत्रेण द्विगुसमासे टच्प्रत्यये द्वि पुर् अ इति जाते पुर् इत्यस्य अकारान्तोत्तरपदत्वाभावात् 'अकारान्तोत्तरपदद्विगुः स्त्रियामिष्टः' इति वार्तिकेन स्त्रीत्वं न स्यात् । इष्यते चात्र ङीप् । तच्च टचः उत्तरपदावयवत्वे

एव सम्भवति । अतः समासस्य उत्तरपदे लक्षणा स्वीकर्तव्या इति चेन्न । द्विपुरीति रूपसिद्धिः लोकप्रसिद्धत्वात् सिध्यति । महाभाष्यकारेणापि उच्यते– "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य" इति । अर्थात् लिङ्गं लौकिकप्रयोगादेव सिध्यति । तदर्थं सूत्रस्यापेक्षा नास्ति । अतः द्वयोः नावोः समाहारः इति विग्रहे द्विनावम्, अर्धं खार्याः इति विग्रहे अर्धखारि इत्यादिषु लोकप्रसिद्धत्वादेव नपुंसकत्वं सिध्यति, न तु सूत्रप्राप्तस्त्रीत्वम् । अन्यथा द्विनावम् इत्यत्र अकारान्तोत्तरपदद्विगुः स्त्रियामिष्टः इति वार्तिकेन, तथा च अर्धखारि इत्यत्र परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्रेण स्त्रीत्वं स्यात् ।

किञ्च, यदि समासान्तप्रत्ययः उत्तरपदस्यावयवः स्यात् तदा अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः इति सूत्रे उत्तरपदग्रहणमेव व्यर्थं स्यात् । उत्तरपदानवयवत्वपक्षे पञ्चानां राज्ञां समाहारः इति विग्रहे पञ्चन् आम् राजन् आम् टच् इति अलौकिकविग्रहे टच्प्रत्ययस्य उत्तरपदानवयवत्वेनैव स्त्रीत्वं न भवति । उत्तरपदावयवत्वपक्षे अत्र स्त्रीत्वम् अवश्यमेव स्यात् । अत एव वार्तिके उत्तरपदं सार्थकं भवति । पञ्चराजम् इत्यत्र उत्तरपदं यत् राजन् इति तन्नान्तं, न तु अकारान्तम् । अकारान्तस्तु पञ्चराज इति समुदायः । अतः उत्तरपदस्य अकारान्तत्वाभावात् ङीप्प्रत्ययो न भवति ।

परन्तु समासान्तप्रत्ययाः समासस्य चरमावयवत्वेन स्वीक्रियन्ते चेत् सरूपाणामेकशेष एकविभक्तौ इति सूत्रस्थभाष्येण सह विरोधो भवति । तथाहि तत्र भाष्ये उक्तं – "कृतद्वन्द्वानां विभक्तौ परत एकशेष इति पक्षे ऋक् च ऋक् ऋचौ, असारूप्यादेकशेषो न प्राप्नोति"[३] इति । एतस्य तात्पर्यं तावत् ऋक् च ऋक् च इति विग्रहे द्वन्द्वसमासे समासान्तप्रत्यये च कृते ऋक् ऋच इति स्थिते ऋक्-ऋचयोः समानरूपत्वाभावात् एकशेषो न प्राप्नोतीति । एतच्च भाष्यकारमतं समासान्तप्रत्ययानाम् उत्तरपदावयवत्वस्वीकारे एव संगच्छते । समासस्य अन्त्यावयवत्वे स्वीकृते तु ऋक् ऋक् अ इति स्थिते सारूप्यात् एकशेषः प्राप्नोत्येव । अतः समासान्तप्रत्ययाः समासस्य अन्त्यावयवा न भवन्ति अपि तु समासार्थबोधकविग्रहवाक्यस्थोत्तरपदस्यैवावयवा भवन्तीति । अस्योत्तरं तावत् असारूप्यादेकशेषो न भवतीति भाष्यवाक्यं समासान्ताः समासस्य अन्तावयवाः इति पक्षे अपि सङ्गमयितुं शक्यते । अस्य वाक्यस्य तात्पर्यं तावत् समासान्तानां समासस्य चरमावयवत्वस्वीकारे सति तत्प्राग्भावस्य विभक्तिपरत्वाभावात् एकशेषो न प्राप्नोति । किञ्च, समासान्तप्रत्ययविशिष्टस्य तु असारूप्यात् एकशेषो न प्राप्नोतीति ।

---

३ भार्गवशास्त्रिजोशिसंशोधिते व्याकरणमहाभाष्ये द्वितीये खण्डे ७६-पृष्ठे ।

केषाञ्चिन्मते ऋक् च ऋक् च इत्यत्र द्वन्द्वसमासे समासान्तप्रत्ययरहितत्वेन अनर्थकत्वादेव अर्थवद्ग्रहणे नानर्थकस्य इति परिभाषाबलात् सरूपाणामेकशेष एकविभक्तौ इति सूत्रेण एकशेषो न भवति, न तु असारूप्यादिति। अत्रोच्यते, अर्थवत्परिभाषा यत्र यत्र विशिष्टरूपोपादानमस्ति तत्रैव प्रवर्तते, व्रश्चभ्रस्जेत्यादिसूत्रेषु। सरूपसूत्रे तु तथा विशिष्टरूपाभावात् अर्थवत्परिभाषा न प्रवर्तते। अतः अनर्थकत्वादेकशेषो न प्रवर्तते इति कथनं सर्वथा असङ्गतमेव। किञ्च, अत्र किमपि भाष्यमपि प्रमाणत्वेन न दरीदृश्यते।

**२.२.१. उत्तरपदसुब्विभक्तेः पर एव समासान्तः प्रत्ययः–**

अत्रायं संशयः समासान्तप्रत्ययः उत्तरपदसुब्विभक्तेः पूर्वं वा भवति परं वेति। अत्र समाधानं यत् उत्तरपदसुब्विभक्तेः परमेव समासान्तप्रत्ययो भवति। तथाहि समासान्तः इत्यत्र समासः इत्यस्य अर्थः समासार्थबोधकालौकिकविग्रहवाक्यमिति। अन्तशब्दश्च चरमावयववाची। समासार्थवाक्यञ्च सुप्सहितमेवास्ति, न तु सुब्रहितम्। अतः बहु जस् गोमत् जस् इत्यादिसमासार्थवाक्ये यः अन्तिमः जसादिसुप्, ततः परमेव समासान्तप्रत्ययो भवति, न तु सुपः पूर्वभागे। अन्यथा समासान्तपदस्य वाच्यार्थेन सह विरोधः स्यात्।

उत्तरपदसुब्विभक्तेः परं समासान्तप्रत्ययस्वीकारात् बहुचर्मिका इत्यत्र इत्वविधानं सङ्गतं भवति। तथाहि बहु जस् चर्मन् जस् क इत्यवस्थायां सुपोः लुकि टापि बहुचर्मका इत्यत्र प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः इति सूत्रेण कप्रत्ययात् पूर्ववर्तिनः मकारोत्तरस्य अकारस्य इत्वे बहुचर्मिका इति रूपं सिद्ध्यति। सूत्रस्यास्यार्थस्तावत्– प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे, स आप् सुपः परो न चेत् इति। बहु जस् चर्मन् जस् क आ इत्यत्र टाप् सुपः परं नास्ति, अपि तु कप्रत्ययात् परमस्ति। अतः इत्वं सङ्गच्छते। यदि समासान्तप्रत्ययः सुपः पूर्वस्तात् स्वीक्रियते तदा बहु जस् चर्मन् क जस् टाप् इति स्थिते टापः सुपः परत्वात् प्रत्ययस्थादिति सूत्रेण इत्वं न स्यात्। अतः सुपः परमेव समासान्तप्रत्यया भवन्ति इति स्वीकर्तव्यम्।

अत्रायं प्रश्नः समासान्तप्रत्ययाः तद्धितप्रत्ययान्तर्गताः भवन्ति। सुबन्ताच्च तद्धितोत्पत्तिरिति नियमः। परन्तु बहु जस् गोमत् जस् इति समुदायस्य सुबन्ततदादित्वाभावेन ततः समासान्तप्रत्यया न स्युरिति। अत्रोच्यते समासान्तप्रत्ययो यद्यपि तद्धितप्रत्ययान्तर्गतस्तथापि सुबन्तात्तद्धितोत्पत्तिः इति नियमस्य विषयो न भवति। नियमोऽस्ति

स्वार्थेन परिपूर्णं पदमर्थान्तरमाकाङ्क्षते इति । परन्तु समासान्तः प्रत्ययः अत्यन्तस्वार्थिको वर्तते । अर्थात् समासस्य अर्थमेव समासान्तः कथयति । पुंयोगादाख्यायाम् इति सूत्रे भाष्ये भाष्यकारेणापि उच्यते अत्यन्तस्वार्थिकाः तद्धिताः सुबुत्पत्तेः पूर्वमेव भवन्तीति ।

### ३. समासान्तप्रकरणे ङ्याप्प्रातिपदिकात् इत्यस्य असम्बन्धः

समाससंज्ञासमकालमेव समासान्तप्रत्ययानां विधानं भवति । अर्थात् समासान्तप्रत्ययविधानकाले अलौकिकविग्रहदशायामेव समासान्तप्रत्यया विधीयन्ते । तदानीं तु प्रातिपदिकसंज्ञैव नास्ति । प्रातिपदिकसंज्ञाविधानात् पूर्वमेव समासान्तप्रत्ययानां विधानं भवति । अतः ङ्याप्प्रातिपदिकात् इत्यनेन सह समासान्तप्रत्ययानां सम्बन्ध एव नास्ति ।

### ४. उपसंहारः

एवं समसान्तप्रत्ययानां स्वरूपप्रवृत्त्यादिपूर्वकं वैशिष्ट्यं यथाशक्ति निरूप्य पत्रमिदमुपसंहरामि ।

✶ ✶ ✶

## Bibliography


1. *लघुशब्देन्दुशेखरः ज्योत्स्नाटीकासहितः ( स्त्रीप्रत्ययादव्ययीभावप्रकरणं यावत् तृतीयो भागः )* ; नागेशभट्टः ; हरिनारायणतिवारी (सम्पादकः) ; चौखम्भा संस्कृत भवन ; वाराणसी ; २०१५
2. *लघुशब्देन्दुशेखरः अभिनवचन्द्रिकादिटीकासहितः ( सुबन्ततः अव्ययीभावान्तो द्वितीयो भागः )* ; नागेशभट्टः ; बालशास्त्री (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०१३
3. *व्याकरणमहाभाष्यम् ( भाष्यप्रदीपोद्योतसमुल्लसितम् )* ; पतञ्जलिः ; भार्गवशास्त्रीजोशी (संशोधकः) ; चौखम्बा संस्कृत प्रतिष्ठान ; दिल्ली ; २०१४
4. *वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीटीकासहिता ( समासप्रभृतितद्धितप्रकरणान्तो द्वितीयो भागः )* ; भट्टोजिदीक्षितः ; गिरिधरशर्मा, परमेश्वरानन्दशर्मा (सम्पादकौ) ; मोतीलाल बनारसीदास ; कोलकाता ; पुनर्मुद्रणम् २०१०
5. *प्रौढमनोरमा ( कारकादव्ययीभागान्तो भागः )* ; भट्टोजिदीक्षितः ; रमाकान्तपाण्डेयः (व्याख्याकारः) ; चौखम्भा विद्याभवन ; वाराणसी ; २००७
6. *काशिका ( षष्ठो भागः )* ; वामनजयादित्यौ ; जयशङ्करलालत्रिपाठी, सुधाकरमालवीयः (सम्पादकौ) ; तारा बुक एजेन्सी ; वाराणसी ; २०१२


✳ ✳ ✳

# हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु इति प्रथमपक्षविमर्शः

**शंखशुभ्रगच्छितः** *


## Abstract

[‘हलन्त्यम्’ [अष्टाध्यायी १.३.३] इति सूत्रम् अष्टाध्याय्यां प्रथमाध्याये तृतीयपादे तृतीयसूत्रत्वेन अपाठि । षड्विधसूत्रेषु संज्ञाशास्त्रमिदम् । ‘आदिरन्त्येन सहेता’ [अष्टाध्यायी १.१.७१] इति सूत्रं च अष्टाध्याय्यां प्रथमाध्याये प्रथमपादे एकसप्ततितमं सूत्रम् । षड्विधसूत्रेषु इदं संज्ञासूत्रम् । तत्र ‘हलन्त्यम्’ [अष्टाध्यायी १.३.३] इति सूत्रार्थधीः ‘आदिरन्त्येन सहेता’ [अष्टाध्यायी १.१.७१] इति सूत्रार्थज्ञानाधीना, ‘आदिरन्त्येन सहेता’ इति सूत्रार्थज्ञानञ्च ‘हलन्त्यमि’ति सूत्रार्थज्ञानापेक्षम् । अर्थात्, ‘हलन्त्यम्’ ‘आदिरन्त्येन सहेता’ चेति सूत्रद्वयं स्वार्थबोधनाय परस्परज्ञानमपेक्षते इत्येवमनयोः सूत्रयोर्बोधे आपद्यते अन्योन्याश्रयदोषः । अस्य दोषस्य परिहारः हलन्त्यम् इति सूत्रावृत्त्या एव भवतीति दीक्षितभट्टैः सिद्धान्तितम् । एवं सिद्धान्तपक्षम् उक्त्वा स्वविरचिते प्रौढमनोरमाग्रन्थे अस्यैव अन्योन्याश्रयदोषस्य वारणप्रसङ्गे अन्यदपि पक्षद्वयं तैः समुपन्यासि । तत्र **हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु...** इत्यादिग्रन्थेन प्रथमपक्षः उपस्थापितः । सम्प्रति अस्मिन् शोधलेखे अस्यैव प्रथमपक्षस्य विस्तरेण व्याख्यानं क्रियते ।]


### ०. उपक्रमः

‘हलन्त्यम्’ [अष्टाध्यायी १.३.३] ‘आदिरन्त्येन सहेता’ [अष्टाध्यायी १.१.७१] चेत्यनयोः सूत्रयोः मध्ये आपद्यमानस्य अन्योन्याश्रयदोषस्य वारणं हलन्त्यम् इति सूत्रावृत्त्या एव सम्भवतीति भट्टोजिदीक्षितानां मतम् । एवं सिद्धान्तपक्षं प्रतिपाद्य स्वविरचिते प्रौढमनोरमाग्रन्थे अस्यैव अन्योन्याश्रयदोषस्य वारणप्रसङ्गे अन्यदपि पक्षद्वयं श्रीमद्भिः समुपन्यासि । तत्र “हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु ।”[१] इति ग्रन्थेन प्रथमपक्षः उपस्थापितः । “अस्तु समाहारद्वन्द्वो हल् च ल् चेति ।”[२] इत्यादिपङ्क्त्या द्वितीयपक्षश्च उल्लिखितः । सम्प्रति प्रकृते

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने

१ शब्दरत्नादिसहिता प्रौढमनोरमा, संज्ञाप्रकरणम्, सदाशिवशास्त्री (सम्पादकः), पत्रम्-६ ।

२ शब्दरत्नादिसहिता प्रौढमनोरमा, संज्ञाप्रकरणम्, सदाशिवशास्त्री (सम्पादकः), पत्रम्-८ ।

शोधप्रबन्धे **हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु** इति प्रथमपक्षस्य उपपादनपूर्वकखण्डनं विधाय सिद्धान्तपक्षस्यैव औचित्यं व्यवस्थाप्यते ।

**१. प्रथमपक्षः**

'हलन्त्यम्' इति सम्पूर्णसूत्रावृत्त्यपेक्षया तदेकदेशभूतस्य हल्पदस्य तन्त्रेण, एकशेषेण, आवृत्त्या वा अन्योन्याश्रयदोषपरिहारः सम्भवः । तत्कथमिति चेदुच्यते- 'हलन्त्यम्' इति सम्पूर्णसूत्रस्य आवृत्तिर्मास्तु, तदेकदेशभूतस्य हल् इति पदमात्रस्यैव तन्त्रेण, एकशेषेण, आवृत्त्या वा दोषपरिहारः शक्यः । तत्र तन्त्रत्वं नाम 'सकृदुच्चारितत्वे सति अनेकार्थविषयकबोधजनकत्वमि'ति । तच्च द्विविधम् अर्थतन्त्रं शब्दतन्त्रञ्चेति । यत्र प्रवृत्तिनिमित्तनिष्ठैकप्रकारतानिरूपितनानाविशेष्यताक-बोधेच्छा तत्र अर्थतन्त्रम् ।[३] यथा- घटान् पश्य इति । घटत्वनिष्ठैकप्रकारता-निरूपितनानाविशेष्यताकबोधेच्छा घटान् पश्य इत्यत्र वर्तते अतः अर्थतन्त्रमत्र । यत्र प्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितनानाविशेष्यताक-बोधेच्छा तत्र शब्दतन्त्रम् ।[४] यथा- अक्षा भज्यन्ताम्, भुज्यन्ताम्, दीव्यन्ताम् इत्यत्र अक्षा इत्यत्र अक्षत्वरूपं प्रवृत्तिनिमित्तम्, तच्च शकटाक्ष-देवनाक्ष-विभीतकाक्षभेदेन त्रिविधम् । तथा च आश्रयभेदेन विषयतायाः भेदात् नानाप्रवृत्तिनिमित्तनिष्ठनानाप्रकारतानिरूपितनानाविशेष्यताकबोधो जायते इत्यतः शब्दतन्त्रमत्र । प्रकृते एकमेव हल्पदम् अर्थद्वयबोधकं भवति । तत्र एकं हलिति पदं समस्तम् । अत्र च हस्य ल् इति समासः । सामीप्यं षष्ठ्यर्थः । तद्यथा ग्रन्थः "हस्य ल् इति च व्याख्यास्यते । सामीप्यं षष्ठ्यर्थः ।"[५] इति । एवञ्च हलित्यस्य अर्थो भवति हकारसमीपवर्त्तिनो लकारस्य इत्संज्ञा स्यादिति । ततश्च अनेन शिवसूत्रस्य लकारस्य इत्संज्ञा सिद्ध्यति । ततः 'आदिरन्त्येन सहेता' इत्यनेन सूत्रेण हल्प्रत्याहारसिद्धिः स्यात् । ततः अन्त्यं हलित् स्यात् इति द्वितीयार्थः फलति । तेन च अन्योन्याश्रयदोषनिवृत्तिः स्यात् । अथवा एकशेषेण दोषस्य निवृत्तिः सुशका । हल् च हल् चेति हल्

[३] प्रौढमनोरमा (शब्दरत्न-बालप्रकाशिकाव्याख्योपेता), पञ्चसन्धिप्रकरणान्ता, द्वारिकाप्रसादद्विवेदी (व्याख्याकारः सम्पादकश्च), पत्रम्- १३ ।

[४] प्रौढमनोरमा (शब्दरत्न-बालप्रकाशिकाव्याख्योपेता), पञ्चसन्धिप्रकरणान्ता, द्वारिकाप्रसादद्विवेदी (व्याख्याकारः सम्पादकश्च), पत्रम्- १४ ।

[५] प्रौढमनोरमा, पञ्चसन्धिप्रकरणान्ता, प्रथमो भागः, रमाकान्त-पाण्डेयः (व्याख्याकारः सम्पादकश्च), पत्रम्- २१ ।

इति 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति नयेन एक एव हल्शब्दः अर्थद्वयस्य बोधकः । तत्र प्रथमं हलिति पदं समस्तम् । अत्र च हस्य ल् इति समासः । सामीप्यं षष्ठ्यर्थः । एवञ्च हलित्यस्य अर्थः हकारसमीपवर्त्तिनो लकारस्य इत्संज्ञा स्यादिति । ततश्च अनेन शिवसूत्रस्य लकारस्य इत्संज्ञा सिद्ध्यति । ततः 'आदिरन्त्येन सहेता' इत्यनेन सूत्रेण हल्प्रत्याहारोऽपि सिद्ध्यति । ततः अन्त्यं हलित् स्यात् इति द्वितीयार्थोपपत्तिः । तेन च अन्योन्याश्रयदोषो निवार्यते । अथवा आवृत्त्या दोषपरिहारः कर्तुं शक्यः । तथाहि 'हलन्त्यम्' इत्यस्य हल्पदस्य आवृत्तिः स्वीक्रियते । आवृत्त्या च बोद्धॄणामर्थद्वयबोधः । एकं हल्पदं प्रत्याहारपरम् । अपरस्मिन् च हल्पदे हस्य ल् इति षष्ठीतत्पुरुषसमासः स्वीक्रियते । अत्र षष्ठ्याः अर्थः सामीप्यम् । तेन हलिति पदस्य हकारसमीपवर्त्ती लकार इत्यर्थ उपलभ्यते । ततश्च सूत्रार्थो जायते हकारसमीपवर्त्तिनो लकारस्य इत्संज्ञा भवति । 'हल्' इति चतुर्दशसूत्रे लकारस्य हकारसामीप्यात् तत्सूत्रस्थलकारस्य इत्संज्ञा सुकरा । एवं हल्सूत्रस्थस्य लकारस्य इत्संज्ञा इतरानपेक्षिता सिद्ध्यति । ततश्च 'आदिरन्त्येन सहेता' इति सूत्रेण हल्प्रत्याहारसिद्धौ हकारादिलान्तसमुदायघटकवर्णानां बोधः हल्पदेन सञ्ज्ञायते । तदनु उपदेशे वर्तमानानां हल्वर्णानाम् इत्संज्ञा सिद्ध्यति । एवञ्च 'हलन्त्यम्' इति सम्पूर्णसूत्रावृत्तिमन्तरैव तदेकदेशभूतस्य हल्पदस्यावृत्त्या 'हलन्त्यम्' 'आदिरन्त्येन सहेता' इत्यनयोः सूत्रयोः अन्योन्याश्रयदोषपरिहारः सम्भवतीत्यतः सम्पूर्णसूत्रावृत्तिः अनपेक्षिता इत्याक्षेपः ।

## २. प्रथमपक्षदूषणम्

प्रथमपक्षे हस्य ल् हल् इति षष्ठीतत्पुरुषसमासकल्पनस्य क्लिष्टत्वात् तत्र समासोऽनुपपन्नः ।[६] तथा च सामीप्यस्य षष्ठ्यर्थत्वाभावे सर्वथा अप्रसिद्धत्वात्तस्मिन्नर्थे समासो नैव उपपद्यते । षष्ठ्याः सामीप्यार्थकत्वे ब्राह्मणस्य कम्बलः ब्राह्मणकम्बलः इत्यादौ ब्राह्मणसमीपवर्त्ती कम्बलः इति बोधः स्यात् । किन्तु न तथा जायते । ब्राह्मणकम्बलः इत्यादौ ब्राह्मणस्वामिककम्बलः इति प्रतीतिः भवति, न तु ब्राह्मणसमीपवर्त्ती अन्यस्वामिकः कम्बलः इति । अतः सामीप्यं न षष्ठ्यर्थः इत्युपपद्यते । एवमेव चित्राः गावः यस्य स चित्रगुः इत्यत्रापि चित्रगुशब्दात्

६ प्रौढमनोरमा, पञ्चसन्धिपर्यन्ता, जयशङ्करलाल-त्रिपाठी (व्याख्याकारः सम्पादकश्च), पत्रम्- २१ ।

चित्राभिन्नगोसमीपवर्त्तिवृक्षादिरूपार्थस्य प्रतीतिः न भवति, परं चित्राभिन्नगोस्वामी इत्यर्थः प्रतीयते। षष्ठ्याः सामीप्यार्थकत्वे तु कदाचित् चित्रगुशब्देन तत्समीपवर्त्तिनां वृक्षादीनां बोधो जायेत, तन्नोपजायते इत्यतः षष्ठ्याः सामीप्यार्थकत्वं न युज्यते। किञ्च ब्राह्मणस्य कम्बलः इत्यादौ तात्पर्यनिर्णायकप्रकरणाद्यभावेऽपि यथा स्व-स्वामिभावसम्बन्धप्रतीतिः भवति, तथा अनन्तरादिशब्दप्रयोगव्यतिरेकेण सामीप्यं न प्रतीयते। तद्यथा शब्दरत्ने न्यरूपि- "ब्राह्मणस्य कम्बलः इत्यादौ असत्यपि प्रकरणादौ स्वस्वामिभावादिप्रतीतिवदनन्तरसमीपादिशब्दप्रयोगमन्तरेण सामीप्याद्यप्रतीतेः, तस्य षष्ठ्यर्थत्वाभावात्।"[७] इति। तथा च सामीप्यस्य षष्ठ्यर्थत्वाभावे तस्मिन्नर्थे समासोऽपि न संघटते। न च "एकशतं षष्ठ्यर्थाः"[८] इति वचनमाश्रित्य भाष्यविरोधः शङ्कनीयः, सर्वथा षष्ठ्याः सामीप्यार्थप्रतीत्यभावात्। एवं वृक्षस्य भित्तिः इत्यादौ सर्वदा संयोगप्रतीतेः, सामीप्यार्थाप्रतीतेश्च भाष्यविरोधो निरस्तः। पुनः अनन्तरादिशब्दप्रयोगेण हकारानन्तरस्य लकारस्य इत्संज्ञा स्यादित्यर्थे सिद्धे हकारस्य अनन्तरादिशब्देन सह अन्वयोपपत्तावपि समस्यमानलकारेण सह अन्वयाभावात् सामर्थ्याभावाच्च समासो न घटते। न च मध्यमपदलोपिसमासेन अत्र निर्वाहः शक्यः, गौरवात्। कथं तदिति निरूप्यते- हस्य समीपः हसमीपः इति हकारस्य समीपेन सह समासः; ततश्च हसमीपश्चासौ ल् हल् इति हसमीपेन च सह लकारस्य समासे पूर्वपदभूतहसमीपस्य यदुत्तरपदं समीपपदम्, तस्य समीपपदस्य 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्' इति वार्त्तिकेन लोपे हलिति पदनिष्पत्तिः जायते। एवमत्र समासप्रसङ्गे वर्तते प्रतिपत्तिगौरवम्। अतो मध्यमपदलोपिसमासाश्रयः अशक्यः। प्रसङ्गेऽस्मिन् मध्यमपदलोपिसमासास्वीकारप्रसङ्गे "बालप्रकाशिकाख्य-संस्कृतहिन्दीव्याख्याद्वयोपेतायां सशब्दरत्न-प्रौढमनोरमायां" व्याख्याकृता द्वारिकाप्रसादद्विवेदिना न्यरूपि- "'वर्णो वर्णेन' [अष्टाध्यायी २.१.६९] इति सूत्रभाष्ये समानाधिकरणाधिकारे 'शाक-पार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च' इति वार्त्तिके समानाधिकरणाधिकारे शाकपार्थिवादीनाम् उपसंख्यानं कर्तव्यमुत्तरपदलोपश्च वक्तव्यः

---

[७] सभैरवीशब्दरत्नसहिता प्रौढमनोरमा, संज्ञाप्रकरणम्, चन्द्रशेखरमिश्रः (सम्पादकः), पत्रम्- १३।

[८] प्रौढमनोरमा, अव्ययीभावान्ता, व्याख्याचतुष्टयोपेता, भावप्रकाशव्याख्या, गोपालशास्त्री-नेने (व्याख्याकारः, सम्पादकश्च), पत्रम् – १७।

इत्यर्थत्वात् शाकभोजी पार्थिवः शाकपार्थिवः"[९] इतिवत् प्रकृतेऽपि समान-विभक्तिकत्वरूप-सामानाधिकरण्याभावात् मध्यमपदलोपि-समासाप्राप्तिः ।[१०] अतो नात्र मध्यमपदलोपिसमासः । अत्रैव किञ्चित् विचार्यते, उपर्युक्तप्रसङ्गे तु हसमीपो ल् हल् इति विग्रहस्वीकारे समान-विभक्तिकत्वरूपसामानाधिकरण्याभावात् मध्यमपदलोपि-समासाप्राप्तिः इति यदुक्तं तदसङ्गतं स्यात् । हसमीपो ल् हल् इति उभयोरपि प्रथमान्तत्वेन समानविभक्तिकत्वरूपसामानाधिकरण्यात् पूर्वोक्तं न सङ्गच्छते । तेन व्याख्याकृद्भिः प्रतिपादितं तत्त्वमपि असङ्गतम् इति तु न शङ्कनीयम् । व्याख्याकर्तुः हसमीपे ल् हल् इति विग्रहे तात्पर्यम् । अस्मिन् विग्रहे च हसमीपे इत्यस्य सप्तम्यन्तत्वात्, ल् इत्यस्य च प्रथमान्तत्वात् समानविभक्तिकत्वरूपसामानाधिकरण्याभावात् मध्यम-पदलोपिसमासाभावकथनस्य उचितत्वात् । हसमीपो ल् इत्यत्र च सामानाधिकरण्यसत्त्वेऽपि प्रतिपत्तिगौरवात् अयमपि पक्षो नाद्दतव्यः । एवं मध्यमपदलोपिसमासास्वारस्यात् सौत्रसमासः स्वीक्रियताम्, तत्कुतो न इति चेदुच्यते सौत्रसमासस्य क्लिष्टत्वात् अत्र तस्यापि अनाश्रयः ।[११] अतः सामीप्यादीनां षष्ठ्यर्थत्वाभावात् भाष्ये समासानभिधानाच्च सामीप्याद्यर्थेषु षष्ठीसमासः अनुपपन्नः । अतो लोकव्यवहारात् आकरप्रमाणात् च इदं वक्तुं शक्यते यत् सामीप्यं कथञ्चिदपि न षष्ठ्यर्थः । ननु सामीप्यस्य षष्ठ्यर्थत्वाभावे 'अस्तेर्भूः' [अष्टाध्यायी २.४.५२] इत्यत्र षष्ठीमात्रस्य उच्चारणे "अनन्तरे समीपे"[१२] इति सन्देहप्रतिपादकं भाष्यम् असङ्गतं स्यात् इति चेत् उच्यते-अनन्तरसमीपादिपदाध्याहारेण अनन्तरादिपदार्थानुयोगिकसम्बन्धार्थिका षष्ठी अथवा स्थानपदाध्याहारेण स्थानपदार्थानुयोगिकसम्बन्धार्थिका षष्ठी इत्यर्थात् कस्याध्यारो भवतीति निर्णेतुमिदं भाष्यं प्रवृत्तं न तु अस्तिपदोत्तरषष्ठ्याः अर्थप्रतिपादनाय । न च स्थानपदं षष्ठ्यर्थः एवेति एतज्ज्ञानाय अध्याहारो नापेक्षित इति वाच्यम्, भाष्ये 'स्थानेन योगो

[९] व्याकरणमहाभाष्यम् (प्रदीपोद्योतयुतम्), द्वितीयोऽध्यायः, तृतीयखण्डः, गुरुप्रसादशास्त्री (संस्कर्ता), पत्रम्- १५६-१५७ ।

[१०] प्रौढमनोरमा (शब्दरत्न-बालप्रकाशिकाव्याख्योपेता), पञ्चसन्धिप्रकरणान्ता, द्वारिकाप्रसादद्विवेदी (व्याख्याकारः सम्पादकश्च), पत्रम्- १७-१८ ।

[११] प्रौढमनोरमा, पञ्चसन्धिपर्यन्ता, जयशङ्करलाल-त्रिपाठी (व्याख्याकारः सम्पादकश्च), पत्रम्- २३ ।

[१२] व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्), प्रथमखण्डः, भार्गवशास्त्री (सम्पादकः), पत्रम्- ४१२ ।

यस्याः’[१३] इति व्यधिकरणबहुव्रीहिप्रदर्शनात् स्थानरूपसम्बन्धो न षष्ठ्यर्थः इति स्थितम् । अन्यथा ‘स्थानं योगो यस्याः’ इति समानाधिकरणनिर्देशमेव कुर्यात् इत्याशयः । किञ्च स्थाननिरूपितो यः सम्बन्धो निवर्त्यनिवर्तकभावरूपः स एव षष्ठ्यर्थः । स्थाननिमित्तसम्बन्धः इति प्रतिपादयता कैयटाचार्येणापि स्थानरूपः सम्बन्धो न षष्ठ्यर्थः इत्यवादि ।[१४] एवं सामीप्यं न षष्ठ्यर्थः । ‘तदस्यास्त्यस्मिन्निति मतुप्’ [अष्टाध्यायी ५.२.९४] इत्यनेन सूत्रेण गौः अस्य अस्ति इत्यर्थे मतुप्प्रत्यये गोमान् इति रूपं सिद्ध्यति । एवमेव गावोऽस्य सन्ति अनन्तराः इत्यर्थे मतुप्प्रत्ययो भवति न वा इत्याशङ्क्य उच्यते- ‘तदस्यास्त्यस्मिन्निति मतुप्’ इति सूत्रोपात्तः वर्तमानकालावच्छिन्नः अस्त्यर्थः प्रकृत्यर्थस्य गोपदार्थस्य विशेषणं भवति, तेन च गोमान् इत्यस्य वर्तमानकालावच्छिन्नगोस्वामी इत्यर्थो लभ्यते । एवमेव गावोऽस्य सन्ति अनन्तराः इत्यत्र आनन्तर्यमपि प्रकृत्यर्थस्य गोपदार्थस्य विशेषणम्, न तु षष्ठ्यर्थः इति कैयटमतम् । एवम् आनन्तर्यस्य प्रकृत्यर्थविशेषणत्वे “सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न” इति ‘सामर्थ्याभावात् वृत्तेरभावः’ इति असामर्थ्यात् न मतुप् । यथा ऋद्धस्य राज्ञः पुरुषः इत्यत्र ऋद्धस्य राज्ञो विशेषणत्वात्, ततश्च राज्ञः सापेक्षत्वात् पुरुषेण सह न समासः, तथैव आनन्तर्यस्य गोपदार्थस्य विशेषणत्वात्, ततश्च गोपदार्थस्य सापेक्षत्वात् “सापेक्षम् असमर्थवत्”[१५] इति न्यायेन अत्र न तद्धितमतुप्प्रत्ययः । आनन्तर्यस्य षष्ठ्यर्थत्वे तस्य प्रकृत्यर्थविशेषणत्वाभावात् मतुप्प्रत्ययार्थत्वात् सापेक्षत्वाभावात् समर्थत्वाच्च ‘सामर्थ्याभावात् वृत्त्यभावः’ इति भाष्यम् असङ्गतं स्यात् । अतः सामीप्यं षष्ठ्यर्थः इति स्वीकर्तुं न शक्यते । ननु गुरुपुत्रो देवदत्तस्य किञ्चित् इत्यत्र षष्ठीमात्रपदोच्चारणे जायमाना समीपाद्यर्थप्रतीतिस्तु सामीप्यस्य षष्ठ्यर्थत्वं स्वीकृत्यैव इति चेन्न, अत्र अध्याहृतानन्तरादिपदवशादेव तादृशार्थज्ञानं सम्भवति । ‘तदस्यास्त्यस्मिन्निति मतुप्’ इति मतुब्विधायकशास्त्रे यथा अस्त्यादिपदोपादानाभावेऽपि ‘अनेकमन्यपदार्थे’ [अष्टाध्यायी २.२.२४] इत्यनेन बहुव्रीहिसमासे

[१३] व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्), प्रथमखण्डः, भार्गवशास्त्री (सम्पादकः), पत्रम्- ४०८ ।

[१४] व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्), प्रथमखण्डः, भार्गवशास्त्री (सम्पादकः), पत्रम्- ४०८ ।

[१५] प्रौढमनोरमा, पञ्चसन्धिप्रकरणान्ता, प्रथमो भागः, रमाकान्त-पाण्डेयः (व्याख्याकारः सम्पादकश्च), पत्रम्- ३४ ।

वर्तमानकालावच्छिन्नास्त्यर्थान्तर्भावः तथैव शब्दशक्तिस्वभावात् चित्राः गावः सन्ति अस्य इत्यर्थे अस्त्यर्थान्तर्भावेण मतुप्प्रत्ययोऽपि भविष्यतीत्यतः अस्तिग्रहणस्य दृष्टफलं नास्तीति आशयः । एवं सूत्रकर्तुः अज्ञानकल्पनापेक्षया अन्यफलकत्वकल्पनमेव न्याय्यमिति किं तत् अन्यत् फलमिति जिज्ञासायां प्रोच्यते- अस्तिमान् इति रूपनिष्पत्तिरेव अस्तिपदोपादानस्य फलत्वेन ज्ञेयम् । तथा भगवता फणिमणिना न्यगदि “तद्वै क्रियमाणमपि प्रत्ययविध्यर्थं नोपाध्यर्थम् । अस्तिमानिति मतुप् यथा स्यात्”[१६] इति । अर्थात्, अस्तिग्रहणमत्र निश्चयेन प्रत्ययविध्यर्थमेव स्वीक्रियते, न तु प्रकृत्यर्थविशेषणार्थम् । शब्दशक्तिस्वभावात् अस्तिना समानाधिकरणे सति मतुब्विधीयते । किन्तु सत्ताविशिष्टकर्तृवाचकस्य अस्त्यव्ययस्य तत्समानार्थकास्तिना सह समानाधिकरणं न सम्भवति, यथा घटो घटः इत्यत्र समानाधिकरणान्वयो न संगच्छते, तथैव अस्ति अस्ति इति वाक्यप्रयोगोऽपि न युज्यते, उद्देश्यविधेययोः सत्ताविशिष्टकर्तृत्वरूपावच्छेदकैक्यात् । एवम् अस्ति अस्ति इत्यत्र समानाधिकरणान्वयाभावे अस्ति इत्यव्ययात् न मतुप्प्राप्तिः । अतः अस्तिशब्दात् मतुब्विधानार्थमेव सूत्रे अस्तिग्रहणम् आवश्यकमिति अस्तिग्रहणस्य फलान्तरं दर्शितम् । सूत्रे अस्तिग्रहणाभावे अथवा अस्तिमान् इत्यस्य साधुत्वाय तस्य सत्त्वेऽपि अस्त्यर्थान्तर्भावेण यथा शब्दशक्तिस्वभावात् बहुव्रीहिः मत्वर्थीयश्च भवति, तथैव सामीप्यस्य षष्ठ्यर्थत्वे तु आनन्तर्याद्यर्थान्तर्भावेऽपि चित्रा गावोऽस्य सन्ति अनन्तरा इत्याद्यर्थे बहुव्रीहिः मत्वर्थीयश्च स्यात्, किन्तु अनभिधानात् न तथा जायते इति मतुप्सुत्रे भाष्ये निरूपितम् । अतः सामीप्यं न षष्ठ्यर्थः इति स्थितम् । एवं सामीप्यस्य षष्ठ्यर्थत्वाभावे ग्रामकूपः, गङ्गातीरम् इत्यादिप्रयोगः कथमुपपद्येत? तत्र “ग्रामशब्दोऽयं बह्वर्थकः”[१७] इत्यर्थात् ‘शालासमुदाये वर्तते ग्रामशब्दः ।’ इति । एवं ग्रामस्य अवयवः शालादिः भवितुमर्हति, किन्तु कूपस्तु तद्बहिर्भूतः अस्ति । तेन ग्रामस्य कूपः ग्रामकूपः इत्यत्र कूपो न ग्रामावयवः, अतः अत्र अवयवावयविभावसम्बन्धो न घटते । ननु सामीप्यस्य षष्ठ्यर्थत्वं स्वीकृत्य ग्रामसमीपवर्तिकूपः इति व्यवहारोपपत्तिः जायते इत्यतोऽत्र षष्ठ्यर्थः सामीप्यम् इति स्वीकरणीयमेव इति चेत्

[१६] व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्योतसमुल्लसितम्), चतुर्थखण्डः, भार्गवशास्त्री (सम्पादकः), पत्रम्- ३४५ ।

[१७] प्रौढमनोरमा, पञ्चसन्धिप्रकरणान्ता, प्रथमो भागः, रमाकान्त-पाण्डेयः (व्याख्याकारः सम्पादकश्च), पत्रम्- ३५ ।

नैवम्- ग्रामकूपः इत्यत्र ग्रामस्य अवयवभूतः कूपः इति नास्ति किन्तु ग्रामारोपितावयवत्वं कूपे वर्तते इति आरोपितावयवावयविभावं स्वीकृत्य षष्ठीतत्पुरुषसमासोपपत्तिः जायते । अयञ्च अवयवत्वारोपः 'मपर्यन्तस्य' [अष्टाध्यायी ७.२.९१] इति सूत्रे भाष्ये स्पष्टं न्यरूपि । अतः तदर्थं सामीप्यस्य षष्ठ्यर्थत्वं नावश्यकम् । 'तुष्यतु दुर्जन'न्यायेन सामीप्यस्य षष्ठ्यर्थत्वम् आदाय हकारसमीपवर्तिलकारस्य इत्संज्ञा भवति इत्यर्थस्वीकारे 'हल् विलेखने' इति धातोः लकारस्य इत्संज्ञा प्राप्नोति । तत्र फलाभावात् इत्संज्ञा न भवति इति प्रश्ने क्रियमाणे फलान्तरमुखेन समाधीयते यद् यथा भविता इत्यादौ 'लुटः प्रथमस्य डारौरसः' [अष्टाध्यायी २.४.८५] इत्यनेन तिपः स्थाने विहितस्य डादेशस्य डित्त्वविधानसामर्थ्यात् अभसंज्ञकस्यापि टेः आसो लोपो दृश्यते तथैव '(हे) देवदत्त! हल् (अस्ति)' इत्यत्र 'लिति' [अष्टाध्यायी ६.१.१९३] इत्यनेन सूत्रेण लित्त्वसामर्थ्यात् प्रत्ययात् पूर्वत्वाभावेऽपि स्वरितस्वरत्वं फलत्वेन वाच्यम् । ननु 'हलसीराट्ठक्' [अष्टाध्यायी ४.४.८१] इति निर्देशात् लकारस्य लोपाभावे सिद्धे इत्वाभावः स्वतः सिद्ध्यति इत्याशङ्कायां निगदितम्- उक्तनिर्देशज्ञापकद्वारा ज्ञानजनकमनोव्यापारस्यापि गौरवात् एकदेशावृत्त्यपेक्षया सम्पूर्णसूत्रावृत्तिरेव लघुभूता इति ज्ञेयम् ।[१८] अतः हस्य ल् इति विगृह्य षष्ठ्यर्थः सामीप्यमिति वक्तुं न शक्यते । एवमत्र समासस्य का कथा, व्यस्तप्रयोगेऽपि अर्थात् ब्राह्मणस्य कम्बलः, चित्राः गावः यस्य इत्यादावपि सामीप्यं न षष्ठ्यर्थत्वेन उपगतम् इत्यतः सामीप्यं न षष्ठ्यर्थः इति निश्चप्रचं प्रतिभाति । तेन हस्य ल् इति विग्रहं प्रकल्प्य सामीप्यस्य षष्ठ्यर्थत्वं च स्वीकृत्य अन्योन्याश्रयदोषपरिहाराय उक्तस्य प्रथमपक्षस्य दोषग्रस्तत्वात् स नादरणीयः ।

### ३. उपसंहारः

"हलित्येकदेशस्यैव तन्त्रावृत्त्येकशेषान्यतममस्तु ।"[१९] इति प्रथमपक्षे 'हलन्त्यम्' इति सूत्रस्थहल्पदस्य तन्त्रेण, एकशेषेण, आवृत्त्या वा अन्योन्याश्रयदोषवारणं सम्भवति इति ग्रन्थकृद्भिः प्रत्यपादि । तत्र हस्य ल् इति विग्रहं प्रकल्प्य सामीप्यस्य षष्ठ्यर्थत्वं च स्वीकृत्य अन्योन्याश्रयदोषः वारयितुं शक्यते इत्युक्तम् । किन्तु षष्ठ्याः सामीप्यार्थकस्य भाष्यासम्मतत्वात्

[१८] प्रौढमनोरमा, अव्ययीभावान्ता, व्याख्याचतुष्टयोपेता, भावप्रकाशव्याख्या, गोपालशास्त्री-नेने (व्याख्याकारः, सम्पादकश्च), पत्रम्- २९ ।

[१९] शब्दरत्नादिसहिता प्रौढमनोरमा, संज्ञाप्रकरणम्, सदाशिवशास्त्री (सम्पादकः), पत्रम्- ६ ।

अप्रसिद्धत्वात् च अयं पक्षः अन्तिमे निराकृतः । एवञ्च सिद्धान्ते हलिति एकदेशस्यावृत्त्यपेक्षया 'हलन्त्यम्' इति सम्पूर्णसूत्रावृत्तौ एव ग्रन्थकृतां तात्पर्यं वर्तते इति उपपादितम् ।[२०]

✶ ✶ ✶

## Bibliography


1. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लसितम्)*; चतुर्थखण्डः ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०१८
2. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लसितम्)*; प्रथमखण्डः ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०२१
3. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमुल्लसितम्)*; षष्ठखण्डः ; पतञ्जलिः ; भार्गवशास्त्री (सम्पादकः) ; चौखम्बा-संस्कृत-प्रतिष्ठान ; दिल्ली ; २०१८
4. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमेतम्)*; द्वितीयोऽध्यायः ; तृतीयखण्डः ; पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; राष्ट्रिय-संस्कृत-संस्थानम् ; देहली ; २००६
5. *व्याकरणमहाभाष्यम् (प्रदीपोद्योतसमेतम्)*; प्रथमोऽध्यायः ; द्वितीयखण्डः ; पतञ्जलिः ; गुरुप्रसादशास्त्री (सम्पादकः) ; राष्ट्रिय-संस्कृत-संस्थानम् ; देहली ; २००६
6. *प्रौढमनोरमा (लघुशब्दरत्न-ज्योत्स्ना-प्रभा-कुचमर्दिनी-विभाटीकोपेता)*; भट्टोजिदीक्षितः ; सदाशिवशास्त्री (सम्पादकः) ; चौखम्बा-अमरभारती-प्रकाशन ; वाराणसी ; १९८३
7. *प्रौढमनोरमा (लघुशब्दरत्न-भावप्रकाशिका-भावबोधिनी-संस्कृत-हिन्दीव्याख्योपेता)*; पञ्चसन्धिपर्यन्ता ; भट्टोजिदीक्षितः ; जयशङ्करलालत्रिपाठी (व्याख्याकारः, सम्पादकश्च) ; चौखम्बा-कृष्णदास-अकादमी ; वाराणसी ; २०१९
8. *प्रौढमनोरमा (लघुशब्दरत्न-भैरवी-रत्नप्रभाव्याख्योपेता)*; अव्ययीभावान्ता ; भट्टोजिदीक्षितः ; सभापति-शर्मोपाध्यायः (व्याख्याकारः, सम्पादकश्च) ; वाणी-विलास-प्रकाशन ; वाराणसी ; २०५४ (वि.सं.)
9. *प्रौढमनोरमा (लघुशब्दरत्न-रत्नप्रकाशिका-भावप्रकाश-सरलाटीकोपेता)*; अव्ययीभावान्ता ; भट्टोजिदीक्षितः ; गोपालशास्त्री-नेने (व्याख्याकारः, सम्पादकश्च) ; चौखम्भा-संस्कृत-संस्थान ; वाराणसी ; २००३ ; तृतीयसंस्करणम्
10. *प्रौढमनोरमा (शब्दरत्न-बालप्रकाशिका-संस्कृतहिन्दीव्याख्योपेता)*; पञ्चसन्धिप्रकरणान्ता ; प्रथमो भागः ; भट्टोजिदीक्षितः ; द्वारिका-प्रसाद-द्विवेदी (व्याख्याकारः, सम्पादकश्च) ; चौखम्बा-सुरभारती-प्रकाशन ; वाराणसी ; २०११-१२


---

[२०] "तस्माद्यथोक्तमेव न्याय्यम्" इति मूलग्रन्थस्य सम्पूर्णसूत्रावृत्तौ तात्पर्यम् इति रमाकान्तपाण्डेयसम्पादितायां प्रौढमनोरमायां संज्ञाप्रकरणे मूले ३९-तमे पत्रे ।

11. *प्रौढमनोरमा (सशब्दरत्न-भैरवी-आयुषी-हिन्दीव्याख्याविभूषिता)*; पञ्चसन्धिप्रकरणान्ता ; प्रथमो भागः ; भट्टोजिदीक्षितः ; रमाकान्त-पाण्डेयः (व्याख्याकारः, सम्पादकश्च) ; चौखम्बा-विद्याभवन ; वाराणसी ; २०१२ ; प्रथमसंस्करणम्
12. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमाव्याख्यासमेता)*; प्रथमो भागः ; भट्टोजिदीक्षितः ; गोपालदत्तपाण्डेयः (सम्पादकः) ; चौखम्बा-सुरभारती-प्रकाशन ; वाराणसी ; २०१०
13. *वैयाकरणसिद्धान्तकौमुदी (तत्त्वबोधिनीव्याख्यासम्वलिता)*; भट्टोजिदीक्षितः ; वासुदेवशर्मा-पणशीकरः (संशोधकः) ; निर्णयसागरमुद्रणालयः ; मुम्बई ; १९०८


✳ ✳ ✳

# रघुवंशमहाकाव्ये प्रथमसर्गे मत्वर्थभिन्नतद्धितविमर्शः

शान्तनु-नायेकः *

**Abstract**

[संस्कृतव्याकरणे तद्धिताख्यः प्रत्ययो विराजते । तद्धितप्रत्ययाः प्रातिपदिकाद् भवन्ति । तद्धितान्तशब्दानां प्रयोगः बाहुल्येन दरीदृश्यते लोके । कालिदासादिभिः कविभिरपि तद्धितान्तशब्दाः प्रायुक्षत । अस्मिन् शोधप्रबन्धे कालिदासकृतस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यमानानां मत्वर्थभिन्नतद्धितप्रत्ययान्तशब्दानां विमर्शः कृतः । अत्र त्रिंशत् शब्दाः प्रदर्शिताः । एते शब्दाः कस्मिन्नर्थे कालिदासेन प्रयुक्ताः, एते प्रयोगाः पाणिनीयाः अपाणिनीयाः वा, पाणिनीयाश्चेत् केन पाणिनीयसूत्रेण तद्धितप्रत्ययः विहितः इत्यादिविषयाः अनेन शोधप्रबन्धेन ज्ञातुं शक्यन्ते । अपि च कः कः तद्धितप्रत्ययः रघुंवंशस्य प्रथमसर्गे विद्यते इत्यपि ज्ञातुं शक्यते ।]

**०. उपक्रमः**

भाष्यते इति भाषा । यया मनसो भावं व्यक्तीकुर्वन्ति जनाः सा एव भाषा । जगत्यस्मिन् वर्तन्ते बह्व्यः भाषाः । प्राचीनासु भाषासु अन्यतमा भवति संस्कृतभाषा । वैदिकसंस्कृतभाषायाः अनन्तरं लोके लौकिकसंस्कृतभाषा प्रचलिता आसीत् । अनयैव भाषया आदिकविना वाल्मीकिना आदिकाव्यं रामायणं व्यरचि । एतच्च महाकाव्यत्वेन गण्यते । सीतारामयोः कथा अत्र वर्णिता । कृष्णद्वैपायनेन वेदव्यासेन विरचितं महाभारताख्यं महाकाव्यमपि अनयैव भाषया विरचितम् । अत्र कौरवपाण्डवानां कथा वर्णिता ।

रामायणं महाभारतञ्च आश्रित्य कविभिः महाकाव्यखण्डकाव्य-नाटकादीनि विरचितानि । तेषु अन्यतमं भवति महाकविकालिदासविरचितं रघुवंशाख्यं महाकाव्यम् । नवदशाध्यायात्मकमिदं महाकाव्यं श्रुतिमधुरैः वर्णैः ग्रथितम् । उपमानाद्यलङ्कारैश्च भूषितमिदम् अनुष्टुभादिछन्दोभिः युक्तं वर्तते । रघुवंशमहाकाव्यं करुणरसात्मकं विद्यते । प्रायः ईसवीयपूर्वद्वितीयशतकात् ईसवीयपूर्वप्रथमशतकं कालिदासस्य कालः आसीत् इति विद्वांसः कथयन्ति ।अतः रघुवंशस्यापि कालः सः एव इत्यनुमीयते । तत्कालादेव महाकाव्यमिदं सहृदयहृदयं रञ्जयत् अस्ति ।

---

* शोधच्छात्रः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने

अत्र विद्यन्ते स्त्रीकृत्तद्धितप्रत्यययुक्ताः बहुविधाः शब्दाः । व्याकरणशास्त्रे स्त्रीकृत्तद्धितादिप्रत्ययविषये चर्चितं वर्तते । एतेषु प्रत्ययेषु अन्यतमः तद्धितप्रत्ययः । कृत्प्रत्ययाः यथा धातोरनन्तरं विधीयन्ते, तथैव तद्धितप्रत्ययाः सुबन्तादनन्तरं विधीयन्ते । तद्धितपदस्य अर्थः तेभ्यः प्रयोगेभ्यः शब्देभ्यः वा हिताः उपकारिणः इति । पाणिनिना तद्धिताः [अष्टाध्यायी ४.१.७६] इत्येव एकमधिकारसूत्रं व्यरचि । अस्य अधिकारसूत्रत्वात् अष्टाध्याय्याम् अस्मात् उत्तरसूत्रेषु अस्य पदस्य योजनं भवति । तेन उत्तरसूत्रेषु ये प्रत्ययाः विधीयन्ते ते तद्धितसंज्ञकाः भवन्ति । एते प्रत्ययाः प्रयोगाणाम् उपकरणाय सरलोपायेन वा शब्दानां साधुत्वप्रतिपादनाय विहिताः । यथा उपगोः अपत्यं पुमान् इत्यपेक्षया तद्धितप्रत्यययोगेन औपगवः इति प्रयोगः सुलभः । तस्मादेव पाणिनिना तद्धितप्रत्ययाः विहिताः ।

अणादितद्धितप्रत्ययाः बहुसंख्यकाः सन्ति । एषाम् तस्यापत्यम् इत्यादयः अर्थाश्च सन्ति बहवः । प्रत्ययविधानार्थं पाणिनिना सूत्राणि विरचितानि । अर्थविधानार्थमपि तेन सूत्राणि विरचितानि । अधुना प्रश्नः भवति कालिदासः रघुवंशे महाकाव्ये केषां तद्धितप्रत्ययानां केषु अर्थेषु प्रयोगम् अकार्षीत् इति । अपि च सर्वेऽपि शब्दाः पाणिनीयसूत्रम् अनुसरन्ति न वा इत्यपि प्रश्नः विद्यते । अतः एतेषां प्रश्नानां समाधानाय रघुवंशमहाकाव्ये प्रथमसर्गे मत्वर्थभिन्नतद्धितविमर्शः इति विषयः समुपस्थाप्यतेऽत्र । केवलं प्रथमसर्गस्थानाम् एव मत्वर्थभिन्नानां तद्धितान्तप्रत्ययानामत्र विचारं करिष्ये ।

## १. प्रथमसर्गे तद्धितविमर्शः

प्रथमसर्गे विद्यमानाः तद्धितप्रत्ययान्ताः शब्दाः तावत्- शैशवे, यौवने, वार्धके, वैवस्वतः, दण्ड्यान्, धुर्यान्, सभ्याः, आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् इत्यत्र विद्यमानः आतिथ्यशब्दः, अर्थ्याम्, दैवीनाम्, मानुषीणाम्, वंश्याः, आश्रमवृक्षकम् इत्यत्र विद्यमानः वृक्षकशब्दः, तदीयाम्, वन्यवृत्तिः इत्यत्र विद्यमानः वन्यशब्दश्च इति ।

### १.१. शैशवे[१]

प्रथमसर्गे विद्यमानस्य अष्टमश्लोकस्य आदिमं पदमिदम् । शैशवशब्दस्य अर्थम् अवोचत् मल्लिनाथः 'शिशोर्भावः शैशवं बाल्यम्' इति । एतेन शैशवे इत्यत्र यः प्रत्ययः विद्यते सः शिशुशब्दात् तस्य भावः इत्यर्थे जातः । अत्र प्रश्नः भवति शैशवे इति शब्दे कः प्रत्ययः विद्यते इति । तथा चेदुच्यते

१ शैशवेऽभ्यस्तविद्यानां....योगेनान्ते तनुत्यजाम् ॥ [रघुवंशम् १.८]

एतादृशं रूपं अण्-प्रत्ययेन अञ्-प्रत्ययेन वा सिद्ध्यति । तस्य भावः इत्यर्थे प्रत्ययद्वयमपि विधीयते । शिशुशब्दात् अण्प्रत्ययश्चेत् 'इगन्ताच्च लघुपूर्वात्' [अष्टाध्यायी ५.१.१३१] इत्यनेन सूत्रेण भवति, अञ्प्रत्ययश्चेत् 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' [अष्टाध्यायी ५.१.१२९] इति सूत्रेण भवति । इदानीं प्रश्नः भवति तर्हि कतरेण सूत्रेण शिशुशब्दात् कः प्रत्ययः स्यात् इति । अत्र यद्यपि अण्प्रत्ययविधायकं सूत्रं परसूत्रं, तथापि अञ्प्रत्ययविधायकसूत्रस्य अपवादसूत्रत्वात् शिशुशब्दात् अञ्प्रत्ययः एव स्यात् । ततः प्रातिपदिकसंज्ञायां, सुब्लुकि, आदिवृद्धौ, उकारस्य गुणे, सुबुत्पत्तौ सप्तम्येकवचने च शैशवे इति रूपं सिद्ध्यति ।

## १.२. यौवने[२]

यूनो भावः यौवनं, तस्मिन् इति यौवने । अत्रापि भावार्थे तद्धितप्रत्ययः जातः । युवन्-शब्दात् कः तद्धितप्रत्ययः स्यात् इति प्रश्ने उच्यते युवन्-शब्दस्य वयोवाचित्वात् 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' [अष्टाध्यायी ५.१.१२९] इति सूत्रेण अञ्प्रत्ययः प्राप्नोति । परन्तु 'हायनान्तयुवादिभ्योऽण्' [अष्टाध्यायी ५.१.१३०] इति सूत्रे युवादिगणस्य साक्षात् पाठात् युवन्-शब्दात् अण्प्रत्ययः एव स्यात् न तु अञ्प्रत्ययः । अत्र प्रश्नः भवति युवन्-शब्दात् अण्प्रत्यये कृते 'नस्तद्धिते' [अष्टाध्यायी ६.४.१४४] इति सूत्रेण तद्धितसंज्ञके अण्प्रत्यये परे नकारान्तस्य भसंज्ञकस्य युवन्-शब्दस्य टिलोपः कथं न भवति इति । तत्रोच्यते यदि अन्नन्तात् शब्दात् परं तद्धितसंज्ञकः अण्प्रत्ययः स्यात् तदा टिलोपः न स्यात् । अत्र च मानम् 'अन्' [अष्टाध्यायी ६.४.१६७] इति सूत्रम् । एतादृशस्थले अनेन सूत्रेण प्रकृतिभावः क्रियते । तेन आदिवृद्ध्यादिकार्ये कृते सप्तम्येकवचने यौवने इति रूपं सिद्ध्यति । युवन्-शब्दस्य पाठः मनोज्ञादिगणेऽपि कृतः । अतः 'द्वन्द्वमनोज्ञादिभ्यश्च' [अष्टाध्यायी ५.१.१३३] इति सूत्रेण युवन्-शब्दात् भावार्थे वुञ्-प्रत्ययोऽपि भवति, तेन यथा यौवनम् इति रूपं प्रयुज्यते तथैव वुञ्प्रत्यययोगेन यौवनकम् इति रूपमपि प्रयुज्यते ।

## १.३. वार्धके[३]

वृद्धस्य भावः, तस्मिन् इति विग्रहे वार्द्धके इति वुञ्प्रत्ययान्तं रूपमिदं सिद्ध्यति । अत्र वृद्धशब्दात् भावार्थे वुञ्प्रत्ययेन आदिवृद्ध्यादिकार्ये कृते वार्द्धकम् इति रूपं सिद्ध्यति । अत्र भावार्थे वुञ्प्रत्ययः केन सूत्रेण भवति

---

२ शैशवेऽभ्यस्तविद्यानां....योगेनान्ते तनुत्यजाम् ॥ [रघुवंशम् १.८]

३ तत्रैव

इति प्रश्नः उदेति । भावार्थे च वुञ्प्रत्ययविधायके द्वे सूत्रे स्तः । प्रथमं तावत् 'योपधाद्गुरूपोत्तमाद्वुञ्' [अष्टाध्यायी ५.१.१३२] इति, अपरञ्च 'द्वन्द्वमनोज्ञादिभ्यश्च' [अष्टाध्यायी ५.१.१३३] इति । प्रथमसूत्रेण भवति इति चेत्, न, योपधत्वाभावात् प्रथमसूत्रेण वृद्धशब्दात् वुञ्प्रत्ययः न भवति । द्वितीयसूत्रेण इति चेत् उच्यते वृद्धशब्दे द्वन्द्वसमासः नास्ति, एवमेव मनोज्ञादिगणेऽपि तस्य पाठः नास्ति । तर्हि कथमत्र वुञ्प्रत्ययः इति प्रश्ने उच्यते मनोज्ञादिगणम् आकृतिगणत्वेन स्वीकुर्मः, तेन मनोज्ञादिगणे वृद्धशब्दं पठित्वा द्वितीयसूत्रेण वुञ्प्रत्यये कृते वार्द्धकम् इति रूपं सिद्धं भवति । रघुवंशस्य विविधसंस्करणग्रन्थेषु वार्धके इत्येव पदं पठ्यते न तु वार्द्धके इति । एतयोः किं रूपं साधु इति चेदुच्यते उभयमपि साधु । 'झरो झरि सवर्णे' [अष्टाध्यायी ८.४.६५] इति सूत्रेण वृध्-धातोः धकारस्य विकल्पेन लोपात् रूपद्वयमपि भवति ।

### १.४. चापलाय[४]

चपलस्य कर्म चापलं, तस्मै इति चापलाय इति शब्दस्य विग्रहः । चपलशब्दस्य पाठः युवादिगणे कृतः । अतः 'हायनान्तयुवादिभ्योऽण्' [अष्टाध्यायी ५.१.१३०] इति सूत्रेण चपलशब्दात् अणप्रत्ययः भवति । तेन चापलशब्दः सिद्ध्यति ।

### १.५. वैवस्वतः[५]

विवः तेजः अस्ति अस्य इति विवस्वान् सूर्यः, तस्य विवस्वतः अपत्यं पुमान् इति अपत्यार्थे 'तस्यापत्यम्' [अष्टाध्यायी ४.१.९२] इति सूत्रेण अणप्रत्ययः भवति । वैवस्वतः इति मनुः इति पदस्य विशेषणम् । सः च सप्तमः मनुः । अतः अत्र गोत्रापत्यार्थे अणप्रत्ययः अभूत् ।

### १.६. वृद्धत्वम्[६]

वृद्धस्य भावः वृद्धत्वं, वार्धकम् इत्यर्थः । रघुवंशस्य प्रथमे सर्गे एव वार्धकशब्दस्य प्रयोगः दृश्यते । एतेन ज्ञायते वृद्धशब्दात् भावार्थे वुञ्प्रत्ययः त्वप्रत्ययश्च भवति । वुञ्प्रत्ययेन वार्धकशब्दः सिद्ध्यति, त्वप्रत्ययेन वृद्धत्वशब्दः सिद्ध्यति । अत्र त्वप्रत्ययान्तः वृद्धत्वशब्दः विद्यते । त्वप्रत्ययश्चात्र 'तस्य भावस्त्वतलौ' [अष्टाध्यायी ५.१.११९] इति सूत्रेण विधीयते ।

---

[४] रघूणामन्वयं वक्ष्ये...चापलाय प्रचोदितः ॥ [रघुवंशम् १.९]

[५] वैवस्वतो मनुर्नाम...प्रणवश्छन्दसामिव ॥ [रघुवंशम् १.११]

[६] अनाकृष्टस्य विषयैः...वृद्धत्वं जरसा विना ॥ [रघुवंशम् १.२३]

### १.७. दण्ड्यान् [७]

दण्डम् अर्हन्ति इति दण्ड्याः, तान् इति दण्ड्यान्। अस्मिन् शब्दे तद् अर्हति इत्यर्थे तद्धितप्रत्ययः प्रयुक्तः । मल्लिनाथाचार्येण अत्र यप्रत्ययेन रूपं साधितम्। तेनोक्तम्- "दण्डमर्हन्तीति दण्ड्याः 'दण्डादिभ्यो यः' इति यप्रत्ययः" [८] इति । एतत् सूत्रं केषुचित् अष्टाध्यायीग्रन्थेष्वपि दृश्यते । एवमेव केषुचित् ग्रन्थेषु 'दण्डादिभ्यो यत्' इत्यपि दृश्यते। वस्तुतस्तु एतदुभयमपि समुचितं नास्ति, भाष्यविरोधात्। एतच्च बालमनोरमातत्त्वबोधिनीकारैः स्वग्रन्थेषु प्रतिपादितम्। पाणिनिना 'दण्डादिभ्यः' [अष्टाध्यायी ५.१.६६] इत्येव सूत्रं कृतम्। तर्हि एतेन सूत्रेण कः प्रत्ययः विधीयते इति प्रश्ने उच्यते सूत्रादस्मात् पूर्वं सूत्रं वर्तते 'शीर्षच्छेदाद्यच्च' [अष्टाध्यायी ५.१.६५] इति। अस्मात् यत् इति पदम् उत्तरसूत्रे अनुवर्तते। तेन 'दण्डादिभ्यः' [अष्टाध्यायी ५.१.६६] इति सूत्रेण यत्-प्रत्ययः विधीयते । अतः दण्ड्यान् इति शब्दे दण्ड इत्यस्मात् यत्प्रत्ययः भवति। द्वितीयाबहुवचने च दण्ड्यान् इति रूपं सिद्ध्यति। यप्रत्यययत्प्रत्यययोः स्वरे पार्थक्यम् अस्ति। यत्प्रत्ययश्चेत् 'यतोऽनावः' [अष्टाध्यायी ६.१.२१३] इति सूत्रेण आद्युदात्तः भवति ।यप्रत्ययस्य तित्त्वाभावात् आद्युदात्तस्वरः न स्यात् इत्येव पार्थक्यम् ।

### १.८. परिखीकृतसागराम् [९]

अपरिखाः परिखाः सम्पद्यमानाः कृताः इति परिखीकृताः । परिखीकृताः सागराः यस्याः ताम् इति परिखीकृतसागराम् । अत्र परिखीशब्दे च्विप्रत्ययः विद्यते स च तद्धितः । अत्र च्विप्रत्ययविधायकं सूत्रम् अस्ति 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' [अष्टाध्यायी ५.४.५०] इति। अतः च्विप्रत्ययस्य अभूततद्भावरूपार्थे प्रयुक्तः इति वक्तुं शक्यते। परिखशब्दस्य अकारस्य पुनः 'अस्य च्वौ' [अष्टाध्यायी ७.४.३२] इति सूत्रेण ईकारे परिखीशब्दः सिद्ध्यति ।

### १.९. प्रावृषेण्यम् [१०]

प्रावृट् वर्षाकालः, तस्मिन् प्रावृषि भवः प्रावृषेण्यः । पयोवाहम् इति पदस्य विशेषणम् इदं प्रावृषेण्यम् इति पदम्। अतः प्रावृषेण्यपदस्य मेघः इत्यर्थः । अत्र प्रावृष्-शब्दात् 'प्रावृष एण्यः' [अष्टाध्यायी ४.३.१७] इति

---

[७] स्थित्यै दण्डयतो दण्ड्यान्...धर्म एव मनीषिणः ॥ [रघुवंशम् १.२५]

[८] रघुवंशम्, पृष्ठम् १३ ।

[९] स वेलावप्रवलयां...शशासैकपुरीमिव ॥ [रघुवंशम् १.३०]

[१०] स्निग्धगम्भीरनिर्घोषम्...विद्युदैरावताविव ॥ [रघुवंशम् १.३६]

सूत्रेण एण्यप्रत्ययेन प्रावृषेण्यः इति पदं व्युत्पन्नम् । द्वितीयैकवचने प्रावृषेण्यम् इति रूपं भवति ।

**१.१०. हैयङ्गवीनम्** [११]

विकारार्थे खञ्प्रत्ययान्तमिदं पदम् निपातनेन सिद्ध्यति । अस्य पदस्य तात्पर्यं यत् गोः दोहः गोदोहः, ह्यः गोदोहः इति ह्योगोदोहः, तस्य विकारः इति हैयङ्गवीनम् । अत्र 'हैयङ्गवीनं संज्ञायाम्' [अष्टाध्यायी ५.२.२३] इति सूत्रेण खञ्प्रत्ययः, ह्योगोदोहशब्दस्य च हियङ्गु इति निपातनं क्रियते । ततः खस्य ईनादेशे, आदिवृद्धौ, उकारस्य गुणे, अवादेशादिकार्ये च कृते हैयङ्गवीनम् इति रूपं सिद्ध्यति ।

**१.११. धुर्यान्** [१२]

धूः भारः, तं वहन्ति इति धुर्याः तान् इति अस्य पदस्य विग्रहः । अत्र धुर्यपदस्य अश्वः इत्यर्थः । अत्र तद् वहति इत्यर्थे धुर्-शब्दात् 'धुरो यड्ढकौ' [अष्टाध्यायी ४.४.७७] इति सूत्रेण यत्प्रत्ययेन धुर्यशब्दः सिद्ध्यति । मल्लिनाथः धुर्यान् इत्यस्य 'रथाश्वान्' इति अर्थमवोचत् । अस्मिन्नेव अर्थे यथा यत्प्रत्ययः भवति, तथैव ढक्प्रत्ययोऽपि भवति । तेन धौरेयः इत्यपि प्रयोगः सिद्ध्यति ।

**१.१२. सभ्याः** [१३]

तत्र साधु इत्यर्थे सभायां साधवः इति विग्रहे यप्रत्ययेन सभ्याः शब्दः व्युत्पाद्यते । य-प्रत्ययश्च 'सभाया यः' [अष्टाध्यायी ४.४.१०५] इति सूत्रेण विधीयते । कालिदासः सभ्याः इति शब्दं मुनयः इति पदस्य विशेषणत्वेन प्रायुजत् । मुनीनां साधुत्वप्रदर्शनाय इदं पदम् ।

**१.१३. मागधी** [१४]

मगधस्य अपत्यं स्त्री इत्यर्थे मगधे जाता इत्यर्थे वा मागधी-शब्दः व्युत्पादयितुं शक्यः । मगधस्य अपत्यं स्त्री इत्यर्थे 'द्व्यञ्मगधकलिङ्गसूरमसादण्' [अष्टाध्यायी ४.१.१७०] इति सूत्रेण अण्प्रत्ययेन मागधशब्दः सिद्ध्यति । स्त्रीत्वविवक्षायां च 'जातेरस्त्रीविषयदयोपधात्' [अष्टाध्यायी ४.१.६३] इति सूत्रेण ङीष्प्रत्ययेन मागधी इति रूपं भवति । यदि मगधे जाता इत्यर्थः स्यात् तदा 'तत्र जातः'

---

[११] हैयङ्गवीनमादाय...वन्यानां मार्गशाखिनाम् ॥ [रघुवंशम् १.४५]
[१२] अथ यन्तारमादिश्य...रथादवततार च ॥ [रघुवंशम् १.५४]
[१३] तस्मै सभ्याः सभार्याय...चक्रुर्मुनयो नयचक्षुषे ॥ [रघुवंशम् १.५५]
[१४] तयोर्जगृहतुः पादान्...प्रीत्या प्रतिननन्दतुः ॥ [रघुवंशम् १.५७]

[अष्टाध्यायी ४.३.२५] इति सूत्रेण अण्प्रत्ययेन मागधशब्दः व्युत्पाद्यते। स्त्रीत्वविवक्षायां च ङीष्प्रत्ययेन रूपं सिद्ध्यति। मल्लिनाथः मागधीपदस्य अर्थम् मगधराजपुत्री इत्यवोचत्।

## १.१४. आतिथ्यक्रियाशान्तरथक्षोभपरिश्रमम् [१५]

अस्मिन् शब्दे विद्यमानः आतिथ्यशब्दः तद्धितप्रत्ययान्तः वर्तते। मल्लिनाथेन अस्य पदस्य अर्थः अतिथ्यर्थम् इति उक्तः। तादर्थ्ये ञ्यप्रत्ययेन रूपमिदं सिद्ध्यति। ञ्यप्रत्ययश्च 'अतिथेर्ञ्यः' [अष्टाध्यायी ५.४.२६] इति सूत्रेण भवति। अस्य सम्पूर्णशब्दस्य विग्रहस्तु मल्लिनाथेन एवं प्रदर्शितः- 'आतिथ्यस्य क्रिया तथा सान्तो रथक्षोभेण यः परिश्रमः सः यस्य स तं तथोक्तम्' [१६] इति।

## १.१५. अर्थ्याम् [१७]

अर्थशब्दात् अनपेतार्थे यत्प्रत्ययेन द्वितीयैकवचनविवक्षायाम् अर्थ्याम् इति रूपं सिद्ध्यति। पदञ्चेदं वाचम् इति पदस्य विशेषणम्, अतः वाक्पदस्य स्त्रीत्वात् अत्रापि स्त्रीत्वम्। अर्थाद् अनपेता इति चास्य पदस्य विग्रहः। 'धर्मपथ्यर्थन्यायादनपेते' [अष्टाध्यायी ४.४.९२] इति सूत्रेण अर्थशब्दात् यत्प्रत्ययः विहितः। स्त्रीत्वविवक्षायां च 'अजाद्यतष्टाप्' [अष्टाध्यायी ४.१.४] इति सूत्रेण टापि द्वितीयैकवचनविवक्षायां अम्प्रत्यये च अर्थ्याम् इति रूपं सिद्ध्यति।

## १.१६. दैवीनाम् [१८]

मल्लिनाथेन शब्दस्यास्य अर्थः 'देवेभ्य आगतानाम्' [१९] इत्यवाचि। अतः वक्तुं शक्यते यत् अत्र तत आगतः इत्यर्थे तद्धितप्रत्ययः जातः। अत्र देवशब्दात् 'तत आगतः' [अष्टाध्यायी ४.३.७४] इति सूत्रेण आगतार्थे अण्प्रत्ययः विहितः। तेन दैवशब्दः सिद्ध्यति। अण्प्रत्ययान्तत्वादस्य स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' [अष्टाध्यायी ४.१.१५] इति सूत्रेण ङीपि षष्ठीबहुवचनविवक्षायां दैवीनाम् इति पदं सिद्ध्यति।

---

१५ तमातिथ्यक्रियाशान्त...राज्याश्रममुनिं मुनिः॥ [रघुवंशम् १.५८]
१६ रघुवंशम्, पृष्ठम् २७।
१७ अथाथर्वनिधेस्तस्य...माददे वदतां वरः॥ [रघुवंशम् १.५९]
१८ उपपन्नं ननु शिवं...प्रतिहर्ता त्वमापदाम्॥ [रघुवंशम् १.६०]
१९ रघुवंशम्, पृष्ठम् २८।

### १.१७. मानुषीणाम् [२०]

रघुवंशस्य यस्मिन् श्लोके दैवीनाम् इति शब्दः पठितः तस्मिन्नेव श्लोके मानुषीणाम् इत्यपि शब्दः प्राप्यते । अयमपि तद्धितान्तः । अत्रापि तत आगतार्थे अण्प्रत्ययः विहितः । अण्प्रत्ययविधायकं सूत्रञ्च 'तत आगतः' [अष्टाध्यायी ४.३.७४] इत्येव । मनुष्येभ्यः आगतानाम् इति विग्रहे अण्प्रत्ययेन मानुषीणाम् इति रूपं सिद्ध्यति । मनुष्यशब्दस्य अणि परे आदिवृद्धौ अकारयकारयोः लोपे मानुषशब्दः व्युत्पाद्यते स्त्रीत्वविवक्षायां ङीपि च मानुषी इति रूपं भवति ।

### १.१८. विधिवत् [२१]

विधिमर्हति इत्यस्मिन् अर्थे विधिशब्दात् वतिप्रत्ययेन विधिवत् इति शब्दः व्युत्पाद्यते । अत्र वतिप्रत्ययस्य तुल्यार्थताभावात् 'तेन तुल्यं क्रिया चेद्वतिः' [अष्टाध्यायी ५.१.११५] इति सूत्रस्य प्रसक्तिः नास्ति । अपि तु तदुत्तरसूत्रेण 'तदर्हम्' [अष्टाध्यायी ५.१.११७] इति सूत्रेण अत्र वतिप्रत्ययः क्रियते चेदेव शब्दस्यास्य अर्थः सङ्गच्छते । वतिप्रत्ययान्तत्वात् विधिवत् इति शब्दस्य 'तद्धितश्चासर्वविभक्तिः' [अष्टाध्यायी १.१.३८] इति सूत्रेण अव्ययसंज्ञा भवति । तेन सुब्लुक् भवति ।

### १.१९. पुरुषायुषजीविन्यः [२२]

पुरुषस्य आयुः इति पुरुषायुषम् इति षष्ठीतत्पुरुषसमासः । पुरुषायुषं जीवन्ति याः ताः पुरुषायुषजीविन्यः । अत्र पुरुषायुषशब्दे विद्यते समासान्तः अच्प्रत्ययः स च तद्धितः । अत्र 'अचतुरविचतुरसुचतुरस्त्रीपुंस-धेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिव-सरजनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः' [अष्टाध्यायी ५.४.७७] इति सूत्रेण अच्प्रत्ययः निपात्यते । तेनैव पुरुषायुषशब्दः सिद्ध्यति ।

### १.२०. मदीयाः [२३]

ममेदम् इत्यस्मिन् विग्रहे तस्येदम् इत्यर्थे छप्रत्ययेन मदीयशब्दः निष्पद्यते । प्रजाः इत्यस्य विशेषणत्वात् मदीयशब्दस्यापि प्रयोगः स्त्रीलिङ्गे प्रथमाबहुवचने च भवति । अतः मदीयाः इति शब्दस्य विग्रहः भवति मम

---

[२०] उपपन्नं ननु शिवं...प्रतिहर्ता त्वमापदाम् ॥ [रघुवंशम् १.६०]

[२१] हविरावर्जितं होतस्...मवग्रहविशोषिणाम् ॥ [रघुवंशम् १.६२]

[२२] पुरुषायुषजीविन्यो...हेतुस्त्वद्ब्रह्मवर्चसम् ॥ [रघुवंशम् १.६३]

[२३] तत्रैव

इमाः इति । अत्र अस्मच्छब्दात् छप्रत्ययः विहितः 'वृद्धाच्छः' [अष्टाध्यायी ४.२.११४] इति सूत्रेण । अस्मच्छब्दस्य वृद्धसंज्ञा विधीयते 'त्यदादीनि च' [अष्टाध्यायी १.१.७४] इति सूत्रेण । छस्य ईयादेशे, तस्मिन् परे अस्मच्छब्दस्थस्य अस्म् इत्यस्य स्थाने मादेशः क्रियते 'प्रत्ययोत्तरपदयोश्च' [अष्टाध्यायी ७.२.९८] इति सूत्रेण । एवम्प्रकारेण मदीयाः इति शब्दः व्युत्पादितः ।

### १.२१. ब्रह्मवर्चसम् [२४]

ब्रह्मणः वर्चः इति ब्रह्मवर्चसम् । अत्र च षष्ठीतत्पुरुषसमासः विद्यते । अयं ब्रह्मवर्चसशब्दः समासान्तेन अच्प्रत्ययेन निष्पन्नः । अच्प्रत्ययश्चात्र 'ब्रह्महस्तिभ्यां वर्चसः' [अष्टाध्यायी ५.४.७८] इति सूत्रेण विधीयते । क्लीबलिङ्गे प्रथमैकवचनविवक्षायां च ब्रह्मवर्चसम् इति रूपं भवति ।

### १.२२. मत्तः [२५]

अस्मात् इत्यर्थे अस्मद् इति सर्वनाम्नः तसिल्प्रत्यये मत्तः इति रूपं सिद्ध्यति । तसिल्प्रत्ययश्च 'पञ्चम्यास्तसिल्' [अष्टाध्यायी ५.३.७] इति सूत्रेण विधीयते । तसिल्प्रत्ययस्य तस्मात्रम् अवशिष्यते, अस्मच्छब्दस्थस्य अस्म् इत्यस्य स्थाने मादेशे चर्त्वादिकार्ये च कृते मत्तः इति रूपं भवति । तसिल्प्रत्ययः अन्ते विद्यते इति कारणात् मत्तः इति शब्दस्य अव्ययसंज्ञा भवति 'तद्धितश्चासर्वविभक्तिः' [अष्टाध्यायी १.१.३८] इति सूत्रेण । तस्माच्च 'अव्ययादाप्सुपः' [अष्टाध्यायी २.४.८२] इति सूत्रेण आपः सुपश्च लुक् भवति ।

### १.२३. वंश्याः [२६]

तत्र भवः इत्यस्मिन् अर्थे वंशशब्दात् यत्प्रत्यये वंश्यशब्दः भवति । वंश्याः इति पदस्य विग्रहश्च वंशे भवाः इति । अस्य वंशोद्भवाः पितरः इत्यर्थः । वंशशब्दात् 'दिगादिभ्यो यत्' [अष्टाध्यायी ४.३.५४] इति सूत्रेण भवार्थे यत्प्रत्ययः विहितः अत्र । अस्य शब्दस्य इव शुद्धवंश्या इति शब्दः अपि अस्मिन् सर्गे नवषष्टितमे श्लोके पठितः ।

### १.२४. परत्र [२७]

परस्मिन् इत्यर्थे परत्रशब्दः विद्यते । सप्तम्यन्तात् परशब्दात्

---

२४ पुरुषायुषजीविन्यो...हेतुस्त्वद्ब्रह्मवर्चसम् ॥ [रघुवंशम् १.६३]

२५ नूनं मत्तः परं वंश्याः...स्वधासंग्रहतत्पराः ॥ [रघुवंशम् १.६६]

२६ तत्रैव

२७ लोकान्तरसुखं पुण्यं...परत्रेह च शर्मणे ॥ [रघुवंशम् १.६९]

स्वार्थे त्रल्प्रत्ययः विधीयते 'सप्तम्यास्त्रल्' [अष्टाध्यायी ५.३.१०] इति सूत्रेण । त्रल्प्रत्ययस्य त्रमात्रमवशिष्यते । त्रल्प्रत्ययान्तत्वाच्च परत्रशब्दस्य 'तद्धितश्चासर्वविभक्तिः' [अष्टाध्यायी १.१.३८] इति सूत्रेण अव्ययसंज्ञा भवति । तेन आब्लुक्, सुब्लुक् च भविष्यति ।

### १.२५. आश्रमवृक्षकम् [२८]

आश्रमस्य वृक्षकम् इति आश्रमवृक्षकम् । षष्ठीतत्पुरुषसमासश्चात्र विराजते । आश्रमवृक्षकशब्दस्थ-वृक्षकशब्दे तद्धितप्रत्ययः विलसति । वृक्षकम् इत्यस्य अर्थः वृक्षपोतमिव इत्यवाचि मल्लिनाथेन । अतः अत्र इवार्थे तद्धितप्रत्ययः जातः इत्यवगम्यते । अत्र वृक्षशब्दात् 'संज्ञायां च' [अष्टाध्यायी ५.३.९७] इति सूत्रेण इवार्थे कन्प्रत्ययः जातः । वृक्षकम् इति संज्ञा अस्ति चेदेव एतेन कन्प्रत्ययः विधीयते । वृक्षकम् इति तु संज्ञा एव, अतोऽत्र कन्प्रत्ययः ।

### १.२६. इक्ष्वाकूणाम् [२९]

इक्ष्वाकोः अपत्यम् पुमान् इत्यस्मिन् अर्थे ऐक्ष्वाकशब्दः भवति । इक्ष्वाकुशब्दात् 'जनपदशब्दात् क्षत्रियादञ्' [अष्टाध्यायी ४.१.१६८] इति सूत्रेण अञ्प्रत्ययः भवति । अञ्प्रत्ययस्य पुनः 'ते तद्राजाः' [अष्टाध्यायी ४.१.१७४] इति सूत्रेण तद्राजसंज्ञा वर्तते । अतः यदा बहुवचनविवक्षा क्रियते तदा 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' [अष्टाध्यायी २.४.६२] इत्यनेन तद्राजप्रत्ययस्य लुक् क्रियते । तेन इक्ष्वाकु इति शब्दः एव अवशिष्यते, ततः बहुवचनविभक्तौ तत्तद्रूपाणि भवन्ति । अत्र इक्ष्वाकोः अपत्यानि, तेषाम् इत्यर्थः इक्ष्वाकूणाम् इति शब्दस्य । अस्मिन् शब्दे बहुवचनविवक्षा अस्ति, अतः अञ्प्रत्ययस्य लुक् भवति ।

### १.२७. क्षणमात्रम् [३०]

क्षणं प्रमाणमस्य, तत् क्षणमात्रम् । क्षणात्मककालः अस्य प्रमाणम् अस्ति इत्यर्थः । क्षणशब्दात् प्रमाणार्थे 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' [अष्टाध्यायी ५.२.३७] इति सूत्रेण मात्रच्प्रत्यये क्षणमात्रम् इति पदं व्युत्पाद्यते । सूत्रस्यास्य तद्धिताधिकारे पाठात् मात्रच्प्रत्ययः तद्धितप्रत्ययः इत्युच्यते ।

---

[२८] तया हीनं विधातर्मा...बन्ध्यमाश्रमवृक्षकम् ॥ [रघुवंशम् १.७०]

[२९] तस्मान्मुच्ये यथा तात...त्वदधीना हि सिद्धयः ॥ [रघुवंशम् १.७२]

[३०] इति विज्ञापितो राज्ञा...सुप्तमीन इव ह्रदः ॥ [रघुवंशम् १.७३]

## १.२८. तदीयाम् [३१]

तस्य इयं, ताम् इत्यस्मिन् विग्रहे छप्रत्ययेन तदीयशब्दः व्युत्पाद्यते । अतः तदीयशब्दस्थः छप्रत्ययः तस्येदम् इत्यर्थे विहितः । पदमिदं सुताम् इत्यस्य विशेषणम् अस्ति । अतः स्त्रीलिङ्गे द्वितीयैकवचने अस्य शब्दस्य प्रयोगः अकारि । तत्सर्वनाम्नः वृद्धसंज्ञकत्वात् ततः 'वृद्धाच्छः' [अष्टाध्यायी ४.२.११४] इति सूत्रेण छप्रत्ययः विहितः । छस्य ईयादेशे स्त्रीलिङ्गद्वितीयैकवचनविवक्षायां तदीयाम् इति रूपं सिद्ध्यति ।

## १.२९. कुण्डोध्नी [३२]

कुण्डम् ऊधः यस्याः सा इति विग्रहः कुण्डोध्नीपदस्य । अत्र बहुव्रीहिसमासः वर्तते । अस्मिन् पदे ऊधस् इति शब्दस्य अनाङादेशः क्रियते 'ऊधसोऽनङ्' [अष्टाध्यायी ५.४.१३१] इति सूत्रेण । अस्य सूत्रस्य तद्धिताधिकारे पाठात् अनङः तद्धितत्वं वक्तुं शक्यते । तथापि बालमनोरमाकारेण अस्य ङित्त्वात् अन्त्यादेशत्वं स्वीक्रियते । स्त्रीत्वे ङीषि च रूपं सिद्ध्यति ।

## १.३०. वन्यवृत्तिः [३३]

वन्यवृत्तिशब्दस्थः वन्यशब्दः तद्धितान्तः । शब्दस्यास्य विग्रहः भवति वने भवं वन्यं, वन्यानां वृत्तिः इव वृत्तिः यस्य सः वन्यवृत्तिः । बहुव्रीहिसमासः अत्र विद्यते । तत्र भवः इत्यस्मिन् अर्थे वनशब्दात् यत्प्रत्ययेन वन्यशब्दः सिद्ध्यति । अस्य भवार्थत्वञ्च मल्लिनाथेन स्वीकृतम् । परन्तु प्रश्नः भवति भवार्थे यत्प्रत्ययः केन विहितः इति । भवार्थे यत्प्रत्ययविधायकं सूत्रत्रयं विद्यते । तानि च 'दिगादिभ्यो यत्' [अष्टाध्यायी ४.३.५४], 'शरीरावयवाच्च' [अष्टाध्यायी ४.३.५५], 'छन्दसो यदणौ' [अष्टाध्यायी ४.३.७१] इति च । एतेषु कतमेन सूत्रेण वनशब्दात् यत्प्रत्ययः इत्यपि प्रश्नः तिष्ठति । प्रथमेन सूत्रेण यत्प्रत्ययः भवितुं नार्हति, दिगादिगणे वनशब्दस्य पाठाभावात् । द्वितीयसूत्रेणापि भवितुं नार्हति वनशब्दस्य शरीरावयवत्वाभावात् । तृतीयसूत्रेणापि यत्प्रत्ययः भवितुं नार्हति तत्र केवलं छन्दस्-शब्दात् एव यत्प्रत्ययस्य उक्तत्वात् । तर्हि केन सूत्रेण वनशब्दात् यत्प्रत्ययः भवति इति प्रश्ने उच्यते प्रथमसूत्रेण भवितुम् अर्हति । यद्यपि दिगादिगणे वनशब्दस्य पाठः नास्ति, तथापि दिगादिगणः आकृतिगणः इत्युच्यते चेत् वनशब्दात् यत्प्रत्ययः सङ्गच्छते । अतः भवार्थे

---

[३१] सुतां तदीयां सुरभेः...प्रीता कामदुघा हि सा ॥ [रघुवंशम् १.८१]

[३२] भुवं कोष्णेन कुण्डोध्नी...वत्सालोकप्रवर्तिना ॥ [रघुवंशम् १.८४]

[३३] वन्यवृत्तिरिमां शश्वत्...प्रसादयितुमर्हसि ॥ [रघुवंशम् १.८८]

यत्प्रत्ययः 'दिगादिभ्यो यत्' [अष्टाध्यायी ४.३.५४]इति सूत्रेण भवति इति वक्तुं शक्यते ।

## २. उपसंहारः

रघुवंशे प्रथमसर्गे विद्यमानानां मत्वर्थभिन्नानां तद्धितान्तशब्दानां व्याख्यानं कृतमत्र । त्रिंशत्-शब्दाः च व्याख्याताः । एतेषु चत्वारः शब्दाः तस्य भावः इत्यस्मिन् अर्थे प्रयुक्ताः । तस्य कर्म इत्यस्मिन् अर्थे एकः शब्दः प्रयुक्तः । मागधी-शब्दः अपत्यार्थे अन्तर्भाव्यते चेत् अपत्यार्थे त्रयः शब्दाः प्रयुक्ताः भवति । अन्यथा द्वौ शब्दौ अपत्यार्थे, एकः शब्दः च तत्र जातः इत्यस्मिन् अर्थे प्रयुक्तः । तत्र भवः इत्यस्मिन् अर्थे त्रयः शब्दाः प्रायुक्षत । तत आगतः इत्यस्मिन् अर्थे द्वौ शब्दौ प्रायुक्षाताम् । तत्र साधु, तद् अर्हति, तद् वहति, अभूततद्भावः, तस्य विकारः, तदर्हं, तदस्य प्रमाणं, तादर्थ्यम्, अनपेतम् इत्येतेषु अर्थेषु एकैकः शब्दः प्रायोजि कालिदासेन । तथैव तस्येदम् इत्यस्मिन् अर्थे द्वौ शब्दौ वर्तेते । एवं स्वार्थे एकः प्रत्ययः, पञ्चम्यर्थे एकः प्रत्ययः, सप्तम्यर्थे च एकः प्रत्ययः प्रयुक्तः । समासान्ताः त्रयः प्रत्ययाः प्रयुक्ताः, तेषु एकः आदेशस्वरूपः ।

एवमेव षट् अण्प्रत्ययाः अस्मिन् सर्गे प्रयुक्ताः । पञ्च यत्प्रत्ययाः प्रायुक्षत । द्वौ छप्रत्ययौ प्रदर्शितौ । स्थानद्वये अञ्प्रत्ययः प्रयुक्तः । तयोः मध्ये एकत्र अञ्प्रत्ययस्य लुक् अपि जातः । समासान्तः अच्प्रत्ययोऽपि स्थानद्वये प्रदर्शितः । एकत्र च अनङादेशः प्रदर्शितः । एकैकस्मिन् शब्दे वुञ्प्रत्ययः, त्वप्रत्ययः, च्विप्रत्ययः, एण्यप्रत्ययः, खञ्प्रत्ययः, यप्रत्ययः, ञ्यप्रत्ययः, वतिप्रत्ययः, तसिल्प्रत्ययः, त्रल्प्रत्ययः, कन्प्रत्ययः, मात्रच्प्रत्ययश्च प्रदर्शितः अस्मिन् प्रबन्धे इति शम् ।

✶✶✶

## Bibliography


1. *अष्टाध्यायीसूत्रपाठः* (दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः) ; पाणिनिः ; पुष्पादीक्षितः ; संस्कृतभारती ; नवदेहली ; २०१०
2. *रघुवंशम्* (मल्लिनाथकृत-सञ्जीवनी-व्याख्या-समलङ्कृतं तथैव च चन्द्रकला-हिन्दीव्याख्योपेतम्) ; कालिदासः ; कृष्णमणि-त्रिपाठी ; चौखम्बा सुरभारती प्रकाशन ; वारणसी ; २०१४
3. *रघुवंशमहाकाव्यम्* (महामहोपाध्यायमल्लिनाथप्रणीत-सञ्जीवनीसंस्कृतहरिप्रियाहिन्दी-व्याख्योपेतम्) ;

कालिदासः ; रामचन्द्रझा (सम्पादकः) ; लक्ष्मीप्रपन्नाचार्यः (हिन्दीव्याख्याकारः) ; कृष्णदास अकादमी ; वाराणसी ; २००२

4. *वैयाकरणसिद्धान्तकौमुदी* (चतुर्थो भागः) ; भट्टोजिदीक्षितः ; गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पादकौ) ; मोतीलाल बनारसीदास इंटरनेशनल ; दिल्ली ; २०२१
5. *वैयाकरणसिद्धान्तकौमुदी* (श्रीधरमुखोल्लासिनी-हिन्दीव्याख्यासमन्विता, तद्धितप्रकरणम्) ; भट्टोजिदीक्षितः ; लक्ष्मीशर्मा (सम्पादिका) ; गोविन्दाचार्यः (व्याख्याकारः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०२०
6. *संस्कृतसाहित्येतिहासः* ; रामचन्द्रमिश्रः ; चौखम्बा विद्याभवन ; वाराणसी ; २०१३

✳ ✳ ✳

# पेशलदेवकृतसमासदर्पणग्रन्थस्य परिशीलनम्

**तुहिनमण्डलः** *


## Abstract

[पृथक् पृथक् अर्थोपस्थापकत्वेन दृष्टानां पदानामेकार्थोपस्थितिजनकम् एकार्थीभावरूपं समसनं भवति समासः। संस्कृतव्याकरणे केवलसमासः, अव्ययीभावः, द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः चेति भेदेन समासः पञ्चविधः इति प्रसिद्धिः। समग्रसमासप्रपञ्चं महर्षिपाणिनिना सूत्ररूपेण ग्रथितं स्वकृते अष्टाध्यायीग्रन्थे। स्वशैल्या इदमेव प्रकरणम् आर्याछन्दसा सरसतया कारिकारूपेण रचितम् आचार्यपेशलदेवेन समासदर्पणाख्ये समासस्य दर्पणभूते ग्रन्थे। पञ्चविधसमासानां पुनः प्रभेदान् स्वीकृत्य मुख्यतया आहत्य प्रायः चतुर्विंशतिः भेदाः प्राप्यन्ते समासस्य इति समासदर्पणकारस्य मतम्। ते भेदाः यथाक्रमम्- अष्टधा तत्पुरुषः (सप्तविभक्तीनां सप्त समासाः नञ्समासश्च), अष्टधा कर्मधारयः (विशेषणपूर्वपदः विशेषणोत्तरपदः, विशेषणोभयपदः, उपमानपूर्वपदः, उपमानोत्तरपदः, अवधारणापूर्वपदः, कुगतिप्रादयः, उपपदसमासः), एकधा द्विगुः, द्विधा बहुव्रीहिः (सामान्यः, विशेषश्च), त्रिविधः द्वन्द्वः (इतरेतरः, समाहारः, एकशेषश्च), द्विविधः अव्ययीभावः (सामान्यः, विशेषश्च) इति। सप्तदशकारिकाभिः समासस्य एते सर्वे प्रकाराः अत्र उक्ताः। ग्रन्थादौ ग्रन्थान्ते च मङ्गलश्लोकद्वयं स्वीकृत्य साकल्येन ऊनविंशतिः श्लोकाः विद्यन्ते अस्मिन् ग्रन्थे। अस्य ग्रन्थस्य यथामति परिशीलनम् अत्र विधीयते।]


### ०. नामकरणम्

समासस्य दर्पणं समासदर्पणम् इति षष्ठीसमासनिष्पन्नोऽयं शब्दः। लोके दर्पणेन यथा स्वप्रतिविम्बम् अनायासेन द्रष्टुं शक्यते तथैव अस्मिन् ग्रन्थे समासस्य सम्पूर्णं स्वरूपं सुखेन ज्ञातुं शक्यते। तत्रापि च समासस्य ये मुख्यांशाः ते अतीव रमणीयतया श्लोकरूपेण अत्र उपस्थापिताः।

### १. मङ्गलाचरणम्

अस्मिन् ग्रन्थे आचार्यपेशलदेवेन स्वगुरोः प्रणामरूपं मङ्गलम् आचरितम्। तथाहि मङ्गलाचरणम्–

> गुरुपादपद्मजातामवगाह्य ज्ञानजाह्नवीं विमलाम्।
> सुखबोधाय शिशूनां रचयामि समासदर्पणं सम्यक् ॥१॥ इति।

अर्थात् गुरुपादपद्मजातां विमलां ज्ञानजाह्नवीम् सम्यक् अवगाह्य शिशूनां

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशाक्षणिकशोधसंस्थाने

सुखबोधाय (अहं पेशलदेवः) समसदर्पणं रचयामि इति । अत्र मङ्गलाचरणे गुरोः नमस्कारेण सह ग्रन्थस्य वस्तुनिर्देशोऽपि विहितः । अस्मिन् ग्रन्थे समासः एव विषयः इति । तज्जिज्ञासुरत्र अधिकारी । ग्रन्थेन सह विषयस्य प्रतिपाद्य-प्रतिपादकसम्बन्धः । किञ्च शिशूनां समासविषये सुखेन बोधः अत्र फलम् ।

## २. समासस्य भेदाः

मङ्गलाचरणात् परं समासविषये आदौ उच्यते पेशलदेवेन–

द्विविधः समास उक्तः सामान्यो विशेषकश्चेति ।
सामान्यो विज्ञेयः सुबन्ततः केवलं सुबन्तेन ॥२ ॥ इति ।

अर्थात् आदौ समासः द्विधा विभज्यते, सामान्यः विशेषश्च । सुबन्तेन सह सुबन्तस्य यः समासः भवति स सामान्यसमासः । पाणिनीयव्याकरणे अयं केवलसमासः इत्युच्यते । अस्योदाहरणं यथा पूर्वं भूतः इति विग्रहे भूतपूर्वः इति समासः । अपरः भवति विशेषसमासः । स च चतुर्धा विभज्यते । तद्विषये कारिका–

विशेषकस्तु चतुर्धा तत्पुरुषोऽथ बहुव्रीहिश्च ।
द्वन्द्वस्तृतीय उक्तस्तथा चतुर्थोऽव्ययीभावः ॥३ ॥ इति ।

अर्थात् विशेषसमासः चतुर्विधः । स च यथाक्रमं तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः, अव्ययीभावः इति ।

### २.१. तत्पुरुषः

तत्रादौ तत्पुरुषविषये कारिका उच्यते–

तत्पुरुषोऽपि द्विविधः सामान्यो विशेषकश्चेति ।
अष्टविधः सामान्यः सप्तविभक्तीनामथ नञश्चापि ॥४ ॥ इति ।

अर्थात् तत्पुरुषस्य सामान्यः विशेषः इति द्विधा भेदः क्रियते । तत्रापि सामान्यस्य अष्टौ भेदाः इति उच्यते । के च ते इति चेत् सप्तविभक्तीनां सप्त समासाः, किञ्च नञ्समासः इति भवति तत्पुरुषस्य अष्टौ सामान्यभेदाः । एतेषु प्रथमातत्पुरुषस्य उदाहरणं भवति पूर्वं कायस्य पूर्वकायः इति । द्वितीयातत्पुरुषस्य उदाहरणं भवति कृष्णं श्रितः कृष्णश्रितः इति । तृतीयातत्पुरुषस्य उदाहरणं भवति शङ्कुलया खण्डः शङ्कुलाखण्डः इति । चतुर्थीतत्पुरुषस्य उदाहरणं भवति यूपाय दारु यूपदारु इति । पञ्चमीतत्पुरुषस्य उदाहरणं भवति चोरात् भयम् चोरभयम् इति । षष्ठीतत्पुरुषस्य उदाहरणं भवति राज्ञः पुरुषः राजपुरुषः इति । सप्तमीतत्पुरुषस्य उदाहरणं भवति

अक्षेषु शौण्डः अक्षशौण्डः इति । नञ्तत्पुरुषस्य उदाहरणं भवति न ब्राह्मणः अब्राह्मणः इति । एवम् अष्टविधः सामान्यतत्पुरुषः ।

अनन्तरं तत्पुरुषस्य विशेषभेदविषये उच्यते विशेषः द्विविधः कर्मधारयः द्विगुश्च ।

### २.१.१. कर्मधारयः

कर्मधारयसमासविषये कारिकाः उक्ताः आचार्येण–

द्विविधो विशेष उक्तः कर्मधारयोऽथ द्विगुश्चापि ।
यः समानाधिकरणः कर्मधारयः स विज्ञेयः ॥५ ॥
संख्यावाचकपूर्वो यः स द्विगुश्च समाख्यातः ।
प्रथमस्त्वष्टविधः स्याद्विशेषणपुरःपदश्चाद्यः ॥६ ॥
विशेषणोत्तरपदोऽथ विशेषणोभयपदश्चापि ।
उपमानपूर्वपदकश्चोपमानोत्तरपदश्चैव ॥७ ॥
वधारणापूर्वपदः कुगतिप्रादिक उपपदश्चैव । इति ।

अत्र आचार्यपेशलदेवेन कर्मधारयस्य द्विगोश्च स्वरूपं प्रकाराश्च उक्ताः । तथाहि यः समासः समानाधिकरणः स भवति कर्मधारयः । यश्च संख्यापूर्वः स भवति द्विगुः । एतद्विषये पाणिनीयं सूत्रमस्ति- 'तत्पुरुषः समानाधिकरणः कर्मधारयः' [अष्टाध्यायी १.२.४२] इति । किञ्च 'संख्यापूर्वो द्विगुः' [अष्टाध्यायी २.१.५२] इति । तत्र प्रथमः कर्मधारयसमासः अष्टविधः । के च ते इति चेत् आदौ विशेषणपूर्वपदः । यथा महांश्चासौ राजा च इति महाराजः । द्वितीयः भवति विशेषणोत्तरपदः । यथा ब्राह्मणश्चासौ बालश्च इति ब्राह्मणबालः । तृतीयः भवति विशेषणोभयपदः । यथा मन्दश्चासौ शीतलश्च इति मन्दशीतलः । चतुर्थः भवति उपमानपूर्वपदः । यथा मेघः इव श्यामः इति मेघश्यामः । पञ्चमः भवति उपमानोत्तरपदः । यथा पुरुषः व्याघ्र इव इति पुरुषव्याघ्रः इति । षष्ठः भवति अवधारणापूर्वपदः । यथा गुरुः एव देवः इति गुरुदेवः । सप्तमः भवति कुगतिप्रादिकः इति । अत्र त्रिविधाः समासाः युगपत् उक्ताः । तथाहि कुसमासः यथा कुत्सितः राजा कुराजा इति । गतिसमासस्य उदाहरणं भवति अशुक्लं शुक्लं करोति इति शुक्लीकरोति इति । प्रादिसमासस्य उदाहरणं भवति प्रगतः आचार्यः प्राचार्यः इति । अष्टमः भवति उपपदसमासः । यथा कुम्भं करोति इति कुम्भकारः इति । इति कर्मधारयः ।

### २.१.२. द्विगुः

द्विगुसमासविषये कारिकायामुक्तं–

संख्यावाचकपूर्वो यः स द्विगुश्च समाख्यातः । इति ।

अर्थात् यस्य समासस्य पूर्वपदं संख्या भवति स द्विगुसमास इत्युच्यते । यथा पञ्चानां गवां समाहारः पञ्चगवम् इति ।

### २.२. बहुव्रीहिः

तत्पुरुषस्य सर्वान् भेदान् उक्त्वा इदानीं बहुव्रीहिसमासं वदति । तथाहि कारिका–

बहुव्रीहिर्द्विधा स्यात्सामान्यो विशेषकश्चेति ॥८ ॥
षोढा सामान्यः स्याद्द्वितीयादिविभक्तिभिश्चैव । इति ।

अर्थात् बहुव्रीहिसमासः द्विविधः सामान्यः विशेषश्च । तत्र समान्यसमासः षड्विधः । कथमिति चेत् द्वितीयादिविभक्तिभिः इति । अर्थात् द्वितीयातः सप्तमीपर्यन्तं षड्विभक्तीनां षट् समासाः । तत्र द्वितीयाबहुव्रीहेः उदाहरणं भवति यथा प्राप्तम् उदकं यं सः प्राप्तोदकः । तृतीयाबहुव्रीहेः उदाहरणं भवति ऊढः रथः येन स ऊढरथः । चतुर्थीबहुव्रीहेः उदाहरणं भवति दत्तं सूपं यस्मै स दत्तसूपः । पञ्चमीबहुव्रीहेः उदाहरणं भवति उद्धृतं धनं यस्मात् तत् उद्धृतधनम् । षष्ठीबहुव्रीहेः उदाहरणं भवति पीतम् अम्बरं यस्य स पीताम्बरः इति । सप्तमीबहुव्रीहेः उदाहरणं भवति पुष्पिता द्रुमा यस्मिन् तत् पुष्पितद्रुमं वनम् इति ।

इदानीं बहुव्रीहेः विशेषभेदान् वदति–

विशेषकः पञ्चविधः प्रोक्तः संख्योत्तरपदश्चैकः ॥९ ॥
संख्योभयपदयुक्तो व्यतिहाररूपकश्चापि ।
दिगन्तरालरूपः सहपूर्वपदो विज्ञेयः ॥१० ॥ इति ।

अर्थात् विशेषः बहुव्रीहिः पञ्चविधः । तत्रादौ संख्योत्तरपदबहुव्रीहिः । यथा दशानां समीपे ये सन्ति ते उपदशाः इति । द्वितीयः भवति संख्योभयपदबहुव्रीहिः यथा- द्वौ वा त्रयो वा द्वित्राः इति । तृतीयः भवति व्यतिहारलक्षणबहुव्रीहिः । यथा– केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति केशाकेशि इति । चतुर्थः भवति– दिगन्तराललक्षणो बहुव्रीहिः यथा- पूर्वस्याः उत्तरस्याः च यदन्तरालं तत् पूर्वोत्तरा इति । पञ्चमः भवति सहपूर्वपदबहुव्रीहिः । यथा– सह पुत्रेण वर्तते इति सपुत्रः इति ।

अत्रावधेयं यत् उपमानपूर्वपदबहुव्रीहिः किञ्च प्रादिबहुव्रीहिः इत्यादेः परिगणनं यद्यपि पृथक्तया न कृतं समासदर्पणे तथापि सामान्यबहुव्रीहौ एव तेषाम् अन्तर्भावः स्वीकर्तव्यः । यथा चन्द्र इव मुखं यस्य इति चन्द्रमुखः

इत्यस्य षष्ठीबहुव्रीहौ अन्तर्भावः इति स्वीकार्यः । बहुव्रीहिसमासविधानाय मुख्यं पाणिनीयसूत्रं भवति 'अनेकमन्यपदार्थे' [अष्टाध्यायी २.२.२४] इति ।

### २.३. द्वन्द्वः

बहुव्रीहिम् उक्त्वा इदानीं द्वन्द्वसमासविषये उच्यते । तद्विषये कारिका–

द्वन्द्वोऽपि त्रिविधः स्यादितरेतरसमाहारैकशेषाः । इति ।

अर्थात् द्वन्द्वसमासस्य त्रयः भेदाः । इतरेतरः, समाहारः, एकशेषश्च । तत्र इतरेतरस्य उदाहरणं भवति– धवश्च खदिरश्च धवखदिरौ इति । समाहारस्य उदाहरणं तावत् संज्ञा च परिभाषा च संज्ञापरिभाषम् इति । एकशेषस्य उदाहरणं भवति माता च पिता च पितरौ इति ।

द्वन्द्वसमासविधायकं पाणिनीयं सूत्रं भवति चार्थे द्वन्द्वः इति । चतुर्षु चार्थेषु[१] इतरेतरसमाहारयोः एव समासः विधीयते । एकशेषस्तु आभ्यां न कोऽपि विशेषः प्रकारः । समासाद् भिन्नः वृत्तिविशेषः एकशेषः । समासदृष्ट्या इतरेतरद्वन्द्वे एव तस्य अन्तर्भावः स्यात् तथापि समासदर्पणे एकशेषस्य द्वन्द्वसमासस्य पृथक् प्रकारत्वेन ग्रहणं कृतम् ।

### २.४. अव्ययीभावः

इदानीम् अन्तिमः प्रकारः अव्ययीभावः । अव्ययीभावविषये उच्यते–

द्वेधाव्ययीभावोऽपि सामान्यो विशेषकश्चेति ॥११ ॥
सामान्यो विज्ञेयः समर्थेन समासादव्ययस्य । इति ।

अर्थात् अव्ययीभावोऽपि द्विधा विभक्तः सामान्यो विशेषश्च । सामान्यः अव्ययीभावः कः इति चेत् उक्तं समर्थेन समासाद् अव्ययस्य इति । अर्थात् अव्ययस्य समर्थेन सुबन्तेन सह समासः भवति सामान्यः अव्ययीभावः । अस्य उदाहरणं भवति– दिशोर्मध्ये अपदिशम् इति ।

अनन्तरम् अव्ययीभावस्य विशेषप्रकाराः उक्ताः–

विशेषो विभक्त्यर्थे समीपार्थे तथैव समृद्ध्यर्थे ॥१२ ॥
वृद्ध्यर्थेऽभावार्थेऽत्ययार्थे च साम्प्रते चैव ।
शब्दप्रादुर्भावे पश्चादर्थे तथा याथार्थे च ॥१३ ॥
आनुपूर्व्ये तथैव च यौगपद्यार्थे च सादृश्यार्थे ।
सम्पत्यर्थे च तथा साकल्येऽन्तार्थे चाव्ययमात्रम् ॥१४ ॥ इति ।

अत्र वस्तुतः अव्ययीभावसमासविधायकं यत् मुख्यं पाणिनीयं सूत्रमस्ति तदेव कारिकया उक्तम् । तथाहि सूत्रम्- 'अव्ययं विभक्तिसमीप-

---
[१] समुच्चयान्वाचयेतरेतरयोगसमाहारश्चार्थाः

समृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्य-सम्पत्तिसाकल्यान्तवचनेषु' [अष्टाध्यायी २.१.६] इति । तत्र विभक्त्यर्थे उदाहरणं भवति हरौ इति अधिहरि । समीपार्थे उदाहरणं भवति कृष्णस्य समीपम् उपकृष्णम् इति । समृद्ध्यर्थे उदाहरणं भवति मद्राणां समृद्धिः सुमद्रम् इति । व्यृद्ध्यर्थे उदाहरणं भवति यवनानां व्यृद्धिः दुर्यवनम् इति । अभावार्थे उदाहरणं भवति मक्षिकायाः अभावः निर्मक्षिकम् इति । अत्ययार्थे उदाहरणं भवति हिमस्य अत्ययः अतिहिमम् इति । असम्प्रत्यर्थे उदाहरणं भवति निद्रा सम्प्रति न युज्यते अतिनिद्रम् इति । शब्दप्रादुर्भावे उदाहरणं भवति हरिशब्दस्य प्रकाशः इतिहरि इति । पश्चादर्थे उदाहरणं भवति विष्णोः पश्चात् अनुविष्णु इति । यथार्थः चतुर्विधः भवति । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । तत्र योग्यतायाः उदाहरणं भवति रूपस्य योग्यम् अनुरूपम् इति । वीप्सायाः उदाहरणं भवति अर्थम् अर्थं प्रति प्रत्यर्थम् इति । अनतिवृत्तेरुदाहरणं भवति शक्तिमनतिक्रम्य यथाशक्ति इति । सादृश्यस्य उदाहरणं भवति हरेः सादृश्यं सहरि इति । आनुपूर्व्यार्थे उदाहरणं भवति ज्येष्ठस्य आनुपूर्व्येण अनुज्येष्ठम् इति । यौगपद्यार्थे उदाहरणं भवति चक्रेण युगपत् सचक्रम् इति । सादृश्यस्य उदाहरणं भवति सख्या सदृशः ससखि इति । सम्पत्यर्थे उदाहरणं भवति क्षत्राणां सम्पत्तिः सक्षत्रम् इति । साकल्यार्थे उदाहरणं भवति तृणमपि अपरित्यज्य सतृणम् इति । अन्तार्थे उदाहरणं भवति अग्निग्रन्थपर्यन्तमधीते इति साग्नि इति ।

इदानीम् अव्ययीभावस्य इतोऽपि ये केचन भेदाः अवशिष्टाः सन्ति तेषां सङ्कलनमत्र क्रियते । तथाहि कारिका–

यथाव्ययमसादृश्ये यावदवधारणेऽथ मात्रार्थे ।
सुप्प्रतिनाक्षशलाकासंख्याः परिणापपरिबहिरञ्चवः ॥१५ ॥
पञ्चम्याङ्मर्यादाभिविध्योश्च लक्षणेनाभिप्रती ।
आभिमुख्ये त्वनुयत्समया लक्षणेन यस्यायामे ॥१६ ॥
तिष्ठद्गुप्रभृतीनि च पारे मध्ये षष्ठ्या वा ।
संख्या वंश्येन तथा नदीभिश्चान्यपदार्थे सुबन्तम् ॥१७ ॥
एषां समासतः स्यादव्ययीभावो विशेषकश्चैव । इति ।

अत्र अव्ययीभावस्य इतरभेदाः उक्ताः । प्रायः चतुर्दश प्रकाराः अत्र उक्ताः । किञ्च, आसु कारिकासु अव्ययीभावस्य ये प्रकाराः उक्ताः ते प्रायः पाणिनीयसूत्रवदेव । समासविधायकपाणिनीयसूत्रैः सह सर्वेषां सादृश्यमत्र

दृश्यते । तत्रादौ उक्तम् 'यावदवधारणे'[२] इति । तस्य उदाहरणं भवति यावन्तः श्लोकाः यावच्छ्लोकम् इति । ततः परमुक्तं 'सुप्रतिना मात्रार्थे' इति । तस्य उदाहरणं भवति शाकस्य लेशः शाकप्रति इति । ततः उक्तम् 'अक्षशलाकासंख्याः परिणा' इति । अर्थात् परि इति निपातस्य अक्षशब्देन शलाकाशब्देन संख्याशब्देन च सह समासः भवति । यथा अक्षेण विपरीतं वृत्तम् अक्षपरि इति । एवमेव शलाकापरि, एकपरि इत्युदाहरणम् । ततः उक्तम् 'अपपरिबहिरञ्चवः पञ्चम्या' इति । अर्थात् अप परि बहिः अञ्चु इत्येतेषां पञ्चम्या सह समासः भवति । यथा अपविष्णु, परिविष्णु, बहिर्वनम्, प्राग्वनम् इति । ततः उक्तम् 'आङ्मर्यादाभिविध्योः' इति । अस्योदाहरणं भवति आमुक्ति इति मर्यादायाम्, आबालम् इति अभिविधौ । ततः उक्तं 'लक्षणेनाभिप्रती आभुमुख्ये' इति । अर्थात् अभि प्रति इत्येतयोः आभिमुख्ये अर्थे समासः भवति इति । अस्योदाहरणं भवति अग्निम् अभि अभ्यग्नि, अग्निं प्रति प्रत्यग्नि इति । ततः उक्तम् 'अनुयत्समया' इति । पाणिनीये 'अनुर्यत्समया' [अष्टाध्यायी २.१.१५] इत्युक्तम् । अस्यार्थः भवति अनुः यस्य समीपवाची तेन लक्षणभूतेन सह समासः भवति । अस्योदाहरणं यथा वनस्य समीपम् अनुवनम् इति । ततः परमुक्तं 'यस्यायामे' इति । पाणिनीये 'यस्य चायामः' [अष्टाध्यायी २.१.१६] इत्युक्तम् । अर्थात् अनुः यस्य आयामवाची तेन सह समासः भवति इति । अस्योदाहरणं भवति गङ्गायाः अनु इति अनुगङ्गं वाराणसी इति । ततः उक्तं 'तिष्ठद्गुप्रभृतीनि च' इति । तिष्ठद्गु इत्यादीनां निपातितानां ग्रहणमत्र क्रियते । तिष्ठन्ति गावः यस्मिन्काले स तष्ठद्गु कालः । ततः उक्तं 'पारे मध्ये षष्ठ्या वा' इति । अर्थात् पारे मध्ये इति शब्दद्वयस्य षष्ठ्यन्तेन सह विकल्पेन समासः भवति इति । यथा गङ्गायाः पारे इति पारेगङ्गम्, गङ्गायाः मध्ये इति मध्येगङ्गम् इति । अनन्तरमुक्तं 'संख्या वंश्येन' इति । अर्थात् वंश्येन सह संख्यायाः समासः भवति । यथा द्वौ मुनी व्याकरणस्य वंश्यौ इति द्विमुनि व्याकरणम् इति । ततः उक्तम् 'नदीभिश्च' इति । अर्थात् नदीभिः सह संख्यायाः समासः भवति इति । यथा सप्तानां गङ्गानां समाहारः इति सप्तगङ्गम् इति । अनन्तरमुक्तम् 'अन्यपदार्थे चायमिष्यते' इति । अर्थात् अन्यपदार्थेऽपि नदीसंज्ञकानां

[२] अत्र कारिकासु सूत्रशरीरम् एव श्लोकाकारेण ग्रथितम् । अस्माभिः अत्र कारिकापदानि एव उल्लिखितानि । न सूत्राणि । यत्र तु कारिकाशरीरं सूत्रशरीरात् भिद्यते तत्र एव सूत्राणि उल्लिखामः ।

समासः भवति इति । अत्र पाणिनीयसूत्रमस्ति 'अन्यपदार्थे च संज्ञायाम्' [अष्टाध्यायी २.१.२१] इति । अस्योदाहरणं भवति उन्मत्तगङ्गं, लोहितगङ्गम् इति । अत्रावधेयम् यत् अपपिबहिरञ्चवः पञ्चम्याः इत्यस्मात् परं सर्वेऽपि प्रकाराः विभाषाधिकारे आगच्छन्ति । तस्मात् ते सर्वे विकल्पेन समस्यन्ते ।

एवमेव अव्ययीभावसमासस्य सर्वे प्रकाराः उक्ताः । तदुक्तं कारिकायां–

एषां समासतः स्यादव्ययीभावो विशेषकश्चैव । इति ।

## २.५. अलुक्समासः

इतः परम् अलुक्समासविषये उच्यते-

केचित्त्वेषु समासा विभक्तीनामलोपनादलुगिति ॥१८ ॥ इति ।

अर्थात् समासेषु केचित् समासाः सन्ति अलुक्समासः इति । कथम् इति चेत् विभक्तीनाम् अलोपनात् इति। अर्थात् समासात् परमपि पूर्वपदस्य विभक्तेः लुक् न भवति। यथा स्तोकात् मुक्तः इति विग्रहे समासे कृते स्तोकान्मुक्तः इति रूपम् । अत्र पञ्चम्याः अलुक् जातः । अयम् अलुक्समासोऽपि समासदृष्ट्या न पृथक्त्वं भजते । तत्पुरुषादिष्वेव अन्तर्भावः स्यात् । परन्तु विभक्तेः अलुक्-रूप-विशेषवैशिष्ट्यात् अत्र पृथक्तया ग्रहणं कृतम् ।

## ३. अन्तिमं मङ्गलम्

एवं समासदर्पणे समासस्य सर्वान् प्रकारान् उक्त्वा अन्तिमं मङ्गलम् आचरितं ग्रन्थकारेण–

समासदर्पणमित्थं रचितं वागीश्वरीं निधाय हृदि ।
पेशलदेवेन मुदा बालानामाशुबोधार्थम् ॥१९ ॥ इति ।

अर्थात् वागीश्वरीं हृदि निधाय पेशलदेवेन इत्थं समासदर्पणं मुदा रचितम् । अत्र ग्रन्थकर्तुः नाम साक्षात् प्राप्यते पेशलदेवः इति । किञ्च किमस्य समासदर्पणस्य प्रयोजनमिति चेत् बालानाम् आशुबोधार्थम् इति । अर्थात् अनेन बालानां समासविषये शीघ्रं बोधः भवति इति ।

## ४. उपसंहारः

अस्मिन् समासदर्पणग्रन्थे समासस्य सर्वे भेदाः समासेन उक्ताः । वस्तुतः ग्रन्थोऽयम् समासस्वरूपबोधकः । संस्कृतवाङ्मये समासस्य यावन्तः भेदाः उपलभ्यन्ते तेषां कारिकया ग्रन्थनं कृतमत्र आचार्येण । समग्रसमासप्रपञ्चस्य स्वरूपं किमस्ति इत्यस्य अनायासेन चित्रवत् सरलतया बोधः अस्मिन् दर्पणे भवति । समासः कतिविधः, तेषां च के प्रभेदाः, किं तेषां स्वरूपम् इत्यादीनां

कथनमत्र कारिकारूपेण विहितम् । किञ्च, ग्रन्थेऽस्मिन् समासविधिविषये किमपि नोक्तम् । अतः यत्र कुत्रचित् विकल्पेन समासः भवति तद्विषये पृथक्तया किमपि नोक्तम् । परन्तु तेषां ग्रहणमत्र कृतं वर्तते । कर्मधारये मध्यमपदलोपिसमासस्य पृथक् ग्रहणं न कृतम् । यथा शाकप्रियः पार्थिवः शाकपार्थिवः इति । अस्य पृथक्तया अग्रहणेऽपि विशेषणपूर्वपदकर्मधारये एव अन्तर्भावः इति स्वीकार्यः । समासकथनक्रमेऽपि कश्चन भेदः दृश्यते । कौमुद्यादिषु समासप्रकरणे अव्ययीभावः आदौ उच्यते । अत्र स्वशैल्या अव्ययीभावसमासः अन्तिमे उक्तः आचार्यपेशलदेवेन ।

एवञ्च समासदर्पणस्य यथाशक्ति किञ्चित् समीक्षणमत्र विहितमिति शम् ।

✶ ✶ ✶

## Bibliography


1. *समासदर्पणम्;* पेशलदेवः ; चौखम्बा विद्याभवन ; वाराणसी ; २००४
2. *समाससन्दर्शिका;* बालगोविन्द झा ; चौखम्बा सुरभारती प्रकाशन ; २००८
3. *संस्कृतव्याकरणम्;* रामचन्द्र झा ; चौखम्बा विद्याभवन ; वाराणसी ; २०००
4. *अष्टाध्यायी;* पाणिनिः ; श्रीगोपालदत्तपाण्डेयः (सम्पादकः) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०१५
5. *वैयाकरणसिद्धान्तकौमुदी;* भट्टोजिदीक्षितः ; गिरिधरशर्मा परमेश्वरानन्दशर्मा च (सम्पादकौ) ; मोतिलाल बनारसीदास ; वाराणसी ; २०१२


❋ ❋ ❋

# व्याकरणकौमुदी :
# वङ्गेषु व्याकरणचर्चायाः नवीना धारा

(कारकप्रकरणमनुसृत्य कृतं संक्षिप्तमालोचनम्)

**डॉ. सुस्मिता गोस्वामी***


## Abstract

[संस्कृतवाङ्मये ये व्याकरणग्रन्थाः उपलभ्यन्ते तेषु पाणिनीयव्याकरणं बहु प्रसिद्धम् । यद्यपि तदितरव्याकरणानि बहूनि सन्ति तथापि पाणिनीयव्याकरणस्य महत्त्वम् अतुलनीयम् । सिद्धान्तकौमुद्यादि-पाणिनीयव्याकरणे प्रवेशाय वङ्गप्रदेशे वङ्गीयविदुषा ईश्वरचन्द्रविद्यासागरमहाभागेन एकः ग्रन्थः रचितः व्याकरणकौमुदी इति । ग्रन्थोऽयं वङ्गप्रदेशे संस्कृतव्याकरणस्य अध्ययनाय बहुलतया समादृतः । पाणिनीयव्याकरणमनुसृत्य रचितेऽस्मिन् ग्रन्थे केषुचित् स्थलेषु पाणिनीयव्याकरणेन तदितरमुग्धबोधादिव्याकरणेन च सह साम्यं परिलक्ष्यते केषुचत् स्थलेषु वैषम्यमपि परिलक्ष्यते । ग्रन्थेऽस्मिन् ईश्वरचन्द्रमहाभागः छात्राणां कृते संस्कृतव्याकरणस्य सुखबोधाय स्वमत्या सूत्राणि रचितवान् । व्याकरणस्य प्रायः सर्वेऽपि विषयाः अत्र उल्लिखिताः । किञ्च वङ्गभाषायाम् अस्य व्याख्यानमपि विहितम् । एतस्मादेव कारणाद् वङ्गेषु संस्कृतव्याकरणस्य चर्चायां व्याकरणकौमुदी सर्वप्रधाना आसीत् । एते एव विषयाः अस्मिन् प्रबन्धे अत्र आलोचन्ते ।]


वङ्गेषु ऊनविंशशतकस्य समाजसंस्कारे शिक्षासंस्कारे च ईश्वरचन्द्रशर्मा विशिष्टं स्थानं बिभर्ति । तस्य नवनवोन्मेषशालिनी प्रतिभा वङ्गेषु भाषाशिक्षायां नवीनदिगन्तम् उन्मोचयति । व्याकरणचर्चायां बहुविस्तृता वङ्गमनीषा गङ्गाप्रवाहवत् उच्चावचवर्त्म अतिक्रम्य निरन्तरं प्रवहति । कथ्यते एतत् 'अनन्तपारं किल शब्दशास्त्रम् ।' स्वल्पायुर्विशिष्टैः मानवैः विघ्नसंकुलजीवने सागरतुल्ये शब्दसमुद्रेऽवगाहनम् असम्भवम् इति विचार्य वैयाकरणाः आत्मानं नियोजितवन्तः । अनन्तशब्दशास्त्रं उपचतुःसहस्रसूत्रैः बध्नाति वैयाकरणशिरोमणिः आचार्यः पाणिनिः । वङ्गदेशे पाणिनेः व्याकरणचर्चायाः सविशेषोद्योगः आदौ बौद्धपुरुषोत्तमदेवेन गृह्यते । किन्तु ख्रिस्टियद्वादशशतकाद् यावद् मुग्धबोध-कलाप-संक्षिप्तसार-हरिनामामृत-प्रभृतीनाम् अपाणिनीयव्याकरणानां चर्चा अपि महता प्रमाणेन भवति स्म । स्वल्पसमयकालेन संस्कृतभाषायां प्रवेशनार्थमस्माकं वैयाकरणैः याः पद्धतयः

---

* सहायकाध्यापिका, लेडि ब्रेबोर्न महाविद्यालयः, कोलकाता

समाश्रियन्ते तेषु नवीनसंयोजनमासीत् ऊनविंशशतकस्य संस्कृतव्याकरणस्य अभिनवा सृष्टिः ईश्वरचन्द्रविद्यासागरमहाभागस्य व्याकरणकौमुदी ।

## १. वङ्गेषु संस्कृतव्याकरणचर्चा

वङ्गदेशे व्याकरणचर्चायाः प्राचीना परम्परा वर्तते । भारतस्य दक्षिणभागे पूर्वभागे च नूतनव्याकरणग्रन्थाः विरचिताः । तेषु वोपदेवस्य मुग्धबोधम्, अनुभूतिस्वरूपाचार्यस्य सुपद्मव्याकरणम्, पुरुषोत्तमदेवस्य प्रयोगरत्नमाला इत्यादयः ग्रन्थाः विशेषतः उल्लेखनीयाः । ख्रिस्ट्रियषोडश-सप्तदशशतकात् यावद् वङ्गदेशे प्रचलितव्याकरणशास्त्राणां प्रसङ्गे रामतर्कवागीशेनोक्तम्--

परेऽत्र पाणिनीयज्ञाः केचित् कलाप-कोविदाः ।
एके विद्यानिवासाः स्युरन्ये संक्षिप्तसारकाः[१] ॥ इति

यदि वङ्गीयानां व्याकरणशास्त्रचर्चायाः क्रमः संलक्ष्यते तर्हि ख्रिष्टियद्वितीयशतकस्य कलापव्याकरणस्य स्मृतिः जागर्ति । साधारणजनानां व्याकरणजिज्ञासायां सर्वथा उपयोगिनो ग्रन्थस्यास्य वैशिष्ट्यं खलु सरलत्वम् । सूत्रविन्यासभेदं परिदृश्य अस्य बहुविधानि संस्करणानि सन्ति । तेषु वङ्गदेशस्य दौर्गसम्प्रदायोऽन्यतमः । ख्रिस्टियद्वादशशतकस्य संक्षिप्तसारव्याकरणस्य मुनित्रयं क्रमदीश्वर-जुमरनन्दी-गोयीचन्द्रप्रमुखा इति । अस्य व्याकरणस्य रचनायाः विशेषत्वम् आसीत् सारल्यम् । पाणिनिव्याकरणस्य प्रत्याहाराः वैदिकप्रकरणं च नात्र सन्निवेशितम् आसीत् । वङ्गदेशस्य सर्वत्र एतस्य प्रचलनमासीत् । किन्तु गौडप्रदेशे अस्य पाठबाहुल्यम् लक्ष्यते । पश्चिमवङ्गस्य मेदिनीपुरजिलायां तत्सन्निहितस्य उत्कलराज्ये च अस्य व्याकरणस्य चर्चा आसीत् ।

वङ्गदेशे ग्रन्थस्यास्य प्रचारविषये कथ्यते–

क्रमदीश्वरेण वङ्गीयेन ततः परम् ।
संक्षिप्तसारनाम्ना तु महद् व्याकरणं कृतम्[२] ॥ इति

वङ्गदेशे प्रचलितासु व्याकरणेषु बोपदेवस्य मुग्धबोधव्याकरणं विशेषस्थानं बिभर्ति । मध्यभारते विकसितम् अपि इदं व्याकरणं वङ्गेषु निरन्तरं चर्च्यते स्म । पाणिनिशासितां संस्कृतभाषां क्रोडीकृत्य अतिसंक्षेपेण संश्लेषात्मिकया (Synthetical) पद्धत्या उपस्थापनम् अस्य वैशिष्ट्यम् ।

---

१ करुणासिन्धु-दासः, संस्कृतव्याकरण ओ भाषाप्रसङ्ग, पृ.१६२

२ कालीजीवन देवशर्मा (चक्रवर्त्ती), शब्दशास्त्रेर् इतिहास, पृ.२२

भाषाशिक्षायां मुग्धबोधस्य भाषाशिक्षणस्य मार्गः नातीव सुगमः इति सत्यम् । कालीजीवनदेशर्मणा उक्तम्–

"ख्रिस्ट्रियषोडशशतकं यावत् महाराष्ट्रिकाणां पण्डितानां हस्तेन पाणिनीयव्याकरणस्य पुनरभ्युदयात् पूर्वं भारतवर्षस्य विविधस्थले मुग्धबोधव्याकरणं प्रचलितम् आसीत् । पाणिनीयव्याकरणस्य प्रचारेण बोपदेवस्य व्याकरणस्य समादरः न्यूनीभूतः, अपि च तस्य पाठः वङ्गदेशे भागीरथ्याः उभयतीरे एव सीमितः सञ्जातः ।"[३]

पुरुषोत्तमभट्टाचार्यविद्यावागीशेन विरचितं प्रयोगरत्नमालाव्याकरणं संस्कृतशिक्षार्थिनं निकषा सविशेषानुकूलम् इति दृश्यते । पाणिनि-कात्यायनवैयाकरणानां प्रभावसमन्वितं व्याकरणम् इदं वङ्गदेशे बहुलतया पठितमेव । ऐतिहासिकगवेषणया ज्ञायते यत्, प्रेमावतारस्य चैतन्य-महाप्रभोः कालं यावत् मुग्धबोधव्याकरणस्य पठनं वङ्गदेशे नाधिकम् आसीत् । चैतन्यभागवतग्रन्थाद् ज्ञायते यत् टीका-पञ्जीसमन्वितं कलाप-व्याकरणं वङ्गदेशे समधिकं प्रचलितम् आसीत् । गौराङ्गदेवस्य अनुप्रेरणया हरिनामामृतव्याकरणस्य रूपद्वयं भागवतरूपगोस्वामिमहाशयेन श्रीजीव-गोस्वामिमहाभागेन च कृतम् ।

पाणिनिव्याकरणस्य समारम्भकालात् व्याकरणचर्चाया या धारा प्रवर्तिता तस्याः समाप्तिः विद्यासागरमहाभागस्य व्याकरणकौमुद्याः रचनया सम्पूर्णतां लभते ।

## २. व्याकरणकौमुदीरचनाया इतिहासः

व्याकरणकौमुदी ईश्वरचन्द्रस्य विशिष्टायाः शिक्षाचिन्तायाः प्रतिफलनम् । १८४६ ख्रिस्टाब्दादारभ्य १८४७ ख्रिस्टाब्दपर्यन्तं सहसम्पादकरूपेण तस्मिन् महाविद्यालये नियुक्तः आसीद् ईश्वरचन्द्रः । पुनश्च तस्मिन्नेव प्रतिष्ठाने १८५८ ख्रिस्टाब्दस्य अक्टोवरमासं यावत् अध्यक्ष्यरूपेण व्यराजत सः । अस्मिन्नेव काले तस्य शिक्षासम्बन्धिनी चिन्ता सविशेषा फलवती आसीदिति लक्ष्यते । प्रसङ्गेऽस्मिन् गवेषकाणां विश्लेषणं प्रणिधानयोग्यम्–

"संस्कृतज्ञः पण्डितः चेद् अपि स हृदयेन कश्चिद् योरोपदेशीयः शिक्षाव्रती इव आसीत् ।... मानवतावादः एव एतस्य प्रमुखः उत्सः आसीत् । धर्मस्य आध्यात्मिकतायाः वा प्रभावात् स यथासम्भवं दूरे शिक्षां नेतुं

[३] तदेव, पृ.२८७ ।

प्रयतितवान् । मनुष्य एव तस्य शिक्षादर्शस्य प्रेरणास्थानम् आसीत् । सर्वाङ्गीणायाः मानवाभिमुखायाः शिक्षानीतेः प्रवर्तकत्वेन विद्यासागरः सम्प्रति अपि शिक्षाक्षेत्रे प्रमुखं स्थानम् अधिकरोति ।"[४] ऊनविंशशतकस्य पाश्चात्यशिक्षाव्रतिनाम् आदर्शः किं विद्यासागरम् आन्दोलयति? स्वस्य शिक्षाप्रतिष्ठानादेव स शिक्षासंस्कारसाधने पूर्णरूपेण कृतसंकल्पः आसीत् । १८५०-शतके संस्कृतमहाविद्यालयस्य साहित्यविभागस्य अध्यापकरूपेण नियुक्तः सन् यदेव शिक्षाविषयकं परिकल्पनम् उपस्थापयति तत्र मातृभाषायां व्याकरणचर्चायाः प्रसङ्गः तेनोत्थापितः । अत्र परिलक्षितव्यं वङ्गेषु पाणिनेः व्याकरणचर्चा तेन समर्थिता । पाणिनिव्याकरणस्य कौमुदीप्रस्थानस्य मार्गस्तेन निर्वाचितो व्याकरणपठनार्थम् । मातृभाषायां संस्कृत-व्याकरणचर्चायाः प्रागितिहासोऽस्ति । विद्यासागरमहाभागस्य शैशव-कालयावत् वङ्गदेशे मुग्धबोधव्याकरणं पाठ्यविषयतया निर्वाचितम् । अस्य काठिण्यमुपलक्ष्य शिक्षासंसदि समुपस्थापिते प्रस्ताविते शिक्षासंस्कारे तेनोक्तं "Mugdhabodha, with all its voluminous commentaries is an incomplete grammar."[५]

छात्रावस्थायां तस्य व्याकरणपाठस्य स्मृतिः नासीत् मधुरतरा । व्याकरणास्यास्य अतिसंक्षिप्तीकरणं तं नितरां पीडयति स्म । स सर्वदा अनायासेन सुकुमारमति-छात्रान् व्याकरणाध्ययने उत्साहयितुं वङ्गभाषायां व्याकरणग्रन्थस्य प्रयोजनीयताम् अनुभवति स्म । तस्यैव प्रतिफलनं १८५१-शतके प्रकाशितायां संस्कृतव्याकरणस्य उपक्रमणिकायां दरीदृश्यते । संस्कृतभाषायां रचितं संस्कृतव्याकरणं प्रथमशिक्षार्थिनः समीपे कठिनतरं प्रतिभाति । तन्मतेन मुग्धबोधम् अतिसंक्षिप्तव्याकरणम् । सुकुमारमतिबालाः संस्कृतशिक्षायाः प्रारम्भे मुग्धबोधस्य काठिन्यवशात् केवलं तत् कण्ठस्थं कृतवन्तः । अतः व्याकरणाध्यायनस्य पञ्चवत्सरपरिसरे ते न कस्मिन्नपि शास्त्रे सम्यग्रूपेण प्रवेशसामर्थ्यमर्जयन्ते । विशेषतया बहुलटीकाटिप्पणीसंयुक्तं मुग्धबोधव्याकरणम् असम्पूर्णः ग्रन्थः । एतादृशग्रन्थस्य पठनादनन्तरं ते साहित्यविभागे प्रविशन्ति भाषाज्ञानं विना ।

संस्कृतभाषायाः शिक्षणपद्धतिं सरलभावेन उपस्थापनार्थं पाठार्थिनः मनः आकर्षयितुं च वङ्गभाषायां संस्कृतव्याकरणस्योपगिता तेन

[४] विनय घोष, विद्यासागर ओ बाङ्गाली समाज, पृ.६६ (वङ्गभाषायां लिखितस्य संस्कृतानुवादः)

[५] कालीजीवन देवशर्मा, पूर्वोक्तः, पृ.३५१

अनुभूता । मातृभाषायां पाणिनीयव्याकरणचर्चा विद्यासागरमहाभागस्य मुख्योद्देश्यमासीत् ।

कौमुदीप्रस्थानस्य सर्वोत्कृष्टग्रन्थः सिद्धान्तकौमुदी तेन व्याकरणशास्त्रस्य आदर्शग्रन्थरूपेण विवेचिता । शिक्षारम्भस्य वर्षद्वयानन्तरं सिद्धान्तकौमुदी इति ग्रन्थो विद्यासागरमहाभागेन उच्चश्रेणीपर्यन्तं छात्राणां पाठ्यविषयतया गृहीतः । अस्माद् स्पष्टमवगम्यते पाणिनिसम्प्रदायस्य व्याकरणधारा तेन निर्वाचिता शब्दशास्त्रस्य ज्ञानार्थम् । १८५१-ख्रिस्टाब्दे संस्कृतव्याकरणस्य उपक्रमाणिका प्रकाशिता । तदुत्तरं १८५३-ख्रिस्टाब्दे व्याकरणकौमुद्याः प्रथमभागो द्वितीयभागश्च प्रकाशितः । तदनन्तरं यथाक्रमेण १८५४-शतके १८६२-शतके च अस्य व्याकरणग्रन्थस्य तृतीयतुर्थभागश्च प्रकाशितः ।

### ३. विद्यासागरमहाभागेन गृहीतं कौमुदीप्रस्थानम्

आधुनिकशिक्षाव्यवस्थायां Pedagogy इति विषयो बहुलचर्चितः इति दृश्यते । शिक्षणव्यवस्थायाः सर्वप्रथमं सोपानं खलु छात्रसंसदि प्रयुक्ता शिक्षादानस्य नीतिः । Pedagogy इति पदस्यार्थः "the method of how teachers teach, in theory and in practice." [६]

अस्याः शिक्षणपद्धत्याः केचित् स्तरभेदाः वर्तन्ते । अन्तर्जालमाध्यमेन ज्ञायते यत्-"There are five different Pedagogical Approaches : the constructive approach, the collaborative approach, the reflective approach, the integrative approach, and, finally,the inquiry-based approach." [७] यदि विद्यासागरमहाभागस्य शिक्षाविषयकप्रस्तावं पूर्णमनःसंयोगेन पठ्यते तर्हि आधुनिकसंज्ञया चिह्नितस्य pedagogy इत्यस्य काचित् धारणा उपलभ्यते । ईश्वरचन्द्र-महाशयस्य 'Notes on the Sanscrit College' इति शिरोनाम्ना लिखितायां रचनायां तस्य pedagogy इति विषयसम्बन्धितो विचारः स्पष्टतया प्रतिभाति । तत्र शिक्षाव्यवस्थायाः प्रवर्तनविषये तेनोक्तम्–

"The students of the Sanscrit College should be thoroughly instructed in Grammar and Literature-the latter including poems, dramas and prose works... The study of these, that is Grammar, Literature and Rhetoric will enable

६ https ://www.google.com
७ https ://www.google.com

the student to acquire a complete mastery of the Sanscrit Language."[८]

ननु मनसि प्रश्नः समायातो व्याकरणकौमूदी इति रचनायाः का अनुप्रेरणा? शैशवस्य व्याकरणपाठस्य भीतिप्रदा स्मृतिः तं निश्चयमेव ताडयति, किन्तु न वयं विस्मरामः कलिकातायां एशियाटिकसोसाइटि स्थापनादन्तरं संस्कृतभाषायाः साहित्यस्य च चर्चायाः अधिकं परिवर्तनं साधितम् । पाश्चात्यपण्डितेष्वपि आङ्गलभाषायां संस्कृतव्याकरणरचनायाः प्रचेष्टा परिलक्ष्यते । पाणिनि-कलाप-मुग्धबोधविविधकाव्यशब्दकोषादीनां सहायेन रचितग्रन्थोऽयं 'Eassy on the Principles of Sanskrit Grammar' इति बृहत्तरग्रन्थस्यान्तर्भुक्तो भवति ।

प्रख्यातभारततत्त्वविदः H.H.Wilson इति महाभागस्य लण्डननगर्य्यां १८४१-शतके An Introduction to the grammar of the Sanskrit Language for the use of early students इति ग्रन्थः प्रकाशितः ।

उइलियाम-इयेट्स इति महाभागः 'A Grammar of the Sanscrit Language' इति नामांकितं व्याकरणग्रन्थं विरचितवान् । तत्र वर्णः सन्धिः शब्दः धातुः पदव्यवस्थाः छन्दः इत्याद्यध्यायविभाजनद्वारा संस्कृतव्याकरणस्य साधारणविषया ग्रन्थेऽस्मिन् तेनान्तर्भूक्ताः । आमेरिकामहादेशस्य प्रख्यात-संस्कृतकोविदः William Dwight Whitney इति महाभागः ऐतिहासिक-दृष्कोणतः 'A Sanskrit Grammar, including both the classical Language and the older Dialects of Veda and Brahmana' इति ग्रन्थं विरच्य वैदिकभाषया सह संस्कृतभाषायाः सम्बन्धं प्रदर्शितवान् । काशीप्रदेशस्य संस्कृतमहाविद्यालयस्य अध्यक्ष्यस्य ब्यालेनटाइनमहाभागस्य शब्दार्थप्रदर्शनमूलकः First Lessons in Sanskrit Grammar, together with an introduction to the Hitopadesa इति ग्रन्थः १८५१-शतके काशीनगर्य्यां प्रकाशितः ।[९]

अत्र एवंविधानां ग्रन्थानां परिचयो न मयात्र विस्तरेण दीयते । अस्याः रचनायाः उद्देश्यमपि तत् नासीत् । किन्तु अस्मात् तथ्यनिचयात् एवमवगन्तुं शक्यते यत् संस्कृतपाठार्थिनः व्याकरणं शिक्षयितुं सरलीभूतोपायेन ग्रन्थरचनायाः प्रयासः विद्यासागरमहाशयस्य पूर्वं पाश्चात्यभारततत्त्वविद्भिः

८ विनय घोष, विद्यासागर ओ बाङ्गाली समाज, अखण्ड संस्करणम्, पृ.५१६

९ कालीजीवन देवशर्मा, पूर्वोक्तः, पृ.३८०-३८६ ।

प्रारब्धः । किन्तु व्याकरणकौमुद्याम् अष्टाध्यायीग्रन्थस्य कौमुदीसंस्करणस्य प्रभावः सर्वथा उपपद्यते । धर्मकीर्तेः रूपावतारव्याकरणग्रन्थादारभ्य अष्टाध्यायीग्रन्थस्य सूत्राणां विषयानुसारं विन्यस्तव्याकरणपाठस्य या धारा प्रवर्तिता, कौमुदीसंस्करणेषु सा धारा पूर्णरूपेण पल्लवायते । कालीजीवनदेवशर्मा मन्यते संस्कृतभाषाशिक्षाप्रदानं खलु व्याकरणरचनायाः प्रधानोद्देश्यमासीत्, नवनवव्याकरणग्रन्थरचनया तदुद्देश्यमेव साधयन्ति पण्डिता इत्यत्र संशयस्य लेशो नास्ति । स्वल्पसमयेन कार्यनिष्पत्तिः तेषाम् चिकीर्षितविषयतया परिगण्यते । पण्डितप्रवरोऽयं स्पष्टतया निगदति–

"पाणिनि परवर्ती व्याकरणधारार् इतिहास वस्तुत सेइ प्रचेश्टार इतिहास, यार शेष परिणति ईश्वरचन्द्रविद्यासागरमहाशयेर् मतो पण्डितदेर् द्वारा मातृभाषार् माध्यमे संस्कृतशिक्षार जन्य व्याकरणकौमुदी-जातीयग्रन्थरचनाय ।"[१०]

व्याकरणकौमूदी वङ्गभाषायां संस्कृतभाषाशिक्षणस्य अन्यतम-साधनतया अद्यापि स्वीकृता । वङ्गेषु संस्कृतव्याकरणस्यानुशीलने नवीनधारामेकां संयोजयति ग्रन्थोऽयम् । अस्य अभिनवत्वं विचारयितुं कारकप्रकरणमाश्रित्य संक्षिप्तालोचना एका मयात्र प्रस्तूयते ।

### ४. कारकप्रकरणमाश्रित्य व्याकरणकौमुद्या अभिनवत्वप्रतिपादनम्

अस्य शोधपत्रस्यालोचितविषयः कारकप्रकरणमाश्रित्य प्रवर्तते । कथं मया वङ्गेषु व्याकरणचर्चाया अभिनवत्व-प्रतिपादने व्याकरणकौमुद्याः कारकप्रकरणमेव प्रधानोपजीव्यतया गृहीतम् अस्य कारणमेकं वर्तते । विशेषतो ग्रन्थस्यास्य चतुर्थभागे कारकस्यालोचना संयोजिता । सूत्रसम्पूरितमालोचनमिदं परिलक्ष्य स्पष्टतया ज्ञातुं शक्यते कथं प्रातःस्मरणीयपण्डितप्रवरोऽयं सुनिर्दिष्टमार्गमालम्ब्य प्रथमपाठार्थिनः सकाशे संस्कृतव्याकरणस्य द्वारमुन्मोचयति । भारतीयपरम्परायां वागर्थौ पार्वतीपरमेश्वरौ तुल्यौ संपृक्तौ महाकवेः वचनानुसारतः । अस्य वागर्थयोः सुष्ठु सन्निवेशो वाक्येनैव अवगम्यते । कारकं वाक्यगठने प्रधानोपादानतया स्वीकृतम् । शुद्धवाक्यानां व्यवहारार्थं कारकज्ञानम् अपेक्षते । शब्दार्थयोर्मध्ये संयोगसूचनार्थं कारकविषये सुस्पष्टज्ञानं प्रयोजनम् । आङ्गलपरिभाषायां Syntax इत्यनया विशेषितं पदमिदं वाक्यस्य मध्ये पदानामन्तःसयोगवशेन जातं सम्बन्धं निर्देशयति । साधारणतया प्रतिपदस्य अर्थबोधनादनन्तरं तेषां

---

[१०] तदेव, पृ.३५०

पारस्परिकसम्बन्धः बुद्धौ समागच्छति, तदनन्तरं तेषां प्रासङ्गिकार्थग्रहणात् परं पूर्णवाक्यार्थं वयमवगन्तुं शक्नुमः । वाक्यावयवस्य पदस्यालोचनायां संस्कृतव्याकरणस्य प्रयोजनं विद्यते । कारकं किम् इति विषयमाश्रित्य सुदीर्घकालयावत् वैयाकरणेषु मतपार्थक्यं दृश्यते । संस्कृतव्याकरणानुसारं वाक्ये क्रियापदेन सह येषां साक्षात् सम्बन्धो विद्यते तानि खलु कारकाणि ।

महाभाष्यकारपतञ्जलेः मतानुसारं करोति क्रियां निर्वर्तयतीति कारकम् ।[११]

क्रियानिष्पत्तौ प्रत्यक्षतया नियुक्तं वस्तु नियुक्तव्यक्तिश्च कारकसंज्ञया अभिहितो भवति । किन्तु भर्त्तृहरिमहाभागः क्रियानिष्पत्तेः सामर्थ्यरूपेण कारकं विवेचयति । विविधेषु व्याकरणसम्प्रदायेषु प्रसङ्गेऽस्मिन् सारगर्भमतं विचारितम् । संस्कृतव्याकरणानुसारं कारकसंज्ञा मुख्यतया वाक्यार्थनिर्भरा । स्वतन्त्र कर्त्ता, साधकतमं करणम्, कर्मणा यमभिप्रैति स सम्प्रदानम्, ध्रुवमपायेऽपादानम्, आधारोऽधिकरणम् इति सूत्राण्यवेक्ष्य कारकस्य संज्ञानिर्देशप्रसङ्गे सर्वस्मिन् व्याकरणसम्प्रदाये अविकृतरूपेण ईषदपरिवर्तितरूपेण च कारकाणां संज्ञा निर्धारिता । अस्माकं आलोचिते व्याकरणकौमुदीग्रन्थेऽपि एताः कारकसंज्ञाः प्रयुज्यन्ते ।

आलोचनाया अस्मिन्नवकाशे विद्यासागरमहाभागेन कारकाणां प्रसङ्गे गृहीतायाः पद्धत्याः विचारो नितरामपेक्षितो वर्तते । वयं रेखाचित्रेण व्याकरणकौमुद्यां प्रयुक्तानां कारकसूत्राणां प्रदर्शनं करिष्यामः ।

## अपादानकारके

| **विद्यासागरमहाभागेन गृहीतं पाणिनिना प्रदत्तं कारकसूत्रम्** | **पाणिनिसूत्रमालम्ब्य कृतम् अभिनवसूत्रम्** |
|---|---|
| भीत्रार्थानां भयहेतुः [अष्टाध्यायी २.४.२५], अन्तर्द्धौ येनादर्शनमिच्छति [अष्टाध्यायी २.४.२८], वारणार्थानामीप्स्तिः [अष्टाध्यायी २.४.२७] | यतो विश्लेषोऽपादानम्, हेतुरुत्पत्तेः, आविर्भवनभूर्मुवः, विरामार्थानां यतो विरतिः, पराजेरसह्यम्, यतो जुगुप्सा तदर्थानाम्, त्रपार्थानाम् यतस्त्रपा, अधीत्यर्थानामध्यापयिता, श्रुत्यर्थानाम् श्रावयिता, ग्रहणप्राप्त्यर्थानां तत्स्थानम्, प्रमादार्थानां यतः प्रमादः । |

११ करुणासिन्धु-दासः, पुर्वोक्तः, पृ.१२४

## सम्प्रदानकारके

| विद्यासागरमहाभागेन गृहीतं पाणिनिना प्रदत्तं कारकसूत्रम् | पाणिनिसूत्रमालम्ब्य कृतम् अभिनवसूत्रम् |
|---|---|
| रुच्यर्थानां प्रीयमाणः [अष्टाध्यायी २.४.३३], स्पृहेरीप्स्तितः [अष्टाध्यायी २.४.३६], धारेरुत्तमर्णः [अष्टाध्यायी २.४.३५], प्रत्याङ्भ्याम् श्रुवः पूर्वस्य कर्ता [अष्टाध्यायी १.४.४०] | यस्मै दानं सम्प्रदानम्, क्रियया यमभिप्रैति, क्रोधद्रोहेर्ष्यासूयार्थानां तदुद्देश्यः, प्रत्याङ्भ्यां श्रुवः प्रवर्त्तकः । |

**कर्मकारके** सर्वम् अपि पाणिनिसूत्रमालम्ब्य कृतम् अभिनवं सूत्रं विद्यते । यथा– क्रिययाक्रान्तं कर्म्म, अधिशीस्थासामधिकरणम्, अभिनिवेशो विभाषा, क्रुध्द्रोहरुपसृष्टयोः सम्प्रदानम्, विभाषा दिवः करणम्, द्वे कर्म्मणी दुहादेः, कर्म्मणि वाच्ये प्रथमा, न्यादेः प्रधाने, दुहादेरप्रधाने, गत्यर्थानां कर्म्मसंज्ञा प्रयोज्यस्य, कर्म्मभावयोस्तृतीया ज्ञानाशनार्थानाञ्च, शब्दकर्म्मकाणामकर्म्मकाणाञ्च, विभाषा हृञ्कृञोः ।
**कर्तृकारकेऽपि** एवम् एव । यथा– क्रियासम्पादकः कर्त्ता, प्रयोजकश्च, तृतीया प्रयोज्ये ।

प्रथमपाठार्थिनं प्रति कारकसंज्ञां याथार्थ्येन ज्ञापयितुं विद्यासागरमहाभागेन अभिनवः एकः मार्गः गृहीतः । प्रदत्तरेखा-चित्रादेवावगम्यते कारकलक्षणव्याख्यायां कानिचित् पाणिनिसूत्राणि पूर्णतया तेन गृहीतानि । कानिचन सूत्राणि पाणिनिसूत्रमवलम्ब्य रचितानि, अवशिष्टानि च वार्त्तिकमाश्रित्य विहितानि । व्याकरणरचनाया अस्याः पद्धत्याः सुनिर्दिष्टं कारणं वर्तते । मुग्धबोधव्याकरणस्य अतिसंक्षेपीकरणात् संस्कृतभाषाशिक्षणे काठिण्यमुपजायते । व्याकरणविभागस्य संस्कारमुपलक्ष्य विद्यासागरमहाभागेन प्रदत्ते शिक्षाप्रस्तावे स्वाभिप्रायं प्रकटितं यत् छात्राः आदौ वर्षद्वयं यावत् मातृभाषायां व्याकरणाध्ययनाद् अनन्तरं सिद्धान्तकौमुदीं पठेदिति । अतोऽष्टाध्याय्याः कौमुदीप्रस्थाने प्रवेशात् प्रागेव बालोपयोगि-व्याकरणग्रन्थरचनाय एवंविधो ग्रन्थस्तेन विलिखित इति चिन्तयामि । पणिनीयव्याकरणपाठः एव तस्याभिप्रेतः आसीत् । किन्तु ग्रन्थस्यास्य विश्लेषणेन ज्ञायते यत् ततः पूर्वं प्रचलितव्याकरणग्रन्थानां प्रभावः अत्र वर्तते । अस्य ग्रन्थस्य चतुर्थभागे कारकप्रकरणे सूत्राणां संयोजनमभवत् । आदिमभागत्रयेषु यस्याभावो

वर्तते । स्वल्पाक्षरविशिष्टसूत्रैः व्याकरणस्य अध्ययनं सुकरं भवेदिति मत्वा विबुधानामनुरोधेन च व्याकरण-कौमुद्याश्चतुर्थभागे सूत्रानि संयोजितानि ।[१२]

अस्मिन् शोधसन्दर्भे आदौ प्रधानकारकसम्बन्धिनां सूत्राणां वैशिष्ट्यं विविच्य विभक्तिविषयकसूत्राणि आलोच्यन्ते मया । कारकस्यालोचनान्ते 'विवक्षावशात् कारकाणि' सूत्रं तेन प्रदत्तं यस्योदाहरणतया गृहं गच्छति गृहे गच्छति, पुष्पेभ्यः स्पृहयति पुष्पाणि स्पृहयति इति उदाहरणानां व्यवहारो तेन कृतः । वृक्षस्य पत्रं पतति वृक्षात् पत्रं पतति चेति वाक्यानां कारकसम्बन्धिनः संशयस्यावकाशे कात्यायनपतञ्जलिभिः प्रस्तावितं विवक्षातत्त्वं विद्यासागरमहाभागेनोल्लिखितम् । विषेषतः संक्षिप्तसारव्याकरणस्य टीकाकारेण गोयीचन्द्रेण उक्तं "वक्तुमिच्छा विवक्षा..यदा यादृशो वक्तुर्विवक्षा भवति तदा तादृशं कारकं भवति ।"[१३] प्रयोगरत्नमालायामपि विवक्षाहेतोः कारकसिद्धेः प्रसङ्गः आयाति । तावद् 'भयस्य भेतव्यम्' इत्यत्र अपादानस्य शेषत्वस्य व्यारव्यार्थं 'अनुकरोति नारायणस्य' इत्यत्र कर्मणः शेषत्वस्य सिद्ध्यर्थं विद्यासागरमहाभागेन वैयाकरणानां मतं विविच्य सूत्रमिदं सन्निवेशितम् । यद्यपि पाणिनिना कारकस्य लक्षणं न प्रदत्तम् । संज्ञेयं अन्वर्थसंज्ञा । संस्कृतव्याकरणानुसारं कारकं खलु अर्थगतवैशिष्ट्यनिर्भरम् । वाक्यस्य अर्थनिर्णयमेव तस्योद्देश्यम् । कारकस्य संज्ञाप्रदर्शने महाभाष्यकारादारभ्य वाक्यपदीयकारेण भर्त्तृहरिणापि कारकशक्तिः क्रियानिष्पत्तेः साधनतया स्वीक्रियते । पूर्वाचार्याणां कारकलक्षणं प्रति दृक्पातेन ज्ञायते कारकस्य क्रियान्वयित्वं तैः साधितम् । यथा प्रौढमनोरमायां ज्योत्स्ना-टीकानुसारतः क्रियान्वयित्वं एव कारककर्मादिसंज्ञोद्देश्यतावचछेदकम् । मुग्धबोधव्याकरणस्य 'संज्ञा कः' इति सूत्रस्य व्यारव्यायां दुर्गादासविद्यावागीशमहाभागस्य टीकायां स्पष्टतः कथ्यते क्रियानिमित्तं कारकम् लोकतः सिद्धमिति दुर्गासिंहः । पाणिनेः १.४.२३ इति सूत्रस्य व्यारव्यायां प्रौढमनोरमायां कथ्यते अन्वर्था चेयं संज्ञा करोतीति कारकम् ।

"तेन क्रियान्वयिनो न भवति ।"[१४] इति । विद्यासागरमहागः कारकास्य लक्षणानि इमानि विविच्य शिशुमनसि व्याक्यनिर्माणस्य प्रधानोपादानस्य

---

[१२] पूर्णचन्द्र-उद्भटसागरेण स्म्पादिता व्याकरणकौमुदी, विज्ञापनम् ।
[१३] तदेव, पृ.७६
[१४] करुणासिन्धु-दासः, पूर्वोक्तः, पृ.१३२

परिचयकाले क्रियया सह अन्वयत्वं कारकसंज्ञया विशेषयति ।

शिशूनां कारकतत्त्वविषये बोधसौकर्यार्थं पाणिनिसूत्रानां सरलीकरणं दीर्घसूत्राणाञ्च संक्षेपीकरणं विद्यासागरमहाशयेन क्रियते ।

कारकप्रकरणे सिद्धान्तकौमुद्याः कारकप्रकरणस्य क्रममतिक्रम्य अष्टाध्यायीक्रमम् अनुसृतवान् ईश्वरचन्द्रमहाभागः । संक्षिप्तसारव्याकरणस्य अपादानम् सम्प्रदानम् करणम् आधारः कर्म इति क्रमस्य ग्रहणं कारकपंक्तौ परिलक्ष्यते । अपादानस्य लक्षणप्रदानकाले यतो विश्लेश इति कथनेन अपायशब्दस्य मूलार्थेन सूत्रनिर्माणेन यत इति पञ्चमन्त्यपदव्यवहारेण च शिक्षार्थिनः समीपे कारकास्यास्य अर्थोपलब्धिः सुगमो भवति । भट्टोजिदीक्षितः अपायपदस्य विश्लेष इत्यर्थं निर्देशयति । पाणिनिसूत्रस्य ग्रहणवर्जनस्य प्रक्रिया महाभाष्यस्य समयकालादेव प्रचलिता । जनिकर्त्तुः प्रकृतिः, भुवः प्रभवः, पराजेरसोढः इति सूत्राणि तेन नवरूपेण निर्मितानि । अस्मिन् कर्मणि सूत्रार्थबोधकशब्देन स सूत्रशरीरं निर्मितवान् । भट्टोजिदीक्षितेन एतेषां सूत्राणां व्याख्यायां जायमानस्य हेतुः, पराजेः प्रयोगे असह्योऽर्थऽपादानं भवनं भूरितिपदसमूहाश्च व्यवह्रियन्ते । अस्माद् एतत् कथयितुं शक्यते उत्तरकालीने समये पाठ्यरूपेण निर्वाचितायां सिद्धान्तकौमुद्यां निवेशात् प्रागेव कारकस्य विषयं सहजरूपेण प्रतिपाद्य व्याकरणस्य महासमुद्रे अवगाहनस्य मार्गः सरलायते । तत्काले प्रचलिते मुग्धबोधव्याकरणे यतोऽपायग्रुगुप्सापराजयप्रमादादानभूत्राण-विरामान्तर्धिकरणं जं पी [मुग्धबोधम् २६६] इति अपादानस्य सूत्रस्य क्लिष्टत्वं दूरीकृत्य पण्डितप्रवरोऽयं अधिकसूत्रसहयोगेन अपादानकारकस्य धारणां पाठार्थिनां समीपे विस्पष्टं कृतवान् । वार्त्तिकेषु कथितविषयाणामन्तर्भावो व्याकरणकौमुद्यां प्राप्तसूत्रेभ्यो लभ्यते । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति वार्त्तिकात् सूत्रत्रयं तेन निर्मितम् । यथा विरामार्थानां यतो विरतिः, यतो जुगुप्सा तदर्थानाम्, प्रमादार्थानां यतः प्रमाद चेति । सूत्रत्रये यतः इति लक्षणवाचकपदप्रयोगात् अपादानस्य क्षेत्रं स्पष्टतया निर्देशितम् । आख्यातोपयोगे इति सूत्रं महाभाष्यकारेण निराकृतम् ।

किन्तु पाणिनिव्याकरणस्य संक्षिप्तसारव्याकरणस्य एतद्विषयकञ्च सूत्रसमूहान् विचार्य अधीत्यर्थानामध्यापयिता, श्रुत्यर्थानां श्रावयिता ग्रहणप्राप्तार्थानाम् तत्स्थानम् इति सूत्रत्रयम् विरचितवान् । एतेषां सूत्राणाम्

उदाहरणं वाक्यरूपेण उपाध्यायादधीते, गुरोः शास्त्रं श्रृणोति, आचार्यादुपदेशं गृह्णातीति उदाहरणवाक्यानाम् प्रयोगो दृश्यते । कथं विषयमेकं व्याख्यार्थं व्याकारणकौमुदीकारेण सूत्रत्रयं सन्निवेशितमिति जिज्ञासा मनसि समायाता । सम्भवतया धातूनां व्यवहारवैचित्र्यस्योपरि अपादानकारकस्य प्रयोगक्षेत्राणां सम्भावना विद्यते इति सुकुमारमतीन् छात्रान् ज्ञापयितुम् एतत् सूत्रबाहुल्यं दृष्टमिति ममाशयः । अपादानस्य अपरमेकं नवीनक्षेत्रं ग्रन्थेऽस्मिन् लब्ध्म् । लज्जार्थक-धातुप्रयोगे यस्मात् लज्जितो भवति तदापादनं स्यादिति कथ्यते । सम्भवतया ल्यब्लोपे कर्मण्यधिकरणे च इति वार्त्तिकरस्य प्रयोगक्षेत्रमत्र विद्यते इति पूर्णचन्द्र-उद्भटसागरमहाशयस्य विचारः ।[१५] सम्प्रदानकारकस्य सूत्ररचनाकाले संक्षिप्तसूत्रशरीरप्रदानेन कारकास्यास्य सुनिर्दिष्टं प्रयोगस्थलं तेन निर्वाचितम् । क्रुधद्रुहेर्ष्यासूयार्थानाम् यं प्रति कोपः इति सूत्रं छात्राणामनायासेन अधिगन्तुं यं प्रति कोप इति पदानां परिवर्त्तनेन तदुद्दिश्य इति क्षुद्रं पदम् तत्र संयोजितम् । अधिकरणकारकस्य विभागत्रयं तेन स्वीकृतम् । मुग्धबोधे व्याख्यातस्य कालभावाधारं डं प्ती इति सूत्रस्य विश्लेषणकाले सामीप्याश्लेष इत्यत्र स्वीकृतस्य सामीपिकाधारस्य ग्रहणं व्याकरणकौमुद्यां न दृष्टम् । कोऽपि मन्यन्ते लक्षणया सामीप्यमवगम्यते । किमनेन कारणेन विद्यासागरमहाभागेन सामीपिकाधारो न स्वीकृतः ? अत्र लक्षणीयं कर्तुरीप्सिततमं कर्म [अष्टाध्यायी १.४.४६] इति सूत्रस्य वृत्तौ भट्टोजिदीक्षीतेन कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यादिति कथ्यते । ईश्वरचन्द्रमहाभागेन सम्भवतया छात्राणां सुखबोधाय क्रिययाप्तुमिति विषयं क्रिययाक्रान्तमित्यनेन व्याख्यातम् । दुर्गादाससांख्यवेदान्ततीर्थमहाभागेन सम्पादिते व्याकरणकौमूदी इति ग्रन्थे अधिशीङ्स्थासामधिकरणम् अभिनिविशश्च इति सूत्रद्वयञ्चास्ति । अत्र दृष्टमभि-नि पूर्वकात् विश्-धातोः आधारः विकल्पेन कर्मसंज्ञां लभते, यतः सूत्रे विभाषा इति पदव्यवहारेण स्पष्टतया निरूपितम् ।[१६] येषु सूत्रेषु विकल्पविधेः प्रयोगावकाशो विद्यते तत्र विभाषापदेन तस्य निर्देशः क्रियते । यथा विभाषा दिवः करणम् । शिशुनां कठिनां संस्कृतभाषां शिक्षयितुं सरलतमपद्धत्या उपयोगो ग्रन्थेऽस्मिन् विधीयते । विकल्पविधिज्ञापनार्थं विभाषापदस्य साक्षादुल्लेखनम् अस्य प्रमाणम् ।

---

१५ व्याकरणकौमुदी, पूर्वोक्तः, पृ.४९२

१६ दुर्गाचरणसांख्यवेदान्ततीर्थेण सम्पादितम्, व्याकरणकौमुदी, पृ.४९३

अकथितञ्चेति सूत्रमाश्रित्य व्याकरणग्रन्थेऽस्मिन् सूत्रत्रितयं विहितम् । द्विकर्मकधातूनां प्रयोगे प्रयुक्तस्य कर्मणः भेदद्वयमुक्त्वा कस्मिन् कर्मणि द्वितीया स्यात् इति सरलभावेन तेन परिष्क्रियते । तत्र न्यादेः धातोः प्रधानकर्मणि दुहादेश्च कर्मवाच्ये प्रधानकर्मणि द्वितीया प्रयोज्या । द्विकर्मकधातूनां प्रयोगे कर्मसंज्ञाविधानकाले छात्राणां मनसि संशयो विद्यते । अनेन सूत्रद्वयेन तेषां निराकरणं भवेदिति मन्ये । कर्त्तृसंज्ञाविधानकाले भट्टोजिदीक्षीतेनोक्तं क्रियायां स्वातन्त्र्येण विविक्षितोऽर्थ इति । विद्यासागरमहाभागेन अतिस्पष्टतया व्याख्यायते क्रियासम्पादकः कर्त्ता इति । तत्र प्रयोज्यप्रयोजकभेदेन कर्त्तृसंज्ञायां प्रयोजकश्च, तृतीया प्रयोज्ये इति सूत्रद्वयेन च णिजन्ताणिजन्तदशाभेदेन कर्त्तृसंज्ञाया विभक्तिनिर्धारणं सुचिन्तितरूपेण तेन कृतम् । नेदं वयं विस्मरामः स्वल्पधीयानां छात्रानां व्याकरणशास्त्रे प्रवेशार्थं रचितेऽस्मिन् शास्त्रे सरलपदव्यवहारेण पाणिनिव्याकरणानुसारं सूत्रानां गूढार्थः तेन विवृतः । पाणिनेः गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणामनिकर्त्ता स णौ इति सूत्रम् अधिकृत्य विहितानि वार्तिकान्यवलम्ब्य यानि सूत्राणि ग्रन्थकारेण रचितानि तैः प्रयोज्यकर्त्तुः कर्मसंज्ञा विशदेन प्रतिपाद्यते । सूत्रशरीरे नाहं प्रविशामि किन्तु यदि उदाहरणवाक्येषु दृक्पातं करोमि तत्र स्तरविन्यासेन कर्त्तुः कर्मसंज्ञाविधानस्य प्रक्रिया शिशुमनसि अनायासेन प्रतिफलितेति भावयामि । यथा 'देवदत्तो गृहं गच्छति, देवदत्तो यज्ञदत्तं गृहं गमयति ।' शिशुः शेते, माता शिशुं शाययति इति । परस्परसन्निवेशितैः उदाहरणवाक्यैः सूत्रार्थाः पाठार्थिनां बुद्धौ सहजतया प्रविशन्ति । कर्त्तृकरणयोस्तृतीया इति सूत्रेण अनुक्तकर्तरि करणे च तृतीयाविभक्तेः प्रयोगप्रसङ्गे अनुक्त अनभिहित इति विषयाः सम्यक्तया छात्राणां बोधनार्थं कर्म्मभावयोस्तृतीया इति लक्षणं शास्त्रकारेण प्रयुक्तम् । कारकलक्षणप्रसङ्गे विद्यासागरमहाशयेन विलिखितम् अपरसूत्रद्वयम् अत्र आलोचयमि । यथा 'कर्म्मसंज्ञायां प्रयोज्यकर्म्मणः प्रथमाद्वितीये कर्म्मणि' चेति । अर्थात् यदि सूत्रस्य गठनं सूक्ष्मतया विचार्यते तर्हि कर्मवाच्ये कर्तुः कर्मणश्च विभक्तिप्रयोगविषये अपूर्वसङ्केतः अत्र व्यवहृतः इति ज्ञायते । कर्मवाच्ये प्रयोज्यकर्तरि प्रथमा भवति, तत्रैव कर्मणि द्वितीया भवति । यथा गुरुणा शिष्यो वेदमध्याप्यते । आश्चर्यस्य विषय न केवलं क्रियाप्रवृत्तौ विशेषकारकाः विहिताः क्रियानिवृत्तौ खलु तेषामेव व्यवहारो दृश्यते । अर्थात् विधिमुखेन येषां कारकाणां प्रयोगो विधीयते

निषेधमुखेनैव तेषां प्रवृत्तिः भवति । व्याकरणशास्त्रस्य शिक्षार्थिनः समीपे सूत्रमिदमनवद्यमिति चिन्तयामि । न हि सर्वदा विधिमुखेन वयं वाक्यं कथयामः । यदा कोऽपि वदति स चन्द्रं पश्यति तत्क्षणात् यदि कोऽपि एवं कथयितुं चेष्टते स चन्द्रं न पश्यति तर्हि वाक्यस्य विन्यास सममेव भवति, केवलं नञर्थकस्य अव्ययस्य प्रयोगः स्यात् । विद्यासागरमहाशयस्य सूक्ष्मविचारस्य दृष्टान्तमेतत् इति मन्ये ।

व्याकरणकौमुद्यां प्रयुक्तानि विभक्तिविधायकसूत्राणि रेखाचित्रेणात्र प्रदर्शितम्–

| **विभक्तयः** | **पाणिनिसूत्रम्** | **सूत्रम् अवलम्ब्य कृतम् अभिनवं सूत्रम्** | **वार्तिकम् अवलम्ब्य कृतं अभिनवसूत्रम्** |
|---|---|---|---|
| प्रथमा | सम्बोधने च [२.३.४७] | अभिधेयमात्रे प्रथमा, कर्तरि | अव्यययोगे च |
| द्वितीया | कर्मणि द्वितीया [२.३.२], कालाध्वनोरत्यन्त-संयोगे [२.३.५] | क्रियाविशेषणे च, अभिपरिसर्व्वोभयैस्-तसन्तैः, प्रत्यनुधिङ् निकषान्तरान्तरेणयावद्भिः | |
| तृतीया | | तृतीया करणे, सहार्थैः, ऊनवारणप्रयोजनार्थैश्च, अध्वकालाभ्यामपवर्गे, येनाङ्गेनाङ्गिनो विकारः, लक्षणात् | प्रकृत्यादिभ्यश्च |

| | | | |
|---|---|---|---|
| चतुर्थी | चतुर्थी सम्प्रदाने [२.३.१३] | मन्यकर्म्मण्यादरे विभाषा, वा गत्यर्थकर्म्मणि चेष्टायाम् | तादर्थ्ये, निवृत्तौ निवर्त्तनीयात्, सम्पद्यमानात् क्लृप्यादेः, हित-सुख-नमोभिः, स्वस्ति-स्वाहा-स्वधा-वषड्भिः, समर्थार्थैश्च |
| पञ्चमी | अपादाने पञ्चमी [२.३.२८] | निकृष्टादेकोत्कर्षे, मर्य्यादाभिविध्योरायोगे, अन्यार्थे, दिग्देशकालवाचिभिः, बहिरारत्प्रभृतिभिः, आ-आहिभ्याञ्च, ऋते-योगे द्वितीया च, पृथग्विनाभ्यां द्वितीयातृतीये च, स्तोक-कृछ्छाल्प-कतिपयेभ्यस्तृतीया च, हेतौ | कालाध्वनोरवधेः |

| | | | |
|---|---|---|---|
| षष्ठी | कर्तृकर्म्मणोः कृति [२.३.६५], उभयप्राप्तौ कर्मणि [२.३.६६], अधिकरणवाचिनश्च [२.२.१३], कृत्यानां कर्तरि वा [२.७.१०], सर्वनाम्नस्तृतीया च [२.३.२७] | षष्ठी सम्बन्धे, क्वचिद्विभाषाकर्तरि, न शत्रादेः, न तुमुनादेः, नोदन्तस्य, नोकशीलतृनभबिष्य-णिनाम्, न खलर्थानाम्, न निष्ठायाः, क्तस्य वर्तमाने, कर्म्मणि जासि-पिष्-निप्रहणां हिंसायाम्, वा स्मृत्यर्थेदयेशां कर्म्मणि, तृप्तयार्थानां विभाषा करणे, अस्तादस्यात्यसुभिः, कृत्वसुसुचोः कालाधिकरणे, एनपा द्वितीया च, तुल्यार्थैस्तृतीया च, आशिषि कुशलादिभिश्चतुर्थी च,दुरान्तिकार्थैः पञ्चमी च | विभाषा भावे |
| सप्तमी | सप्तम्यधिकरणे च [२.३.३६], यस्य च भावेन भावलक्षणम् [२.३.४१], प्रसितोत्सुकाभ्यां तृतीया च, षष्ठी चानादरे [२.३.३८], यतश्च निर्धारणम् [२.३.४१] | क्रियामध्येऽध्वकालाभ्यां पञ्चमी च, दुरान्तिकार्थ्येभ्यो द्वितीयातृतीयापञ्चम्यश्च, साक्षीप्रभृतिभिश्च, | साधुनिपुणाभ्या-मर्चायाम्, क्तस्य सहेनिना कर्म्मणि, अध्वनो व्यवधौ प्रथमा च, निमित्तात् कर्म्मसमवाये । |

विभक्तिविधायकसूत्रप्रणयनकाले पाणिनिसूत्रं वार्त्तिकमवलम्ब्य च बहुविधानि नवीनसूत्राणि पण्डितप्रवरेणानेन विरचितम् । संख्याकारकबोधयित्री विभक्तिरिति कथनेन विभक्तेरर्थं स उपस्थापितवान् ।

प्रातिपदिकार्थलिङ्गपरिमानवचनमात्रे प्रथमा इति पाणिनिसूत्रं संक्षिप्य अभिधेयमात्रे कर्त्तरि इति सूत्रद्वयेन च प्रथमायाः प्रयोगस्थलं तेन कथ्यते। पाणिनेः अनभिहिते इति सूत्रेण अभिधेयमात्रे प्रथमाविभक्तेः बोधो जायते, किन्तु व्याकरणे प्रथमप्रवेशार्थिनः सकाशे सरलीकृत्य विषयमिममुपस्थापयितुं केवलम् अभिधेय इति पदस्य प्रयोगो तेन कृतः। अव्यययोगे च इति सूत्रे निपातशब्दस्य स्थाने अव्ययशब्दप्रयोगो भवति। क्वचिन्निपातेनाभिधानम् इति वार्तिकस्य संक्षेपीकरणमत्र लक्ष्यते। अव्ययं खलु निपातः इति अस्माभिर्ज्ञायते किन्तु अल्पमतीनां छात्राणां समीपे निपातविधायकपदेषु अव्ययपदस्य व्यवहारः तेन समीचीनं मन्यते। कर्मप्रवचनीय इति विषयस्य पृथग्रूपेण उल्लेखः तेन न क्रियते, किन्तु अभिपरिसर्व्वोभयैस्तसन्तै इति सूत्रे अतिसंक्षेपेण तस्य अन्तर्भावः अस्ति। कारकप्रसङ्गस्यालोचनायाम् एतदपि वयं विचारयामः व्याकरणकौमुद्याः पूर्वं प्रचलितानां मुग्धबोध-संक्षिप्तसारादीनां व्याकरणानां के भेदाः वर्तन्ते। पूर्णचन्द्र-उद्भटसागरमहाभागः व्याकरणकौमूदीसम्पादनकाले पादटीकायाम् एतत् सविस्तरं वर्णितवान्। समयानिकषाहाप्रतियोगेऽपि द्वितीयाविभक्तिर्भवतीति व्याकरणकौमूद्यां न वर्ण्यते, किन्तु मुग्धबोधे एतेषां विवेचनमस्ति। पुनश्च अति-अभि-परि-प्रति-अनु-उपादयः निपाताः कर्मप्रवचनीयरूपेण पाणिनिव्याकरणे गृहीताः, बोपदेवोऽपि वीप्सेत्थम्भाव...इति कारिकायां एतेषामर्थं व्याख्यातवन्तः।[१७]

तृतीयाविभक्तेः पूर्णालोचनायां यानि सूत्राणि विशेषेणोल्लिखितानि तेषु सहार्थैः इति सूत्रे सहार्थे इति कथनेन सह-साकम्-सार्धम्-अमा-समम्-सत्रा-सजूः सर्वेषामेव ग्रहणं भवति। कालाध्वनोरत्यन्तसंयोगे इति सूत्रेण सह अपवर्गे तृतीया इत्यस्य सामञ्जस्यरक्षार्थं सम्भवतया विद्यासागरमहाभागेन अध्वकालाभ्यामपवर्गे इति सूत्रशरीरं विनिर्मितम्। प्रकृत्यादिभ्य उपसंख्यानम् इति पाणिनीयवार्त्तिकानुसारतः प्रकृत्यादिभ्यश्च इति सूत्रेण प्रकृत्यादिशब्देभ्यः तृतीयाया विधानं प्रदत्तम्। महाभाष्यकार-भाष्यटीकाकारकैयटः तत्त्वबोधीनिकाराः प्रमुखाः वैयाकरणकरणाः अत्र करणे तृतीयाविभक्तिं स्वीकुर्वन्ति। कातन्त्रव्याकरणे संक्षिप्तसारे च अनुरूपाभिमतं दृश्यते। संक्षिप्तसारस्य टीकाकारेणापि प्रकृततत्त्वं नाद्रियते। मुग्धबोधे चापि सूत्रस्य प्रयोगक्षेत्रेऽस्मिन् भेदके तृतीया

[१७] पूर्णचन्द्र-उद्भटसागरेण सम्पादितम्, व्याकरणकौमुदी, पृ.५

विभक्तिः स्वीकृता ।[१८] किन्तु वार्त्तिकवचनमनुसृत्य स्वभावेन सरलः, वेगेन गच्छति, प्रकृत्या चारुः इत्यादिषु स्थलेषु प्रकृताद्यवस्थासु तृतीयाया निर्देश तेन विहितः। चतुर्थीविभक्तिपर्यालोचनायां ज्ञायते विविधानि वार्त्तिकानि अवलम्ब्य ईश्वरचन्द्रशर्मणा सरलसूत्राणि ग्रथितानि। तेषु नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च इति सूत्रादवगम्यते अलमिति अव्ययस्य अर्थे विशेषतया समर्थार्थकैश्च इति सूत्रं पल्लवितं जातम्। यथा समर्थो मल्लो मल्लाय, अलं मल्लो मल्लाय चेति। अत्र स्मरणीयं संक्षिप्तसारानुसारतः समर्थार्थकशब्दयोगेन चतुर्थी षष्ठीविभक्तिर्वा भवितुम् अर्हति ।[१९]

पञ्चमीविभक्तिनिर्णयकालेऽपि अनुरूपपन्था तेन गृहीता । अत्र सूत्रमेकम् उदाहृतं मया। निकृष्टादेकोत्कर्षे इति सूत्रेण द्वयोर्मध्ये बहूनां मध्ये वा एकस्योत्कर्षत्वगम्यमाने निकृष्टात् पञ्चमी स्यात् । तस्य मतमिदं स्वतन्त्रम् । यथा धनाद् विद्या गरीयसि, चैत्रो मैत्रात् बलीयान् इत्यादयः । किन्तु एषु स्थलेषु मुग्धबोधव्याकरणे निर्द्धारणे पञ्चमी स्वीकृता । बोपदेवस्याभिमतेन निर्धारणे पञ्चमी, षष्ठी, सप्तमी वा भवितुमर्हति । यद्यपि पाणिनिना धनाद् विद्या गरीयसि इत्यत्र विभक्तनिर्धारणे पञ्चमीं स्वीक्रियते किन्तु पर्व्वतानां हिमालयः श्रेष्ठः इति स्थाने अविभक्तनिर्धारणे षष्ठी सप्तमी वा स्वीक्रियते । यदि बहिरारात्प्रभृतिभिरिति सूत्रं पर्यालोच्यते तर्हि ज्ञायते क्रमदीश्वरेण बहिः शब्दयोगे पञ्चमी षष्ठीचेत्युभयविधानां विभक्तीनां प्रयोगो निर्देशितः । यथा करस्य करतो बहिः । षष्ठीविभक्तिनिर्णये षष्ठी शेषे इत्यत्र विद्यासागरेण शेषे इति संज्ञाबोधकपदस्य स्थाने साक्षात् सम्बन्ध इति पदं व्यवह्रियते । एतेन व्याकरणशिक्षाया प्रथमस्तरे छात्राणाम् व्याकरणशास्त्रे अधिगमः अनायासो भवतीति विचारयामि ।

अत्र क्वचिद्विभाषा कर्त्तरि इति सूत्रस्य आलोचना अपेक्षते। केषुचित् स्थलेषु कर्त्तरि विकल्पेन षष्ठीविभक्तिः भवति। यथा चन्द्रस्य दिदृक्षा मया मम वा। यदि सकर्म्मकधातोः कृत्प्रत्ययो भवति तर्हि तेन कृदन्त-स्त्रीप्रत्यययुक्तेन पदेन कर्त्तरि विकल्पे षष्ठी स्यात्। किन्तु एतदधिकृत्य वैयाकरणेषु मतद्वैतमस्ति। षष्ठीविभक्तिः कुत्र न प्रयुज्यते इति विषये लोकाव्ययनिष्ठाखलर्थतृणाम् इति सूत्रमधिकृत्य व्याकरणकौमुद्यामेकाधिकानाम् सूत्राणामस्तित्वं परिलक्ष्यते। विविधानां

---

[१८] तदेव, पृ.९

[१९] तदेव, पृ.१९

प्रत्ययानां निर्देशोऽत्र विद्यते । अतः तान्यवलम्ब्य विविधानि सूत्रानि बालानां सुखबोधाय विद्यासागरमहाभागेन कृतः । पाणिनेः सर्वनाम्नस्तृतीया च इति सूत्रं पूर्णरूपेण विद्यासागरेण गृहीतम् ।

अर्थात् हेतुशब्दस्य व्यवहारेण निमित्तबोधकात् पदात् सर्वनाम्नस्तृतीया स्तात् विकल्पेन षष्ठी भवति । यथा कस्य हेतोः आगतः, केन हेतुना स आगतः । षष्ठी हेतुप्रयोगे इति सूत्रं तेन अनेन उपस्थापितं यथा निमित्ताद्धेतुप्रयोगे । अर्थात् हेतुशब्दस्य प्रयोगे निमित्तबोधकात् षष्ठी स्यात् । किन्तु वोपदेवमहाभागः भट्टोजिदीक्षितश्चात्र तृतीयादीनां पञ्चमीविभक्तीनां प्रयोगमत्र निर्धारितवन्तः ।

सप्तमीविभक्तौ साधुनिपुणाभ्यामर्चायाम् इति सूत्रेण विद्यासागरमहाभागः प्रशंसायां गम्यमानायां साधुनिपुणशब्दयोः योगे सप्तमी स्यादिति निर्दिशति । यथा व्याकरणे साधुः । किन्तु बोपदेवस्य मतेन अत्र षष्ठी-सप्तम्योः उभययोः प्राप्तिर्भवति । श्रीरामतर्कवागीशस्य मतेन प्रशंसायां सप्तमी अप्रशंशायां षष्ठी च स्यात् ।[२०] यतश्च निर्धारणम् [अष्टाध्यायी २.३.४१] इति सूत्रेण विद्यासागरमहाभागेन षष्ठी-सप्तम्योः विधानं प्रदत्तम् । किन्तु मुग्धबोधे “निर्धारेऽधिकेन क्रियान्तः कालाध्वनोश्च पी च” [मुग्धबोधम् ३१३] इत्यत्र चकारेण पञ्चम्या अपि निर्देशो विहितः । यद्यपि व्याकरणकौमुदीकारेण पञ्चमीविभक्तेः ग्रहणं नात्र कृतम् । अपरमेकं तात्पर्यपूर्णं परिवर्तनं साधितं निमित्तात् कर्मसमवाये इति सूत्रे । पूर्णचन्द्र-उद्भटसागरमहाभागः सूत्रेऽस्मिन् दोषोऽस्तीति कथ्यते । यतः भट्टोजिदीक्षितेनापि योगपदेन समवाय-संयोगादययोः उल्लेखः क्रियते । अत्र उल्लेखनीयं प्रसङ्गेऽस्मिन् पूर्णचन्द्रमहाशयः विस्तारेण आलोचितवान् । स बोपदेवमहाभागस्य मतमुद्धृत्य प्रमाणयितुं चेष्टयते विद्यासागरस्य मतमत्र न समीचीनमेव ।

यदा अष्टाध्यायी-सिद्धान्तकौमुदी-कलाप-संक्षिप्तसार-सुपद्म-सारस्वत-मुग्धबोध-प्रयोगरत्नमालादीनां प्राचीनव्याकरणैः विना संस्कृतभाषायां प्रवेशः सर्वथा असम्भवः आसीत्, तदा शिक्षासंस्कारकविद्यासागरः शिशूनां पाठोपयोगिनीं संस्कृतव्याकरणस्य उपक्रमणिकां रचितवान् वङ्गभाषायां संस्कृतशिक्षार्थम् । तदनन्तरं व्याकरणकौमुद्याः संस्करणत्रयस्य प्रकाशादनन्तरं संस्कृतभाषायां व्युत्पत्तिलाभार्थं कारकविभक्तेः ज्ञानम् अत्यावश्यकमिति मत्वा तेन ग्रन्थस्यास्य चतुर्थभागे कारकस्य विस्तृता आलोचना कृता । सिद्धान्तकौमुद्याः पाठः प्रयोजनीय इति मत्वा तेन

२० तदेव, पृ.३८

पाणिनिव्याकरणस्य सरलतमं रूपं प्रस्तूतम् । वङ्गभाषायां संस्कृतव्याकरणस्य अधिगमार्थं तेन या पद्धतिर्गृहीता तस्य प्रभावो न कोऽपि विस्मर्तुं शक्नोति । विद्यासागरमहाभागेन प्रदर्शितो मार्ग्योऽयं बहिर्बङ्गेऽपि अनुसृतो भवति ।

✶✶✶

## Bibliography


1. *Aṣṭādhyāyī ;* Tapan Sankar Bhattyacharya (Editor) ; 2004
2. *Mugdhabodham Vyākaraṇam ;* Sri Jibananda Viyasagara Bhattyacharya (Editor) ; 1902 ; 2nd Reprint https ://archive.org/details/MugdhabodhamVyakaranam
3. *Samagra Vyākaraṇa –Kaumudī ;* Sriyukta Durgacharana Samkhya Vedantatirtha (Editor) ; Sanskrit Book Depot ; 2019 ; 2nd Edition
4. *Samaskrita Vyakarana o Bhasa Prasanga ;* Karunasindhu Das ; Sadesh ; 2005
5. *SamaskRitiki Prabandha-Saptaka ;* Bisnupada Bhattyacharya ; Jijnasa Agencies Limited ; 1991
6. *Shabdasastrer Itihas ;* Sri Kalijiban Devsharma ; Ramkrishna Mission Institute of Culture ; 2022 ; 2nd Reprint
7. *Vaiyakaraṇasiddhāntakaumudī ;* Sri Parameshvarananda Sharma (Editor) ; Motilala Benarasidas ; 1966
8. *Vidyasagara o Bangali Samaj ;* Binoy Ghosh ; Orient Longman ; 1973
9. *Vidyasagara O Bangali Samaj ;* Vol.I ; Binoy Ghosh ; Bengal Publishers Private Ltd ; 1364 (Bengal Year)
10. *Vyākaraṇa-Kaumudi* Vol.IV ī ; Sri Purnachandra De (Editor) ; S.C Auddy & CO ; 1922 ; https ://archive.org/details/in.ernet.dli.2015.345069


✳ ✳ ✳

# गीताशास्त्रे तत्त्वप्रतिपादनरीतिः

अनन्त मुखार्जी*

Abstract

[“गीता सुगीता कर्तव्या, किमन्यैः शास्त्रविस्तरैः” – इत्यस्ति आर्षवचनम् । भारतीयसमाजे जनमानसे च गीताशास्त्रस्य स्थानं महत् । साधारणतः धार्मिककार्येषु पूजाकर्मणि च गीतायाः व्यवहारः दृश्यते परन्तु गाम्भीर्येण अस्याध्ययने कृते सति जीवने जायमानानां विविधसमस्यानां समाधानम् सुतरां प्राप्यते, तत्र नास्ति संशयः । नैके महापुरुषाः विख्याताः जनाश्च गीताशास्त्रं अधीतवन्तः अपि च अद्यतनीये समाजेऽपि विख्यातचरित्राणि यथा–स्टीव जॉब्स, एलोन मस्क, दीपकचोपरा इत्येते गीताग्रन्थस्य निरन्तरम् अध्ययनं कुर्वन्ति, स्वजीवनेषु च ततः उद्भूतानि तत्त्वानि परिपालयितुं यतन्ते । अत्र अस्मिन् शोधपत्रे अस्माकं प्रमुखः विचारणीयविषयः वर्तते, गीताशास्त्रे कीदृश्यः तत्त्वप्रतिपादनरीतयः प्रतिफलिताः सन्ति । महाभारतस्य रचयिता भवति, कृष्णद्वैपायनव्यासमहर्षिः । संस्कृतवाङ्मये वेदविभाजनं, पुराणोपपुराणादिनां संरचना, जयकाव्यस्य लेखनकीर्तिः इति तस्य साहित्यकृतयः लज्जयन्ति हिमालयस्य शिखरमपि । तस्य च गीताशास्त्रे भगवतः मुखनिःसृतायाः वाण्याः उपस्थापनपद्धतिः तत्र च विषयोपन्यासक्रमः, प्रकरणानां पारस्परिकपौर्वापर्यप्रसङ्गरक्षा, उपक्रमोपसंहारादिषु तत्त्वस्य विस्तारः, प्रश्नोत्थापनं तस्य च निरसनम् अन्ते च सिद्धान्तकथनम् इति सर्वं कस्याश्चित् गवेषणायाः प्रकरणमिव विभाति । अद्यत्वे गवेषणाकार्येषु बहुषु स्थलेषु बहुविधाः शोधपद्धतयः उद्भूताः परन्तु, प्राचीनशास्त्रेषु व्यासादयः महर्षयः पूर्वमेव कथं रचनापद्धतिषु उपक्रमोपसंहारादिक्रमेण अस्मदीयप्राचीनज्ञानपरम्परायाः अनुसृता गवेषणाविज्ञानपद्धतिः परिपालिता, तदेव गीताशास्त्रस्य लेखनपद्धतिमनुपश्यन्तः विचाराय यतमानाः वयम् ।]

## ०. भूमिका

भारतीयदर्शनस्य प्रारम्भः वेदस्य प्रादुर्भावकालत एव समुत्पन्नः । ऐतिहासिकज्योतिषप्रमाणाभ्याम् ऋग्वेदस्योत्पत्तिः ५०० क्रिस्तपूर्वाब्दतः १००० क्रिस्तपूर्वाब्दपर्यन्तम् इति स्वीक्रियते विद्वद्भिः । दर्शनशास्त्राणां कालोऽपि तथैव स्वीक्रियते यतो हि ऋग्वेदस्य बहुषु स्थानेषु अनेकेषां दर्शनानां मूलस्रोतः क्षीणरूपेण प्रवहति इति दरीदृश्यते । एतेषां प्रवाहः धर्म-देश-काल-जात्यादिभिः न खण्डितः, अपि तु मानुषेभ्यः शान्तेः, आनन्दस्य,

* शोधच्छात्रः, संस्कृतपालिप्राकृतविभागे, विश्वभारती, शान्तिनिकेतनम्

ज्ञानस्य किञ्च करुणायाः एवञ्च सर्वात्मभावस्य अमूल्यम् उपदेशं ददाति । अत एव ज्ञानप्रवाहोऽयं सृष्टेः आदिकालत एव अविभक्तः ।

भारतीयषडास्तिकदर्शनसम्प्रदायेषु किञ्च अन्येषु प्राचीनशास्त्रेषु एका एव पटभूमिः भूयो भूयो दरीदृश्यते, तद्भवति कमपि विषयमाधारीकृत्य जिज्ञासा । वस्तुतस्तु नूतनं विषयमाधारीकृत्य जिज्ञासा एव भवति दर्शनस्य प्रधानं कार्यम् । अत एवोच्यते, 'तात्त्विकविषयस्य वास्तविकस्वरूपं बोधयति दर्शनम्' इति । वास्तविकस्वरूपबोधिनी तात्त्विकविषयसंयुक्ता एषा जिज्ञासा भारतीयशास्त्रेषु वेदादिषु बहुत्र दरीदृश्यते । यथा नासदीयसूक्ते,

किमावरीव कुह कस्य शर्म-
न्नम्भः किमासीद्गहनं गभीरम् ॥ [ऋग्वेदः १०.१२९.१]
तदनुसृत्यैव वेदः अग्रे प्रश्नमुपस्थापयति –
को अद्धा वेद क इह प्र वोचत्
कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाथा
को वेद यत आबभूव ॥ [ऋग्वेदः १०.१२९.६]

इत्येवं प्रकारेण हिरण्यगर्भसूक्ते, प्रजापतिसूक्ते, वाक्सूक्ते, उपनिषत्सु अपि 'जिज्ञासा' दरीदृश्यते । अत एव अनादिकालतः अनेकशास्त्रार्थैः सिद्धं प्रमेयं तत्त्वं युक्त्या किञ्च अनेकशङ्कानिरसनपूर्वकम् उपपत्त्या प्रमाणयितुं यतन्ते शास्त्रकाराः । अत एव ते शास्त्रस्य मूलभूमिः दृढा भवतु इति विचिन्त्य प्राचीनं तत्त्वं स्वीकृत्य नूतनरूपेण विश्लेषयितुं यतन्ते । एकमेव तत्त्वं नव-नव-रूपैः व्याख्यान्ति शास्त्रकाराः, अनेनैव एकस्य शास्त्रस्य बहवः ग्रन्थाः भवन्ति । तत्त्वं तु एकमेव, मार्गाः भिन्नाः । यदिदं तत्त्वं पौनःपुन्येन विश्लिष्य विचार्य वा प्रकाशयन्ति आचार्याः तदेव भवति 'गवेषणा' । आङ्गलभाषायां यस्य अभिधा भवति 'Research' एवञ्च गवेषणायाः काश्चन पद्धतयः सन्ति । यस्य नाम 'गवेषणाविज्ञानपद्धतिः', आङ्गलभाषायामेतस्य नाम भवति 'Research Methodology' । इदानीमस्मिन् सन्दर्भे प्रसङ्गौचित्येन विचार्यः विषयः भवति, किमिदं 'गवेषणाविज्ञानपद्धतिः' भारतीयशास्त्रकाराः तेषां पुस्तकेषु अनुसृताः आहोस्वित् तेषां काचिद्भिन्ना पद्धतिरेव आसीत् विषयप्रतिपादनाय, ग्रन्थरचनायै वा ।

**१. विषयप्रवेशः**

भारतीयप्राचीनविद्वांसः नूतनं विषयं स्वीकृत्य विचारयितुम् इच्छन्ति स्म । अत एव तेषां नये 'प्रज्ञा' अर्थात् बुद्धेः परिभाषा एव अन्या आसीत् ।

अत एव साहित्यकाराः एवं प्रस्तुवन्ति यत्, 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति । अर्थात् नवनवोन्मेषशालिनी प्रज्ञा इत्युक्ते बुद्धिः एव प्रतिभां वर्धयति । यथा प्रतिभया मनुष्यः नूतनं विषयम् उत्थाप्य, प्राचीनं तत्त्वं विश्लिष्य ततः नूतनं तत्त्वं निष्काशयति, सा 'गवेषणा' इत्युच्यते । प्राचीनभारतीयविद्वांसः नवीनरचनायाः किञ्च तस्याः शैल्याः उपरि अधिकं ध्यानं ददति स्म । कालिदासस्य मालविकाग्निमित्रनाटके तदेव ध्वन्यते–

पुराणमित्येव न साधु सर्वम्
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ [मालविकाग्निमित्रम् १.२]

अर्थाद् भारतीयविद्वांसः नावीन्यपटव आसन् इत्यत्र नास्ति सन्देहः ।

भारतीयप्रधानशास्त्रग्रन्थेषु अन्यतमं स्थानं भजते श्रीमद्भगवद्गीता । गीतायाः परिचितिः धर्मग्रन्थत्वेनैव सीमिता नास्ति । इदं गीताशास्त्रं दार्शनिकतत्त्वस्यापि मर्मस्पर्शिव्याख्यां प्रस्तौति । भगवान् कृष्णद्वैपायनोऽपि गीताशास्त्रस्य रचनावसरे गवेषणाविज्ञानपद्धतिमनुसृत्यैव स्वग्रन्थं ग्रन्थयामास न वा इति विचार अत्र प्रस्तूयते । यतो हि कश्चिद् विद्वान्, यदि स्वयं किञ्चित् नूतनग्रन्थं रचयति तर्हि तत्र तस्य गवेषणाप्रसूतं नूतनं फलमेव प्रस्तौति, न तु मत्सरात् यत्किञ्चिदालोच्यते, येन स न मूढः, स नूतनमेव किञ्चित् प्रस्तौति इति विषयः समागच्छति । तत्र तस्यापि विचारे इत्युक्ते गवेषणायां काचित् पद्धतिः स्यात्, इत्यतः गीताशास्त्रेऽपि भारतीयदर्शनस्य किञ्चित् नूतनं गवेषणालब्धं फलं स्यात् । यत् प्रतिपादयितुमिच्छति आचार्यः व्यासः, तदेव कथं कया पद्धत्या वा कृता, सा पद्धतिः किम् अद्यतनया गवेषणाविज्ञानपद्धत्या सह मिलति, इति विषये किञ्चित् आलोकपातं कुर्मः ।

## २. गीतायाः सामान्यपरिचयः

अखिलसंसारे बहुषु धर्मग्रन्थेषु विशिष्टं स्थानं भजते गीताशास्त्रम् । भगवान् श्रीकृष्णः स्वयमेव गीताशास्त्रस्य प्रवक्ता । भगवतः श्रीकृष्णस्य 'गीता मे हृदयं पार्थ' इति वचनादेव ज्ञातुं शक्यते गीतायाः माहात्म्यम् । अत एव गीता सनातनधर्मावलम्बिनां हृदयराजेश्वरी इति कथने अत्युक्तिः नास्ति । विभिन्नमतीयानां वादविवादः, निःश्रेयसः लाभे मार्गः कः? इति कोलाहलोऽपि गीता स्वमधुरसुभाषितया शान्तिदायिन्या वाचा अपनयति । गीतायां भारतीयदर्शनस्य सिद्धान्तानाञ्च एकीकरणं वारं वारं

दृश्यते । येन तत्त्वजिज्ञासूनां सर्वे मार्गा एव राजमार्गा इव विभान्ति, इत्यत एव लघुकायत्वादपि एतत् शास्त्रं कामधेनुः, कल्पवृक्षः वा इति अभिधीयते बुधजनैः । अष्टादशपर्वविशिष्टस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीतायाः सङ्कलनं कृतवान् भगवान् श्रीकृष्णद्वैपायनः व्यासः । गीता सप्तशतश्लोकविशिष्टा । गीतायाः विषये गीताध्याने उच्यते–

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयम्
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

[श्रीमद्भगवद्गीता, गीताध्यानम्, १]

इति भवति गीताशास्त्रस्य सामान्यः परिचयः, ननु समग्रे महाभारते, व्यासाचार्यः मार्मिकं दर्शनमेव प्रस्तौति तर्हि भीष्मपर्वणि गीताशास्त्रस्य विशिष्टरूपेण योजनेन किं साधितम् इति प्रश्ने सति उच्यते–

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥

[श्रीमद्भगवद्गीता, गीताध्यानम्, ४]

अर्थात् सर्वासाम् उपनिषदां सारभूतं तत्त्वमत्र लघुरूपेण प्रस्तौति व्यासः । सारभूतस्य तत्त्वस्य निष्काशने का गवेषणा आचार्यपादैः विहिता, कया पद्धत्या वा विहिता इति विषयस्यैव विचारः अत्र प्रस्तूयते ।

### ३. गीताशास्त्रे गवेषणाविज्ञानपद्धतिः

गीताशास्त्रे गवेषणाविज्ञानपद्धतिः अस्ति न वा इति विचारात् पूर्वम् अस्माभिः ज्ञातव्यं भवति, किं नाम अनुसन्धानम्? अर्थात् का नाम गवेषणा? यतो हि 'Research' इति आङ्गलशब्दस्य संस्कृतभाषायां 'गवेषणा', 'अनुसन्धानं', 'शोधः' इत्यादिभिः पदैः सह समानता अस्ति ।

'गवेषणा' इति अयं शब्दः वेदे प्रयुक्तः । 'गो' इति शब्देन सह इष्-धातुना ल्युट्-प्रत्यययोगेन 'गवेषणं' 'गवेषणा' वा शब्दः प्राप्यते । तत्र 'गो+एषणा' इति व्युत्पत्त्या ज्ञानस्यान्वेषणमित्यर्थः प्राप्यते ।

'शोध'-शब्दः शुध्-धातोः घञ्-प्रत्ययेन निष्पन्नः । शुद्धतायां परिमार्जने वा शब्दोऽयं प्रयुज्यते । शोधनार्थे प्रयुक्तस्य शोधशब्दस्य प्रमाणमपि मनुस्मृतौ प्राप्यते । यथा–

मृत्तोयैः शुद्ध्यते शोध्यं नदी वेगेन शुद्ध्यति । [मनुस्मृतिः ५.१०८]

अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति । [मनुस्मृतिः ५.१०९]

एतेषां पदानां पर्यालोचनेन इदं ज्ञायते यद् अन्वेषणपदेन अनुपलब्धस्य उपलब्धिः, शोध इति पदेन च यथार्थविवेचनं निर्णयो वा इत्यर्थः लभ्यते । एवञ्च ज्ञातविषयाद् अज्ञाततत्त्वानाम् आविष्करणं गवेषणा इति वक्तुं शक्यते । गीतायामपि भगवता श्रीकृष्णद्वैपायनव्यासेन सरलरीत्या वेदोपनिषद्भिः प्रतिपादितं दूरवगाहं तत्त्वं साधारणगृहिजनानां समीपे नवीनरूपेण प्रस्तौति । यथा, यदि कश्चित् जनः तस्य कर्माणि ब्रह्मणि आधाय तिष्ठति तर्हि तस्य पापलेपः न भवति । तदेव सरलतया नवीनरीत्या च प्रमापयति आचार्यः–

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ [श्रीमद्भगवद्गीता ५.१०]

अर्थाद् अस्मभ्यं पद्मपत्रस्य उदाहरणं प्रस्तूय नूतनरूपेण किञ्च सारल्येन उपनिषदोक्तं कठिनं निर्लेपतत्त्वं सर्वेभ्यः ग्राहयामास आचार्यपादः । इत्थं सारल्येन अनुपलब्धस्य तत्त्वस्य उपलब्धिं कारयति आचार्यः तस्य गीताशास्त्रे ।

**४.गीताशास्त्रे शोधप्रकृतिः (The characteristics of Research in Gita)**

वैज्ञानिकचिन्तनेन शोधस्य काश्चन विशिष्टाः प्रकृतयः ज्ञायन्ते । इमाः प्रकृतयः शोधकर्तुः कार्यदक्षतां सृजनशीलताम् अन्तर्दृष्टिं तथा कल्पनाशक्तिं च प्रभावयति । शोधस्य मौलिकतां सम्पादयितुं शोधकर्ता कासाञ्चिद् विशिष्टानां प्रकृतीनां विश्लेषणेन शोधकार्यं सम्पादयति । गीताशास्त्रमपि ततो भिन्नं नास्ति, ताः अधः आलोच्यन्ते –

१) शोधः मूलतथ्यतः नूतनं ज्ञानमुपस्थापयति । केवलं ज्ञातपूर्वस्य परिचयमात्रं न क्रियते, अपि तु मूलतः प्राप्तस्य तथ्यस्य तदुत्तरं सम्प्राप्तेन तथ्येन सह परिशील्य निर्णयः उपस्थाप्यते । गीतायामपि एतादृशः निर्णयः दृश्यते । यथा- आदौ भगवद्गीतायां द्वितीयोऽध्यायस्य चतुष्षष्टितमे श्लोके दृश्यते,

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

इत्यत्र सर्वानर्थस्य मूलं विषयाभिध्यानं किञ्च ततः यः आत्मवश्यः भवति स प्रसादम् अधिगच्छति इति विषयः प्रायः मूलतः कठोपनिषदः । तथाह्याम्नातं कठोपनिषदि –

पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मनमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥
[कठोपनिषद् २.२.१]

अर्थाद् उपनिषदोक्तम् इदम् इन्द्रियनिग्रहमूलकं मूलं तथ्यमेव नूतनतया प्रस्तौति एवञ्च केवलं ज्ञातपूर्वस्य अस्य विषयमात्रस्य परिचयं कारयति ततः प्रसादम् अधिगम्य ततः किं जायते इति,

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ [श्रीमद्भगवद्गीता २.६५]

एवम्प्रकारेण परस्मिन् श्लोके मूलतः प्राप्तस्य तथ्यस्य तदुत्तरं प्राप्तेन नूतनतथ्येन सह परिशील्य निर्णयमुपस्थापयति ।

२) शोधः भवति निपुणः सुव्यवस्थितः यथार्थपरीक्षितश्च । सः शोधकर्ता बहु प्रयत्नेन योजनाबद्धरूपेण तथ्यं समाकल्य विश्लेषयति । यथा कठोपनिषदि प्रेयसः इत्युक्ते कर्मणः विषये उच्यते,

श्रेयश्च प्रेयश्च मनुष्यमेतः तौ संपरीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥
[कठोपनिषद् १.२.२]

इत्यत्र प्रेयः योगक्षेमार्थम् एव वृणीते इति व्याख्याति श्रुतिः, तस्यैव प्रेयसः इत्युक्ते कर्मतत्त्वस्य भावं स्वीकुर्वन् निपुणं सुव्यवस्थापितस्य तथ्यस्य यथार्थरूपेण परीक्षणं सम्पाद्य कर्मणः विषयमपि नूतनतया शास्त्रे विश्लेषयति आचार्यः–

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ [श्रीमद्भगवद्गीता ४.१७]

तर्हि किं पुनः कर्मणः तत्त्वं यद् बोद्धव्यमिति । तदा उच्यते–

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ [श्रीमद्भगवद्गीता ४.१८]

एवञ्च, अन्ततो गत्वा कर्मणि अकर्मादिदर्शनमपि स्तूयते गीतायाम्–

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥ [श्रीमद्भगवद्गीता ४.१९]

इति ।

३) शोधः तर्कसङ्गतः वस्तुनिष्ठश्च भवति । शोधकर्ता स्वानुभवेन स्वकीयं कार्यं तर्कबुद्ध्या परिशीलयति । गीताशास्त्रेऽपि तर्कसङ्गतरूपेण

किञ्च वस्तुनिष्ठतया आचार्यपादः व्यासः प्रमाणयति ज्ञानस्य कर्मविनाशिनीं शक्तिम् । तद्यथा, आदौ गीतायाम्- 'उपदेक्ष्यन्ति ते ज्ञानं...'[१] इत्यादिना पदेन गुरोः ज्ञानं प्राप्य शिष्यः स्वस्य सर्वं पापं नाशयति इति तर्कसङ्गततया वस्तुनिष्ठरूपेण च प्रतिपादयति आचार्यः,

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । [२] इत्यत आरभ्य,
ज्ञानाग्नि सर्वकर्माणि भस्मसात्कुरुते तथा ॥[३]

एतावत् पर्यन्तं, तदेव च पुनः तर्कबुद्ध्या परिशील्य ज्ञानतत्त्वं द्रढयति आचार्यः, परस्मिन् श्लोके यज्ज्ञानं स्वयमेव योगसंसिद्धं, योगेन कर्मयोगेन समाधियोगेन च संसिद्धं, संस्कृतः योग्यताम् आपन्नो मुमुक्षुः, कालेन महता, आत्मनि विन्दति लभते इत्यर्थः । तद्यथा–

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।[४] इत्यादिना ।

४) शोधः एकः प्रामाणिकः मार्गविशेषः यः एकस्याः समस्यायाः विलक्षणं समाधानं कर्तुं समर्थः । तत्र कपोलकल्पितकल्पनायाः स्थानं मानञ्च नास्ति । श्रीमद्भगवद्गीतायामपि आचार्यः व्यासः स्वकपोलकल्पितं किञ्चिदपि न स्वीकरोति प्रस्तौति च । तस्य सर्वे श्लोकाः श्रुतेः प्रामाण्यमेव स्वीकृत्य नूतनतत्त्वान्वेषणतत्पराः इति अस्माभिः अस्मिन्नेव प्रबन्धे पूर्वत्र बहुषु स्थलेषु प्रदर्शितम् ।

इत्थं गीतायामपि शोधप्रकृतयः सुस्पष्टाः दृश्यन्ते अतः गवेषणाप्रकृतिः इत्युक्ते शोधप्रकृतिः अत्र समीचीनतया एव अनुसृता आचार्यपादैः । इतोऽपि बह्व्यः शोधप्रकृतयः सन्ति याभिः सह गीताशास्त्रस्य तत्त्वप्रतिपादनशैल्याः मेलनं दुःशकं नास्ति, परन्तु ग्रन्थविस्तरणभयादेतं विन्दुम् अत्रैव स्थगयामः ।

### ५. गीतायाः शोधप्रकारः (Type of Research in Gita)

भाषासाहित्यक्षेत्रे ये गवेषणात्मकाः निबन्धाः, प्रबन्धाः, ग्रन्थाः वा दृश्यन्ते तेषां पर्यालोचनेन तेषु त्रिविधता दृश्यते । ते च यथा- १.मौलिकशोधः २.व्यावहारिकशोधः किञ्च, ३.क्रियात्मकः शोधः । परन्तु एतदतिरिक्ततया केचन गवेषकाः कालदृष्ट्याऽपि शोधस्य विभाजनं कुर्वन्ति, तद्यथा- १.ऐतिहासिकशोधः, २.व्याख्यात्मकशोधः, ३.व्यावहारिकशोधश्च इति । गीताशास्त्रे यादृशी गवेषणा अर्थात् यादृशः शोधः दृश्यते तद्दृष्ट्या इदमेव वक्तुं

१ श्रीमद्भगवद्गीता ४.३४
२ श्रीमद्भगवद्गीता ४.३६
३ श्रीमद्भगवद्गीता ४.३७
४ श्रीमद्भगवद्गीता ४.३८

शक्यते यत् गीताशास्त्रे मौलिकशोधः एवञ्च व्याख्यात्मकशोधः इति द्विधा शोधप्रकाराः दृश्यन्ते । प्राचीनशास्त्रीयसिद्धान्तमाधारीकृत्य गवेषणाद्वारा यत् प्रामाणिकं तथ्यं लभते, तत्तु सर्वथा मौलिकं भवति, तत्र मौलिकता सर्वथा संरक्षिता भवेत् ।

एवञ्च समस्यायाः मूलं ज्ञात्वा तस्य सरलसमाधानाय व्याख्यात्मकः शोधः प्रस्तूयते । केषाञ्चन मते अयं विश्लेषणात्मकः भवति । अत्र केवलं तथ्यानां सङ्ग्रहणं सङ्कलनं वा न भवति, अपि तु तदीयं विश्लेषणं विधाय मूल्यायनं क्रियते । एतादृशी व्याख्यात्मिका गवेषणा संस्कृतशास्त्राणां प्राचीनतथ्यस्य च रक्षणे नितराम् उपयोगिनी । यथा मुण्डोकोपनिषदि आम्नायते, 'अशब्दम् अस्पर्शम् अरूपमव्ययं, तथाऽरसं नित्यमगन्धवच्च यत्'[५] इति, मुण्डकोपनिषदि अपि अग्निविस्फुलिङ्गस्य उपमां प्रस्तूय ब्रह्मण एव सर्वाः सृष्टयः व्याख्याताः किन्तु ततः परं पुनः श्वेताश्वतरोपनिषदि ततः भिन्नं तत्त्वं प्रस्तौति, तत्रोच्यते- 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।'[६] इति प्राचीनं परस्परविरोधि तथ्यद्वयम् उपनिषदि अस्ति, तस्यैव भावं स्वीकृत्य भगवान् व्यासः त्रयोदशे अध्याये आदौ प्रस्तौति,

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥[७] इति

परन्तु तथापि सर्वत्र ब्रह्म वर्तते, तदेव सर्वं परिचालयति किञ्च सर्वेषु जीवेषु स्थित्वा अकुर्वन्नपि सर्वं करोति इति नूतनतया मौलिकरूपेण किञ्च मूलं ज्ञात्वा सरलसमाधानाय इदं स्वविरोधितत्त्वं प्रस्तौति

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ [श्रीमद्भगवद्गीता १३.१३]

अत्र एवं बोद्धव्यं यत् सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञास्तित्वं विभाव्यते । क्षेत्रोपहितत्वात् क्षेत्रज्ञ इति कथ्यते । एवञ्च क्षेत्रं पाणिपादादिभिः अनेकधा भिन्नम् ।

इत्थम्प्रकारेण ब्रह्मणः निष्क्रियत्वं, किञ्च सर्वकर्म ब्रह्म इति निरूपणं मौलिकरूपेण विस्तारेण च गीताशास्त्रे व्याख्याति आचार्यः व्यास इत्यतः गीतायां मौलिकगवेषणा किञ्च व्याख्यात्मकगवेषणेति उभयं दृश्यते ।

---

[५] कठोपनिषद् १.३.१५
[६] श्वेताश्वतरोपनिषत् ३.१९
[७] श्रीमद्भवद्गीता १३.१२

## ६. गीतायां गवेषणापद्धतेः आकारः (Research Design in Gita)

यस्य कस्यापि प्रबन्धस्य ग्रन्थस्य वा रचनायै कश्चित् सुनिर्दिष्टः आकारः दृश्यते, यदाकारं स्वीकृत्य ग्रन्थस्य प्रबन्धस्य वा रचनाशैली अग्रे प्रवहति । साधारणतः गवेषणायाः आकारः चतुर्विधः भवति, तद्यथा- व्याख्यात्मकः, विश्लेषणात्मकः, परीक्षणात्मकः किञ्च मौलिकः ।

गीताशास्त्रस्य रचनाशैल्यां द्विविधः आकारः दृश्यते, तद्यथा श्रुतेः किञ्च उपनिषदः एव तत्त्वं स्वीकृत्य नूतनतया व्याख्याति किञ्च केषुचित् स्थलेषु नूतनतया श्रुतेः गूढं तत्त्वं विश्लिष्य तत्र सारल्यमुत्पादयति ।

## ७. रचनार्थं तथ्यसंग्रहः

यदा अस्माभिः गृहनिर्माणं क्रियते, तदा गृहस्य निर्माणाय आदौ इष्टिका-काष्ठखण्ड-सिकतानां प्रयोजनम् अनुभूयते यतो हि ते एव पदार्थाः गृहनिर्माणे उपकरणानि, तद्वदेव कस्यचिदपि ग्रन्थस्य, प्रबन्धस्य वा लेखनार्थं तदुपयोगीनि तथ्यानि अपेक्षितानि, गीतायामपि श्रुतितः बहुनि तथ्यानि स्वीकृतानि, एकेन उदाहरणेन प्रस्तूयते,

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

[श्रीमद्भगवद्गीता २.२०]

इत्ययं मन्त्रः यथा गीतायां दृश्यते तथैव किञ्चिद् भिन्नरूपेण कठोपनिषदः प्रथमस्य अध्यायस्य द्वितीयवल्ल्याम् अष्टादशतमे मन्त्रे दृश्यते ।

## ८. गीताशास्त्रे विषयनिर्वाचनम् (Selection of Topics in Gita)

कस्याश्चिदपि गवेषणायाः कृते विषयनिर्वाचनं महत्त्वपूर्णं भवति । ग्रन्थरचनार्थमपि एषा युक्तिः समाना एव । समुचितविषयं विना ग्रन्थे, प्रबन्धे, यत्र कुत्रापि लेखनकार्ये वा नावीन्यं न प्रतीयते । अतः पथिकः यथा स्वगन्तव्यस्थलं ज्ञात्वा ततः परं गृहान्निसरति तथा ग्रन्थरचनायै प्रथमः पदक्षेपः विषयनिर्वाचनम् । गीताशास्त्रेऽपि भगवान् कृष्णद्वैपायनः व्यासः विषयनिर्वाचनक्षेत्रे योजनाबद्धपद्धतिः, स्वच्छन्दा वैयक्तिकी पद्धतिः । किञ्च पर्यायक्रमेण विषयोपस्थापनपद्धतिः इति पद्धतित्रयमनुसृतवान् तद्यथा, भगवान् व्यासः गीताशास्त्रे वेदान्तशास्त्रस्य उत्कृष्टतत्त्वमेव प्रतिपादयति । तत्र सः आत्मनः विषये, ब्रह्मणः विषये, प्रकृतेः स्वरूपस्य विषये, श्रद्धाविषये योजनाबद्धतया विस्तृतरूपेण प्रतिपादयति । सरलरीत्या उपनिषत्प्रतिपादितानां तत्त्वानां निर्यासं स्वीकृत्य स्वच्छन्दवैयक्तिकपद्धत्या

प्रस्तौति । किञ्च, तत्रैव आदितः युद्धक्षेत्रे अर्जुनस्य विषादः, तं प्रति कृष्णस्य आत्मतत्त्वोपदेशः, कर्म-ज्ञान-भक्ति-राजयोगानां विषये आलोचना, भगवतः सर्वविभूतिमत्त्वमिति प्रत्यध्यायं गीताग्रन्थे पर्यायक्रमेण प्रस्तौति भगवान् व्यासः, यथा कश्चिन्मुमुक्षुः एतं ग्रन्थम् अधीत्य तल्लक्ष्यं प्रति अग्रेसरः भवेत्, तथैव निर्दिशति गीताग्रन्थे ।

## ९. गीताशास्त्रे व्यवहृता प्राचीना गवेषणाविज्ञानपद्धतिः

एतावता गीताशास्त्रे या गवेषणापद्धतिरालोचिता तत्र नवीन-गवेषणापद्धत्या सह सङ्गतिं संस्थाप्य विषयाः उल्लिखिताः । परन्तु प्राचीन-भारतीयलेखनकलासु रचनासु ग्रन्थप्रणयनरीतिषु च काचित् अन्या पद्धतिः व्यवह्रियते स्म । तत्र लोकप्रसिद्धं शास्त्रप्रसिद्धञ्च कारिकाद्वयं तावत् प्रमाणम् ।

प्रथमा तु –

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

तत्र प्रकरणप्रतिपाद्यस्य अर्थस्य तदाद्यन्तयोः उपपादनम् उपक्रमोपसंहारौ, गीता शास्त्रेऽपि बहुत्र एवं दृश्यते, यथा –

त्रयोदशोऽध्याये क्षेत्रक्षेत्रज्ञविभागयोगे क्षेत्रस्य क्षेत्रज्ञस्य च विषये प्रकरणमित्थमारभ्यते-

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ [श्रीमद्भगवद्गीता १३.१]

इति आरभ्य सम्पूर्णे अध्याये क्षेत्रस्य क्षेत्रज्ञस्य विषये सम्यक् प्रतिपाद्य अध्यायं तमेव विषयमाधृत्य समापयति,

तत्र शङ्कराचार्योऽपि तस्य अन्तिमश्लोकस्य भूमिकायां लिखति, समस्ताध्यायार्थोपसंहारार्थः अयं श्लोकः इति । श्लोकस्तावत् –

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यन्ति ते परम् ॥ [श्रीमद्भगवद्गीता १३.३५]

तत्र अभ्यासो नाम प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यासः, यथा गीतायां द्वितीये अध्याये,

स्थितप्रज्ञयोः विषये पृष्टे सति, कस्य प्रज्ञा प्रतिष्ठिता भवति इति त्रिकृत्वः अभ्यासः दृश्यते,

य सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ [श्रीमद्भगवद्गीता २.५७]

इति द्वितीयाध्यायस्य सप्तपञ्चाशत्तमे श्लोके प्रथमम् उक्तम् । ततः–

यदा संहरते चायं कुर्मोऽङ्गानीव सर्वशः ।
इन्द्रियानिन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

[श्रीमद्भगवद्गीता २.५८]

इति तत्रैव अष्टपञ्चाशत्तमे श्लोके,

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशो हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

इति एकषष्टितमे श्लोके,

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

इति अष्टषष्टितमे श्लोके । इत्थं तत्र द्वादशाध्यायेऽपि मद्भक्तः स मे प्रियः इति पादस्य वारचतुष्ठयमभ्यासः दृश्यते ।

प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तराविषयीकरणम् अपूर्वता । यथा अष्टमे अध्याये अष्टमे च श्लोके–

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥

अर्थात् परमपुरुषस्य प्राप्त्यै अभ्यासयोगयुक्तेन, ईश्वरे चित्तसमर्पणविषयीभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षण विलक्षण-प्रत्ययानन्तरितः अभ्यासः । स च अभ्यासो योगः तेन युक्तं योगिनः चित्तं समाहितं स्यात् । तदैव परमपुरुषस्य दिव्यं चिन्तनम् । तत्पश्चात् तस्य प्राप्तिः सम्भवति । अत्र, अभ्यासयोग एव अपूर्वता, ततः अन्यथा परमपुरुषप्राप्तिः दुःशका ।

फलं तु प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा गीतायां परमपुरुषस्य भगवतः प्राप्तेः उपायादिकमुपस्थाप्य परमपुरुषप्राप्तौ किं फलं लभ्यते इति विषये उच्यते अष्टमे अध्याये–

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥
आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ [श्रीमद्भगवद्गीता ८.१४-१६]

इत्यादिकं फलं ब्रह्मप्राप्तेः विषये व्याख्यातं गीताशास्त्रे ।

प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवादः, द्वितीयाध्याये पञ्चषष्टितमे श्लोके स्थितप्रज्ञस्य विषये प्रतिपादनवेलायां स्थितप्रज्ञावस्थायां यत्प्रसादं लभते तस्य प्रशंसाम् अर्थवादं वा उपस्थापयति गीता –

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ [श्रीमद्भगवद्गीता २.६५]

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः । यथा द्वितीयाध्याये षड्षष्टितमश्लोकतः सप्तषष्टितमश्लोकपर्यन्तं उपरतेन्द्रियस्य मनुष्यस्य विषये उच्यते,

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥

इत्थं प्राचीनपद्धतौ कस्यापि विषयस्य सन्दर्भस्य ग्रन्थस्य प्रबन्धस्य प्रकरणस्य वा उपस्थापनं भवति स्म । एषा एव गवेषणायाः प्राचीना भारतीया पद्धतिः । गीताशास्त्रे तदपि स्थाने स्थाने सम्यग्रूपेण प्रतिफलति इति दृष्टम् ।

काचिद् अन्यापि प्राचीना पद्धतिः दृश्यते तद्यथा–

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ॥

अत्र यत् क्षेत्रं प्रकरणं वा आधृत्य आलोचना भविष्यति सः विषयः । तत्र विशयः नाम सिद्धान्तः । सङ्गतिः अर्थात् प्रकरणस्य अन्यविषयानुसारं अन्यसन्दर्भानुसारं वा प्रामाण्यम् । पूर्वपक्षः नाम तत्रोत्थिता शङ्का, उत्तरपक्षः तस्यैव समाधानं प्रददाति । प्राचीने काले शास्त्ररचनायाः इदमेव वैशिष्ट्यमासीत् । गीतायामपि तद्दृश्यते, यथा सप्तमाध्याये त्रिंशत्तमे श्लोके कश्चिद् विषयः उत्थापितः–

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥ इति

ईश्वरस्य ज्ञानं कथं स्यात् तस्य भावः कथमाप्तव्यः, किमर्थं वा जरामरणमोक्षाय ईश्वरम् आश्रित्य भक्ताः यतन्ति इति प्रसङ्गे आधिभूताधिदैविकादिविषयकाः प्रश्ना उपस्थापिताः । ततः परस्मिन् अध्याये अर्थात् अष्टमाध्याये प्रथमद्वितीयश्लोकयोः एव अर्जुनस्य शङ्का उदिता,

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥
अधियज्ञः कथं कोऽत्र देहेस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥

इति अत्र पूर्वपक्षः । अर्थात् एतत् सर्वं किं भवति, कथं वा एतेषु विषयेषु ज्ञानं स्यादिति भवति जिज्ञासा, तत्र समादधाति भगवान्, अष्टमाध्यायस्य तृतीये श्लोके,

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः ॥ इत्यध्यात्ममुक्तम् ।

तत्रैव अग्रे प्रतिपाद्यते क्षरो भावः भवति अधिभूतं, आदित्यान्तर्गतो हिरण्यगर्भः सर्वप्राणिकरणानाम् अनुग्राहकः सः अधिदैवतम् । अधियज्ञः सर्वयज्ञाभिमानिनी देवता विष्ण्वाख्या "यज्ञो वै विष्णुः" इति श्रुतेः । इत्थं उत्तरपक्षत्वेन अधिभूताद्यधियज्ञान्तं संशयोत्पन्नानां प्रश्नानामुत्तराण्यपि प्रदत्तानि । अग्रे ईश्वरप्राप्तेः विषये प्रकरणे विशयमर्थात् सिद्धान्तमित्थं प्रस्तौति, अष्टमेऽध्याये पञ्चमे श्लोके,

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥

अर्थात्, मरणकाले माम् एव परमेश्वरं विष्णुं स्मरन् मुक्त्वा परित्यज्य कलेवरं शरीरं यः प्रयाति गच्छति स वैष्णवं तत्त्वं याति ।

तत्र केवलं वैष्णवं तत्त्वं प्रति न अपि तु अन्यत्रापि–

यं यं वापि स्मरन् भावं त्यज्यत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ [श्रीमद्भगवद्गीता ८.६]

अर्थात् न हि केवलं मरणकाले विष्णोः स्मरणवशात् तदेव भावं प्राप्नोतीति अपि तु यं भावं स्मरति तमेव भावमाप्नोति इति भवति संगतिः ।

इत्थं विषयादिक्रमेण सङ्गतिपर्यन्तं कथं शास्त्ररचनायाः शैली रीतिः वा प्राचीने समाजे प्रचलिता आसीत् । गीताशास्त्रे कथं वा तदनुसृता इति व्याख्यातम् । अधिकजिज्ञासवः शाङ्करभाष्यादिषु रमन्ताम् ।

## १०. उपसंहारः

सार्वभौम-सिद्धान्तप्रतिपादिका गीता भगवतः श्रीकृष्णद्वैपायनव्यासस्य महान्तं गवेषणालब्धं फलं इति गवेषणाविज्ञानपद्धतिम् आधारीकृत्य विश्लेषयामश्चेत् सुनिश्चितरूपेण प्रमाणितः भवति । अत्र सरलसंस्कृतभाषया

अनुष्टुप्छन्दोबद्धाः श्लोकाः प्रस्तुताः सन्ति, परन्तु अत्र विषयवस्तु गभीरं सदुपदेशपूर्णं किञ्च उपनिषदः तत्त्वैः जाडितम् । एतस्मिन् विषये व्यासः स्वयं ब्रूते–

'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥' इति शिवम् ।

## Bibliography

1. *ईशादि नौ उपनिषद्*; गीताप्रेस ; गोरखपुर ; २०७५ तमे विक्रमसंवत्सरे एकत्रिंशतत्तमं पुनर्मुद्रणम्
2. *संस्कृतशोधविधिः* ; सत्यनारायणः मूर्तिः ; राष्ट्रीयसंस्कृतविद्यापीठम् ; तिरुपतिः ; २०१२ तमे क्रिस्ताब्दे पुनर्मुद्रितम्
3. *श्रीमद्भगवद्गीता ( शाङ्करभाष्य हिन्दी-अनुवादसहित)* ; गीताप्रेस ; गोराखपुर ; २०६९ तमे विक्रमसंवत्सरे एकत्रिंशततमं पुनर्मुद्रणम्
4. *उपनिषद् जड़ ओ जीवतत्त्व*; हीरेन्द्रनाथः दत्तः ; इन्डियान् आसोसियेटेड् पाब्लिशिं कोम्पानि प्रा. लि. ; १३५९ बङ्गाव्दे मुद्रितम्
5. *संस्कृतसाहित्येतिहासः* ; मिश्रः श्रीरामचन्द्रः ; चौखम्बा विद्याभवन ; वाराणसी ; २०१० क्रिस्ताब्दे मुद्रितम्

✳ ✳ ✳

# समाजसंस्कारक-कर्मयोगः

सुवर्णापालः *

## Abstract

[भारतीयज्ञानपरम्परायां प्रथितेषु विविधयोगेषु कर्मयोगः अन्यतमतां भजते। फलाभिसन्धिरहिततया कर्मानुष्ठानं कर्मयोगः उच्यते। विवेकानन्दस्वामिपादैः स्वभाषणमालायाम् अयं योगः अवश्यकर्तव्यतया बहुधा समुपदिष्टः। योगस्यास्य अनुष्ठानेन समाजे शान्तेः प्रतिस्थापनं सम्भवति। इयं च शान्तिः अद्यतनीयसमाजे समतामानेतुं क्षमते इति अयं कर्मयोगः समाजसंस्कारकः इति कथयितुं शक्यते। अयमेव विषयः प्रकृतेऽस्मिन् शोधप्रबन्धे विस्तरेण प्रतिपादितः। तत्र मूलतो विभागत्रयं प्रबन्धस्यास्य विहितम्। प्रथमभागे स्वामिचरणानां कर्मयोगः तदुक्तिसमुद्धरणपुरःसरं निरूपितः, द्वितीयभागे कर्मयोगानुष्ठानेन समाजसंस्कारकस्य उपायाः समुपवर्णिताः, अन्तिमविभागे च प्रबन्धस्यास्य सारः सङ्कलितः। अन्ते च सामूहिकशान्तिरेव कर्मयोगस्य फलत्वेन प्राप्ता इति शिवम्।]

मनुष्यः सामाजिको जीवः। "पशूनां समजोऽन्येषां समाजः..." इत्यमरकोशवचनात् (सिंहः, २०२०, पृ.१८२) समाजो नाम पशुभिन्नानां समूह इति ज्ञायते। को भेदो मानवपश्वोः? स च धर्म इति। तदुच्यते हितोपदेशस्य प्रास्ताविकांशे—

आहार-निद्रा-भय-मैथुनञ्च
सामान्यमेतत् पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो
धर्मेण हीनाः पशुभिः समानाः ॥२५॥ इति।

अतः समाजो नाम धार्मिकाणां समूह इति। अत इदं वक्तुं शक्यते यद् यत्र धर्मो न तिष्ठति स न समाजपदवाच्य इति। आङ्गलभाषायां समाज इत्यस्याभिधानं 'society' इति। शब्दोऽयं 'societe' इति फ्रेञ्च्-शब्दाद् आगतो यस्यार्थो गोष्ठी सङ्गो वा (company)। पुनः फ्रेञ्च् शब्दोऽयं, 'societas' इति लातिनशब्दादागतो यः पुनः मित्रवाचकात् 'socius' इति विशेष्यान्निष्पन्नः।

The term "society" came from the 12th-century French *société* (meaning 'company'). This was in turn derived from

---

* शोधच्छात्रा, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने

the Latin word societas, which in turn was derived from the noun *socius* ("comrade, friend, ally"; adjective form *socialis*) used to describe a bond or interaction between parties that is friendly, or at least civil ('Society', 2023).

अतः समाजशब्देन साकं धर्मस्य मित्रतायाश्च सम्बन्ध ओतप्रोतः । परन्तु वर्तमानसमाजस्येदं वैशिष्ट्यं युद्ध-साम्प्रदायिकसंघर्ष-आतङ्कवादादिना वस्तुतो दूषितमेव जातम् । कुत्र शान्तिः समाजे । परन्तु न कदाचिद् इदं काम्यं कैश्चिदपि । उक्तं तावत् आत्मप्रियानन्दस्वामिभिः यत् शान्तिरेव सर्वैरभिलषितेति—

In a world that is torn asunder by strife and conflict, peace is the healing balm that every human being is seeking with tearful eyes and an anguished heart. 'Peace, O Peace' is the song of the soul everywhere—East or West, North or South. Terror-stricken and panic-driven, the human heart throbbing in any part of the globe cries for peace and tranquility, harmony and concord. (Swami Atmapriyananda, 2018, p.48)

साम्यमेव अन्तः सर्वचाञ्चल्यस्य । इदमस्माभिः दृष्टमेव यत् पुष्करिण्यादौ शिलाखण्डपातनजनितविक्षेपस्य परिसमाप्तिः समतायामेव । त्रिगुणविक्षेपाद् उत्पन्नं जगदपि समतायामेव समाप्तिमेति । अत एव समाजविषये विवेकानन्दस्वामिपादेन उक्तं यत्—

Society did not exist ages ago, possibly will not exist ages hence. Most probably it is one of the passing stages through which we are going towards a higher evolution... (CWSV 2, p.64).

परन्तु किमर्थं वयम् अस्य उच्चतरविकाशस्य ('higher evolution') त्वरया साधनाय प्रयत्नं न कुर्मः ? किमर्थं दुःखादिकं सहामः, शान्तेरागमनाय च अपेक्षां कुर्मः ?

शोकमोहादितः परित्राता तावद् योगः । युज्यतेऽनेनेति योगः । येन अस्माकं स्वस्वरूपावगमो भवति स योग इति । मानवजीवनस्य सर्वविधदुःखानां मूलं तावत् तेषां स्वस्वरूपविषयकमज्ञानमिति । योगः तदज्ञानं दूरीकरोति येन स्वस्वरूपं प्रकाशवत् स्वयमेव उद्भासते । तेन दुःखकारणनाशे दुःखनाशात् शान्तिरेव अवतिष्ठते । ज्ञान-कर्म-

भक्ति-राजयोगाः तच्छान्त्युपगमनाय मार्गेषु अन्यतमाः । प्रत्येकं व्यक्तिः स्वप्रकृत्यनुसारं तत्तद्योगमार्गानुसारिणी भवति ।

कर्मयोगाभ्यासेन कथं वर्तमान-युद्ध-ग्रस्त-समाजात् हिंसाशान्त्यादिकं दूरीकर्तुं शक्यते इति अस्मिन् पत्रे स्वामिविवेकानन्दप्रोक्त-कर्मयोगस्य आलोकेन दर्शयितुं प्रयत्नः विहितः अस्ति । कर्मयोगस्तावत् मानवजीवनं प्रति विरामाघोषणपूर्वकं कर्मणश्च आत्यन्तिकत्यागं विनैव दैनन्दिनकर्मसम्पादनेन अस्मदाकाङ्क्षितां शाश्वतशान्तिम् आनेतुं समर्थः अस्ति । कर्मयोगाभ्यासेन समाजे शान्तिः प्रतिष्ठापयितुं शक्या इति दर्शयितुं प्रकृतनिबन्धः त्रीभिः विभागैः विभक्तः अस्ति । प्रथमविभागे स्वामिविवेकानन्दस्य मतेन कर्मयोग आलोचितः । स्वामिप्रोक्तः स कर्मयोगः कथं समाजे शान्तेः पुनः प्रतिस्थापने समर्थः इति चर्चा द्वितीयविभागे कृता वर्तते । अत्रेदमालोचितं यत् 'जगत् नास्माकं स्थायिरूपेण वासस्थानम्' इति मनोभावेन, 'कर्मणो भगवदुपासनात्वेन परिणमनं कृत्वा' तथा 'कार्यार्थमेव कार्यं करणीयम्' इति मनसि निधाय अनासक्ततया कर्मसम्पादनेन समाजे शान्तिः स्थापयितुं शक्यते इति । समग्रनिबन्धस्य च सार आलोचितः तृतीये अर्थात् उपसंहाररूपे अन्तिमविभागे ।

### **१. स्वामिविवेकानन्दप्रोक्तकर्मयोगः**

मोक्षरूपपरमपुरुषार्थप्राप्त्यर्थं प्रसिद्धेषु मार्गेषु कर्मयोगः अन्यतमः । अद्यतने कार्यव्यापृते विलासपूर्णे च जीवने जना एतावन्तो मग्नाः सन्ति यत् आध्यात्मिकविषयस्य श्रवणस्य चर्चायाः वा समयो नास्ति तेषाम् । परन्तु सुखस्य प्राप्तये कृतं कर्म, धनोपार्जनं, विलासादिकं च वस्तुतः कदापि परमसुखसाधकं न भवति, किन्तु अस्माकं जीवने दुःखमेव आनयति । विषयममूम् अज्ञात्वैव जनाः सर्वकामानां पूर्तेः भोगाद् वा अनन्तरमेव सन्तुष्टिः शान्तिः आगमिष्यतीति धिया अधिकसुखप्राप्त्याशया भोगेषु अधिकाधिकं निमग्ना भवन्ति यद्वस्तुतः दुःखे एव पर्यवस्यति । कामपूर्तिस्तावत् अग्नौ घृताहुतिरिव । तद्यथा अग्नौ घृतदाने सः अप्रशमितः सन् वर्धते एव तथैव कामनापि, एकस्याः पूर्तौ पुनः सहस्राधिका आविर्भवन्ति । अतः कामपूर्तिर्न कामदमनस्य साधिका । तदुक्तं विष्णुपुराणे—

न जातु कामः कामानामुपभोगेन शाम्यति ।  
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

[विष्णुपुराणम् ४.१०.९] इति ।

तस्मात् कामना न कदापि पूर्यते । अतः भोगापेक्षया तदसारत्वं ज्ञात्वा तत्त्यागः एव कार्यः । तत्त्वमिदं ज्ञात्वापि अनेके कामनापूर्तिसाधकरूपकर्मणः बन्धनात् बहिरागन्तुमसमर्था भवन्ति । पूर्वजन्मनः दृढसंस्काराः, वर्तमानजन्मनः सामाजिकी पारिवारिकी परिस्थितिर्वा आध्यात्मिकोन्नतेः मार्गे प्रतिबन्धका भवन्ति । अस्यां विंशशताब्द्यां कर्मयोगस्य प्रासङ्गिकता अत्रैव यत् नायं कर्तव्यकर्म परित्यज्य व्यक्तिं कर्मविमुखतायै उपदिशति । नायं कर्मव्यापृतजीवने आध्यात्मिकग्रन्थपठनाय आध्यात्मिकविषयचर्चायै वा समयदानार्थं प्रार्थयति किन्तु स्वस्वकर्मणैव कथं व्यक्तिजीवनस्य आध्यात्मिकोन्नतिसाधनेन आत्यन्तिकी शान्तिः लभ्यते तथा वर्तमानसमाजे कथं शान्तिः पुनः स्थापयितुं शक्यते तद्विषये दिशं दर्शयति । व्यष्टिषु शान्तेरानयनात् समष्टिसमाजेऽपि शान्तेरागमनं भवतीति तु स्वत एव सिद्धं यतो हि समष्टिर्न व्यष्टिभ्यो भिन्ना । मानव एव समाजस्य मूलभूतमुपादानम् । तदुक्तं स्वामिविवेकानन्देन—

"बुद्धः प्रधानतः ध्यानेन, ख्रीष्टः प्रार्थनया वा यदवस्थामलभत, मनुष्यः कर्मणैव केवलेन तदवस्थामवाप्तुं शक्नोति" इति (विवेकानन्द, १३८३, पृ.३२) ।

परन्तु कर्म खलु बन्धनकारणरूपेणैव शास्त्रेषु प्रसिद्धम् । उक्तं तावत् श्रीमद्भगवद्गीतायां भगवता स्वयमेव—

सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ [गीता १८.४८] इति ।

अतः स्वभावतः प्रश्न उत्थाप्यते यत् यः स्वयमेव दोषान्वितः कथं तेन समाजस्य दोषनिवारणं शक्यमिति । उत्तरं तावदस्य इदं यत् न सर्वाणि कर्माणि भवचक्रावर्तनकारणरूपाणि दोषयुक्तानि किन्तु सकामकर्माण्येव । योगस्तावत् बन्धनकारणभूतकर्मणः मुक्तिकारणत्वेन परिणामाय कौशलमिति । तदुक्तं गीतायाम्—

योगः कर्मसु कौशलम् ॥ [गीता २.५०] इति ।

ननु किंस्वरूपमिदं कौशलमिति चेत् अनासक्तिः । कामनारहिततया निष्काममनसा कृतं कर्म न बन्धनाय किन्तु मुक्तये इति भावः । अत उक्तं भगवता श्रीकृष्णेन स्वप्रियशिष्याय अर्जुनाय—

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ [गीता ३.७] इति ।

स्वामिविवेकानन्देनोक्तं यत् "Non-attachment is complete self-abnegation" (CWSV 1, p.81) इति । अस्यार्थः -

अनासक्तिरेव पूर्णरूपेण आत्मत्याग इति । कर्मयोगविषये तेनोक्तं यत् निःस्वार्थकर्मसम्पादनेन मानवजीवनपरमलक्ष्यभूतमोक्षस्य प्राप्तिरेव कर्मयोग इति (विवेकानन्द, १३८३, पृ.८९) ।
उक्तं भगवतापि—

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ [गीता ३.१९] इति ।

अस्यार्थः— अनासक्तचित्तेन सदा कर्मानुष्ठानं कर्तव्यम् । यतो हि अनासक्तेन कृतं कर्म मोक्षाय कल्पते इति ।

कर्महीनता न कदापि मोक्षसाधिका । भगवता तत्स्वयमेवोक्तं यत् कर्माननुष्ठानेन नैष्कर्म्यसिद्धिर्न जायते इति ।[१]

स्वामिविवेकानन्देनाप्युक्तं यत् जगत्यस्मिन् न केनापि किमपि विनायासेन लब्धुं शक्यते इति : "...there is and can be nothing freely given" (CWSV 4, p.259).

कर्मणो महत्त्वं किमस्तीति बोधनाय भगवान् स्वात्मानमेव दृष्टान्तत्वेन उपस्थापयति यत् यद्यपि तस्य कर्तव्यकर्म, प्राप्तव्यमप्राप्तव्यं वा किमपि नास्ति तथापि स सर्वदैव कर्मणि रतः इति (गीता ३.२२) । अतः कर्म करणीयमेव । नित्यं कर्म कर्तव्यम्, अकर्मणः कर्म ज्यायः, कर्माननुष्ठानेन शरीरयात्रापि न सिद्ध्यतीति अर्जुनः भगवता बहुधा उपदिष्टः (गीता ३.८) । इदमेव कर्म यदा निःस्वार्थभावनया क्रियते तदा तद्योगत्वेन परिणमते ।

युगनायकेन विवेकानन्देन बहुस्थानानि परिभ्रम्य बहुजनैः मेलनेन जातेर्दुःखं परिदृष्टं, आध्यात्मिकज्ञानमेव सर्वविधदुःखानां समूलोत्पाटने समर्थमिति अनुभूतं च यतो हि तेनेदं ज्ञायते यत् आध्यात्मिकी शक्तिरेव अस्मज्जीवनस्य सर्वविधकर्मप्रचेष्टानां भूमिस्वरूपेति— "...spirituality is the true basis of all our activities in life" (CWSV 1, p.52)। प्रत्येकमपि योगः स्वस्वरीत्या मानवानाम् आध्यात्मिकोन्नत्यै सहायको भवतीति । परन्तु यस्तावत् क्षुत्तृष्णाभ्यां पीडितः कथं तस्मै आध्यात्मिकविषयो रोचते । अतः परोपकारः स्वामिविवेकानन्देन योगस्य अङ्गत्वेन स्वीकृतः । कर्मयोगिनो न केवलं स्वस्याध्यात्मिकोन्नत्यै प्रयत्नं कुर्युः, किन्तु अन्येऽपि यथा स्वस्वाध्यात्मिकविकाशाय प्रयतन्तां तदर्थमनुकूलस्थितिरपि तैः विधातव्या । परस्परस्य हिताय एवं प्रचेष्टा—

---

१ न कर्मणाम् अनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते । गीता ३.४ ।

एतदपेक्षया एकस्य विकशितसमाजस्य किं वा वैशिष्ट्यं भवितुमर्हति । अत एव स्वामिपादेन विवेकानन्देनोक्तं यत्—

No civilisation can grow unless fanaticism, bloodshed, and brutality stop. No civilisation can begin to lift up its head until we look charitably upon one another ;... (CWSV 3, p.202).

अतः सर्वभूते दया कर्तव्या । कर्मयोगिभिः अवश्यं दयाशीलत्वेन भाव्यमिति । स्वामिविवेकानन्देनोक्तं यत् दया स्वर्गीयेति । अतः स्वोन्नत्यै प्रत्येकं दयालुना भवितव्यम् । न्यायविचारस्य अधिकारबोधस्य च भित्तिः दया एव । (विवेकानन्द, १३८३, पृ.३६) ।

ननु किमर्थं वा मनुष्याणां दुःखं येन दयादिकं कार्यं भवति? दुःखस्य मूलं तावदासक्तिरिति यस्या मूलं पुनः अहंकारः ममकारश्च । तदुक्तं विवेकानन्दस्वामिपादेन—

यदैवाहं स्वं क्षुद्रशरीरत्वेन चिन्तयामि तदैव जगति अन्येषां शरीराणां सुखदुःखादिकमनादृत्य स्वदेहस्य रक्षणं तस्य सौन्दर्यसम्पादनं च कर्तुमिच्छामि । अहं त्वं च तदा भिन्नौ भवावः । यदैव एवं भेदज्ञानं दृश्यते तदैव तद् सर्वविधामङ्गलस्य द्वारमुद्घाटयति सर्वविधदुःखं सृजति च (विवेकानन्द, १९६३, पृ.३२) ।

'Self-oriented actions give birth to strife, expectations, desires, possessiveness, attachments and jealousies' (Morris, 2018).

अतः स्वामिविवेकानन्देनोक्तं यत् निःस्वार्थता नाम "अहमिदं क्षुद्रशरीरम्—इति भावान्मुक्तिः" इति (विवेकानन्द, १३८३, पृ.८८) ।

तस्मात् निःस्वार्थभावेन अनुष्ठितः यः कर्मरूपयोगः तस्य प्रत्येकं पद्धतिः समुदायभेदभावपोषकस्य सर्वविधाकल्याणजनकस्य च अस्य क्षुद्राहंभावस्य विनाशने एव रता । अतः कर्मयोगानुशीलनेन क्षुद्राहंभावस्य विनाशात् तद्धेतुकसर्वविधभेदस्य च अपगमे सङ्ग्रामादीनाम् अननुवर्तनात् समाजे शान्तिरवश्यं पुनरानेतुं शक्येति अग्रिमविभागे आलोचयिष्यते ।

## २. कर्मयोगानुशीलनेन समाजे शान्तिस्थापनाय प्रयासः

संग्रामस्य कारणत्वेन उच्यते—

War begins with in the human mind that is filled with

hatred. Hatred arises from narrow bigotry— from the feeling that 'I alone am right; others are all wrong'. Narrowness arises from lack of expansion of the mind and heart beyond one's own self. (Swami Atmapriyananda, 2018, p.49).

Fundamentally I think there are three main causes of war. Firstly I think that war is brought about by pride, the pride either of those who feel they are minor power and want to increase their importance, or of those who already consider themselves powerful, but who wish to extend their power.

The second cause of war is fear. Fear is always a bad counsellor. Fear sets little dogs barking and snapping and makes them the most dangerous. Fear has been the cause of many a war....

The third cause is want. I think it takes third place because poverty sometimes weighs down so heavily on men that they lose all hope and with it the spirit of revolt (Berger, 1959, p.25).

दर्पः, भयं, तृष्णा—एते संग्रामहेतव एकेनैव कर्मयोगरूपासिना छेत्तुं शक्यन्ते यतो हि तेषां मूलं क्षुद्राहंकार एव । क्षुद्राहंकारो नाम 'अहं मम च' इति भावः । कर्मयोगस्तावत् एतादृशसङ्कीर्णभावस्य पारम् अस्मान्नयति । अत विवेकानन्दस्वामिपादेन प्रोक्तं यत् 'उच्चतम आदर्शस्तावत् — अनादिकालं यावत् पूर्णरूपेण आत्मत्यागः, यत्र "अहं" नास्ति, सर्वं "त्वम्" । ज्ञानेन अज्ञानेन वा कर्मयोगः जनान् तल्लक्ष्यं प्रति नयति' (विवेकानन्द, १३८३, पृ.६४) ।

अद्यतनविश्वशान्तिसंस्थानसु UNESCO इति आन्यतम्यं भजते । अस्य प्रस्तावनायामिदं स्वीकृतं यत् सङ्ग्रामः मानवमनसि एव प्रारभते–

The Preamble to the Constitution of UNESCO declares that "since wars begin in the minds of men, it is in the minds of men that the defences of peace must be constructed." In 1945, UNESCO was created in order to respond to the firm belief of nations, forged by two world wars in less than a generation that political and economic agreements are not

enough to build a lasting peace. Peace must be established on the basis of humanity's moral and intellectual solidarity.

The growth of global challenges such as inequality, exclusion, violence and sectarianism has resulted in a foreseeable social intolerance that drives humanity apart. The role of UNESCO to accomplish every day its fundamental humanist mission to support people in understanding each other and working together to build lasting peace has become a centre point in making a safer world for diversity and future generations. Be it through education, the sciences, culture, communication and information, peace is promoted in all of the Organization's fields of work. (UNESCO, no date)

शान्तये एते शिक्षाया गुरुत्वं वदन्ति । ननु का नाम शिक्षेति चेदुक्तं स्वामिविवेकानन्देन— 'Education is the manifestation of the perfection already in man' (CWSV 4, p.349) इति । अस्यार्थः- ज्ञानं न बाह्यं किञ्चित्, किन्तु आन्तरमेव । तदज्ञानेन आवृतम् इति न स्फुटति । तेन ज्ञानार्जनं नाम न नूतनं किमपि किन्तु स्थितस्यैव ज्ञानस्य अनावरणीकरणम् । प्रत्येकमपि शारीरं मानसं वा कर्म तदनावरणीकरणायैव रतम् । तदुक्तं स्वामिविवेकानन्देन—

All these blows taken together are called Karma—work, action. Every mental and physical blow that is given to the soul, by which, as it were, fire is struck from it, and by which its own power and knowledge are discovered, is Karma... (CWSV 1, p.31).

अतः ज्ञानस्य विकाशे कर्मयोगस्य महद्गुरुत्वमस्ति । UNESCO-इत्येतेषां मते युद्धं मानवमनसि एव आरभते यद्यपि स्वामिपादेन विवेकानन्देन बहुपूर्वमेव तत्प्रोक्तमासीत् । उक्तं तेन यत् जगति अस्माभिः यानि कार्याणि दृश्यन्ते तानि सर्वाण्येव मानवचिन्तायाः बहिःप्रकाशरूपाणि । यन्त्रम्, पोतः नगरं, युद्धपोतः—सर्वं मानवेच्छाया बहिःप्रकाशमात्रम् । इच्छा चरित्रोद्भवा । चरित्रं पुनः कर्मोद्भवम् । इच्छायाः बहिःप्रकाशः कर्मानुरूपी । प्रवलेच्छाशक्तिशालिनः ये पृथिव्याम् आसन् ते सर्वे महत्कर्मिणः आसन् । ते स्वेच्छाशक्तिप्रभावात् जगदेव परिवर्तयितुं शक्नुवन्ति । युगानि अभिव्याप्य

निरवच्छिन्नतया कर्मानुष्ठानेन ते तादृशशक्तिं समर्जयन् (विवेकानन्द, १३८३, पृ.४) ।

अतः कर्मनियन्त्रणेन तत्परिशीलनेन वा चरित्रसंस्कारः, तेन च मानवचित्तपरिशोधनबलात् समाजे शान्तिः स्थापयितुं शक्येति ज्ञायते । इतः अस्माभिः स्पष्टं ज्ञायते यत् अन्तर्जगतः परिवर्तनमेव कर्मयोगस्य लक्ष्यं न बहिर्जगतः । अतः स्वामिभजनानन्देन (2006, p.9) "Selfless Work" –नामके स्वग्रन्थे निगदितं यत् 'The aim of Karmayoga is not to change the world but to change oneself'. परन्तु इदमपि ज्ञातव्यं यत् अन्तर्जगतः परिवर्तनेन बहिर्जगत् स्वयमेव परिवर्तते इति ।

कर्मयोगस्य सोपानत्रयं वर्तते— १. 'फलसङ्कल्पत्यागः' २. 'कर्मसङ्कल्पत्यागः' ३. 'कर्तृत्वसङ्कल्पत्यागश्च' (भजनानन्द, २०११, पृ.८) ।

एतत्त्रिविधत्यागपूर्वकं कर्मसम्पादनेन जनः महच्चरित्रस्य अधिकारी भवितुमर्हति । महच्चरित्रं सर्वदैव महच्चिन्ताया जनकम् । महच्चिन्ता च न कदापि विनाशहेतुरूपसङ्घर्षातङ्कवादादीनां जननी भवति । उक्तत्रिविधत्यागेसहितं कर्म अस्माभिः सम्पादयितुं न शक्यते इति मानवजीवने तथा समाजे दुःखबाहुल्यम् ।

दुःखनिवारकरूपेण पूर्वोक्तत्रिविधत्यागाय विवेकानन्दस्वामिपादेन यः पन्था उपदिष्टो वर्तते तदनुसरणेन जनः स्वक्षुद्राहंभावम् अतिक्रम्य क्रमशः महाचरित्रवान् सन् शान्तिपूर्णसमाजस्य निर्माणे अग्रणी भवितुमर्हति । अस्माज्ज्ञायते यत् कथम् अन्तर्जगतः परिवर्तनेन बहिर्जगतः परिवर्तनं सञ्जायते इति । सङ्ग्रामारम्भः यथा मानवमनसि तथैव तदन्तोऽपि तत्रैव । निःस्वार्थतया कर्मसम्पादनविधिना उच्चचरित्रनिर्माणपूर्वकं कर्मयोगः तन्मानवमन एव नियन्त्रयति । किन्तु त्रिविधोऽयं त्यागो न सुकरः । पूर्वजन्मनः संस्काराः त्यागमार्गे कण्टकवदवतिष्ठन्ते । अतः स्वामिपादेन विवेकानन्देन प्रोक्तं यदादौ पूर्वपूर्वजन्मनः अशुभसंस्कारा वर्तमानशुभसंस्कारैः नाशयितव्या इति (विवेकानन्द, १३८३, पृ.३२) । शुभसंस्कारस्य च निर्माणं पुनः शुभचिन्तनेन शुभकर्मसम्पादनेन च जायते । तदुक्तं विवेकानन्दस्वामिपादेन—

...if a man thinks good thoughts and does good works, the sum total of these impressions will be good ; and they, in a similar manner, will force him to do good even in spite of himself (CWSV 1, pp.54-55).

संस्कारमात्रमेव बन्धनकारणम्, अतः स्वामिपादेन उभयविधोऽपि संस्कारः कण्टकरूपेण अभिहितः । शुभोऽशुभश्चेत्युभयविधसंस्कारः वस्तुतः शृङ्खलारूपः— एकः काञ्चननिर्मितः अपरः अयोनिर्मितः (विवेकानन्द, १३८३, पृ.३२) इत्येतावद् भेदोऽस्ति द्वयोः । अतः तेनोक्तम्— '...the good tendencies have also to be conquered. Thus the "attached" becomes the "unattached"' (CWSV 1, p.56) इति । अस्यार्थः उभयविधोऽपि संस्कारः जेतव्य इति । एवमासक्तमनः क्रमेण अनासक्ततामेति ।

प्रसङ्गेऽस्मिन् स्वामिविवेकानन्देन रचितस्यैकस्य काव्यस्य (The Song of the Sannyāsin) काश्चन पङ्क्तयोऽस्माकं स्मृतिपथमायान्ति—

Love, hate—good, bad—and all the dual throng,
Know, slave is slave, caressed or whipped, not free ;
For fetters, though of gold, are not less strong to bind ;
Then off with them... (CWSV 4, p.389).

अतः कर्मयोगिना द्वन्द्वातीतेन भाव्यम् । कर्म तु तेन अवश्यम् अनुष्ठातव्यं, किन्तु तत्र लिप्तं न भवेत् । चरित्रं तस्य एतावत् सुदृढं भवेद्यत् बाह्यवस्तूनि तन्मनः विचलयितुमशक्तानि भवेयुरिति ।

क्षुद्राहंभावः कदापि महच्चरित्रस्य चिन्ताया वा जनको न भवति । तस्माद् महच्चरित्रकामेन सत्यागं कर्म सम्पादनीयमिति उक्तपूर्वम् एव । अनासक्तिरेव पूर्णतया आत्मत्याग इति स्वामिविवेकानन्देन निगदितमस्ति । आसक्तिराहित्येन कर्मसम्पादनाय या रीतयः विवेकानन्दस्वामिभिः प्रोक्ताः ता अस्माभिः निम्नोक्तेषु त्रिषु विभागेषु विभाजयितुं शक्यन्ते—

## २.१. जगदिदं नास्माकं स्थायिरूपेण वासस्थलम् ('This world is not our habitation')

जगति इदमस्माकमनुभवसिद्धं यत् यत्रास्माकं स्वत्वं वर्तते तत्रैवास्माकम् अधिकतया आसक्तिरिति । यत्रायम् अहंभावः स्वल्पः तत्र आसक्तिरपि स्वल्पेति तज्जनितदुःखमपि स्वल्पम् । अतः यदि वयं जगत्यस्मिन् स्वत्वं नारोपयामः, क्षुद्राहंभावरूपपाशेन च स्वात्मानं न बध्नीमः तर्हि अवश्यं जगति भूम्यर्थादियत्किञ्चित्पदार्थाद् अस्मदासक्तिः दूरीभवति । तेन तत्तत्त्यागः सरलो भवति । अतः स्वामिपादेन विवेकानन्देनेदमुपदिष्टं यद् एतद्धिया अस्माभिः कर्म कर्तव्यं यद्वयम् अत्र आगन्तुका इति । न जगदस्माकं ध्रुवं वासगृहम्—

Work as if you were a stranger in this land, a sojourner ;

work incessantly, but do not bind yourselves; bondage is terrible. This world is not our habitation, it is only one of the many stages through which we are passing (CWSV 1, pp.56-57).

ईशोपनिषद् (मन्त्रसंख्या १) अस्मान् तदेव शिक्षयति यत् त्यागपूर्वकः भोगः कर्तव्य इति— 'तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम्' इति । एतादृशचिन्तनेन भोग्यवस्तूनि प्रति जनानाम् आकाङ्क्षा नियन्त्रयितुं शक्या या आकाङ्क्षा प्रथमविश्वयुद्धवत् विध्वसिसङ्ग्रामस्य अन्यतमबीजम्—

...The increasing competition and desire for greater empires led to an increase in confrontation that helped push the world into WW I. (McCormick, no date)

अतो यदि वयम् ऐहिकजगतः क्षणिकस्वभावम् वेत्स्यामः तर्हि अवश्यं सङ्ग्रामादिकम् अस्या भूमेः चिरतरेण विदायम् एष्यति । न अर्थः, नापि भूमिः अस्माकम्, अतः तदवाप्तये द्वन्द्वो वृथा ।

## २.२. कर्मणि उपासनादृष्टिः (Looking upon work as "worship")

विवेकानन्दस्वामिभिरुक्तम्—

इतोऽपि एकः पन्थाः वर्तते येन इयं दया निःस्वार्थता च कार्यत्वेन परिणमयितुं शक्यते । यदि वयं सगुणेश्वरे विश्वसिमः तर्हि कर्म भगवदुपासना इति चिन्तनीयम् । अत्र वयम् अस्माकं कर्मफलसमूहः भगवते समर्पयामः । तमीश्वरं वयमुपास्महे इति कर्मफलरूपेण मानवजातेः किमपि प्रत्याशायै नास्ति अस्माकमधिकारः (विवेकानन्द, १३८३, पृ.३६) ।

अतः कर्मोपासनं नाम कर्मफलसमुदायस्य भगवते समर्पणमिति । समर्पितवस्तुनि स्वत्त्वं न तिष्ठति । अतः कर्मफलं प्रति अनासक्तित्वात् आसक्तिराहित्येन कर्मसम्पादनं सुकरं भवति । तदुक्तं भगवता गीतायाम्–

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥ [गीता ९.२७] इति ।

अतः कर्मफलं सम्यग् भवतु वा न वा तद् मानवमनः प्रभवितुं न शक्नोति । तेन ईर्ष्यादिकं मानवमनसि स्थानं न प्राप्नोति । यतो हि व्यष्टिरूपेण मानवः समष्टिरूपेण च राष्ट्रं व्यक्त्यन्तरस्य राष्ट्रान्तरस्य वा उन्नतौ ईर्ष्यान्वितं भवति । एकस्मिन्नेव क्षेत्रे अन्यस्य पदोन्नतिः, प्रसिद्धिस्तथा स्वस्य वैफल्यम् आशानुरूपफलस्याप्राप्तिर्वा मानवमनसि असन्तोषं जनयति ।

असन्तोषः प्रतिहिंसायाः जनकरूपः या पुनः सङ्ग्रामादीनामारम्भनाय अलम् । तदुक्तं स्वामिपादेन विवेकानन्देन यत् 'कर्मणः फलाकाङ्क्षा एवास्माकम् आध्यात्मिकविकाशे प्रतिबन्धिका ; न केवलमेतत्, परिणामे सा दुःखस्य कारणं भवति' (विवेकानन्द, १३८३, पृ.३६) इति । परन्तु यदि अद्य समाजस्य प्रत्येकं जनः स्वकर्मणां फलं स्वेष्टदेवतां समर्प्य कर्म उपासनात्वेन परिणमयितुं समर्थो भवति तर्हि कर्मफलम् ईश्वरस्वरूपमिति अस्मन्मनसि असन्तोषादिर्नोत्पद्यते एव । एवम् ईश्वरे कर्मफलसमर्पणात् तत्फलाकाङ्क्षा नश्यति येन मानवमनसः स्वेतरकर्मफलजनिता सन्तुष्टिः अपगच्छतीति व्यक्तिः स्वस्वकर्मण्येव अवधानेन लग्ना भवितुमर्हति । एवम् कर्मफलाकाङ्क्षात्यागात् व्यष्टिसुखं, व्यष्टिसुखाच्च समष्टिसुखमिति उभयोरपि उन्नतिः युगपत्सिद्ध्यति । कर्मणः उपासनात्वेन परिणामे पुनः कर्मणः तथाकथितोच्चनिम्नविभागोऽपि मानवमनसः दूरीभवति सर्वविधस्यैव कर्मणः ईश्वरपूजारूपत्वात् । तेन स्वस्य अन्यस्य वा कर्तव्यकर्मणि घृणा नोत्पद्यते । फलरूपेण च समाजे कर्मजनितोत्पीडनम् समाप्तिम् एष्यति । तदुक्तं स्वामिपादेन विवेकानन्देन—

Competition rouses envy, and it kills the kindliness of the heart. To the grumbler all duties are distasteful ; nothing will ever satisfy him, and his whole life is doomed to prove a failure. Let us work on, doing as we go whatever happens to be our duty, and being ever ready to put our shoulders to the wheel. Then surely shall we see the Light ! (CWSV 1, p.71)

### २.३. कर्मणे एव कर्म करणीयम् ('Work for work's sake')

ये तावत् ईश्वरं न अनुमन्यन्ते ते इमां तृतीयां पद्धतिमनुसर्तुं शक्नुवन्ति । विवेकानन्दस्वामिभिरुक्तं यत्–

कर्मणे एव कर्म कर्तव्यम् । सर्वेषु देशेषु केचन मनुष्याः सन्ति, येषां प्रभावः जगति अवश्यं कल्याणकरः ; ते कर्मण्येव कर्म सम्पादयन्ति, ख्यात्यै यशसे वा न रमन्ते, न ते स्वर्गाभिलाषिनोऽपि । लोकानां प्रकृतोपकारः भवेदिति धिया कर्म कुर्वन्ति (विवेकानन्द, १३८३, पृ.६) ।

भगवद्गीतायां (२.४७) भगवतोक्तं अर्जुनाय यत् 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इति । विवेकानन्देन निगदितं यत्–

Karma-Yoga teaches us how to work for work's sake, unattached, without caring who is helped, and what for. The

Karma-Yogi works because it is his nature, because he *feels* that it is good for him to do so, and he has no object beyond that. His position in this world is that of a giver, and he never cares to receive anything. He knows that he is giving, and does not ask for anything in return and, therefore, he eludes the grasp of misery. The grasp of pain, whenever it comes, is the result of the reaction of "attachment" [emphasis in the original] (CWSV 2, p.383).

'The essence of Karma yoga is that an individual is duty oriented, indifferent to rewards and imbued with equanimity' (Pal, 2020, p.62).

एवं च यदि वयं प्रत्येकं निष्कामकर्मणः महतादर्शेन दीक्षिता भविष्यामः तर्हि मानवसभ्यतावश्यं वर्धिष्यते, समाजे शान्तिस्थापनस्य प्रयासश्च सफलो भविष्यति । अतः स्वामिना विवेकानन्देनोक्तं यद् यः अर्थयशसाद्यभिसन्धिम् अननुसन्धाय कार्यं करोति स सर्वापेक्षया सम्यक् कार्यं करोति । यदा कश्चन मनुष्यः एवमभिसन्धिविहीनः सन् कर्मसम्पादने समर्थो भविष्यति तदा सोऽपि बुद्धो भविष्यति । तस्य अन्तःकरणाद् ईदृशी कर्मशक्तिः विनिर्गता भविष्यति या जगत्परिवर्तनाय अलम् । एतादृशो जन एव कर्मयोगस्य अत्युत्कृष्टनिदर्शनम् इति (विवेकानन्द, १३८३, पृ.९७) ।

द्वन्द्वादिकं तदैव मानवमनः ग्रसति यदा ततः आध्यात्मिकभावना अपसरति । तदुक्तं विवेकानन्दस्वामिपादेन— 'When purity, when spirituality goes, leaving the soul dry, quarrels begin, and not before' (CWSV 6, p.137). क्षुद्राहंकारत्यागपूर्वकाध्यात्मिकभावस्मरणे अस्माकं सहायको भवत्ययं कर्मयोगः । आध्यात्मिकसंस्कारोऽयं स्वामिनः विवेकानन्दस्य वचसि 'radical reform' (CWSV 3, p.231) इत्युच्यते यस्तावद् आमूलं संस्करोति । तेनोक्तं यत्—

All healthy social changes are the manifestations of the spiritual forces within, and if these strong and well adjusted, society will arrange itself accordingly. Each individual has to work out his own salvation ; there is no other way, and so also with nations. (CWSV 5, p.417).

Meddle not with so called social reform, for there cannot

be any reform without spiritual reform first (CWSV 5, p.72).

पालमहोदयेन (2020, p.64) अपि आलोचितं यन्मनुष्येषु आत्मीयतावर्धनाय मानवसभ्यतायाश्च विकाशाय गीतोक्तनिष्कामकर्मयोगः अस्मज्जीवने परिपालनीय इति ।

**३. उपसंहारः**

प्राणिषु मानवः श्रेष्ठः । मानवजीवनस्य लक्ष्यं तावत् परमात्म-साक्षात्काररूपो मोक्षः । अत एव धर्मार्थकाममोक्षेषु मोक्ष एव परमपुरुषार्थत्वेन गणितः । तेन अस्मिन्नेव जन्मनि परमात्मसाक्षात्कारः कर्तव्य इति । तदुक्तं केनोपनिषदि (२.५)–

इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टिः ।

व्यवहारिकजीवने कर्म करणीयमेव । पुनः सत्यसाक्षात्कारः मानव-जीवनस्य लक्ष्यम् अस्ति । एतयोः द्वयोः युगपन्निष्पत्तिः कर्मयोगानुष्ठानेन सञ्जायते । कर्मयोगानुष्ठानेन क्षुद्राहंभावस्य अपगमनात् मनुष्यः यावत् तत्परमसत्यस्य समीपतरो भवति तावत् प्रशान्तिं लभते । व्यष्टिप्रशान्त्या च समष्टिप्रशान्तिः । इदमेव कर्मयोगस्य उद्देश्यं, चरमप्राप्तिः । अत्रैव कर्मयोगस्य पूर्तिः—

If we are genuine Karma-Yogis and wish to train ourselves to that attainment of this state, wherever we may begin we are sure to end in perfect self-abnegation ; and as soon as this seeming self has gone, the whole world, which at first appears to us to be filled with evil, will appear to be heaven itself and full of blessedness. Its very atmosphere will be blessed ; every human face there will be god. Such is the end and aim of Karma-Yoga, and such is its perfection in practical life (CWSV 1, p.92).

* * *

## Bibliography

### Books and Other Sources Consulted in English

1. Atmapriyananda, S. (2018) 'SwamiVivekananda As The Apostle Of World Peace', in Saha, R. C. (ed.) *Vivek.* London : Vivekananda

Human Centre, pp.48-51. Available at :
https ://www.vivekanandacentre.com/pdf/brochure/brochure-2018.pdf (Accessed : 5 December 2023).

2. Berger, G.(1959) 'THE CAUSES OF WAR : FEAR, PRIDE, POVERTY', in Koffler, S. (Editor-in-Chief) *The UNESCO Courier.* The United Nations Educational, Scientific and Cultural Organization, p.25. Available at :
https ://unesdoc.unesco.org/ark :/48223/pf0000064924 (Accessed : 5 December 2023).
3. Bhajanananda, S. (2006) *Selfless Work : Its Basis, Methods and Fulfilment*. 2nd rev. edn. Howrah : Ramakrishna Mission Vivekananda University (RKMVU).
4. McCormick, J. (no date) 'World War I Resources : Causes of World War I', *Indiana Department of Education*. Available at :
https ://www.in.gov/doe/files/guide.pdf (Accessed : 9 December 2023).
5. Morris, P. (2018) 'Health advice : Karma yoga for a more peaceful society', *Together Online,* (August). Available at :
https ://togethermag.eu/health-advice-karma-yoga-for-a-more-peaceful-society/ (Accessed : 5 December 2023).
6. Pal, S. (2020) 'KARMA YOGA : NECESSITY FOR UPLIFTMENT OF SOCIETY', *Science, Technology and Development Journal*, 9(8), pp.60-64. doi :
**20.18001.STD.2020.V9I8.20.34244**
7. 'Society' (2023) *Wikipedia*. Available at :
https ://en.wikipedia.org/wiki/Society (Accessed : 2 December 2023).
8. UNESCO (no date) *UNESCO : Building peace in the minds of men and women*. Available at :
https ://en.unesco.org/70years/building_peace (Accessed : 5 December 2023).

## Books Consulted in Bengali

9. *Karmayoga* (saptaviṃśa saṃskaraṇa) ; Svāmī Vivekānanda ; Udbodhan karyalaya ; Kolkata ; 1383

10. *Jñānayoga* (aṣṭādaśa saṃskaraṇa) ; Svāmī Vivekānanda ; Udbodhan karyalaya ; Kolkata ; 1963

11. *Niḥsvārtha karma : bhitti, paddhati o siddhi* (dvitīya saṃskaraṇa) ; Svāmī Bhajanānanda ; Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI) ; Belur Math ; 2011

## Book Consulted in Sanskrit

12. *अमरकोशः 'अभिनवराजलक्ष्मी' भाषाटीकाद्वयविराजितः* ; प्रो. बालशास्त्री (सम्पा.) ; चौखम्बा सुरभारती प्रकाशन ; वाराणसी ; २०२०

13. Sankar (2011) *Monk as Man : The Unknown Life of Swami Vivekananda*. New Delhi : Penguin Books. Available at : https ://dn720001.ca.archive.org/0/items/the-monk-as-man-unknown-life-of-swami-vivekananda-mani-sankar/The%20Monk%20As%20Man%20-%20Unknown%20Life%20of%20Swami%20Vivekananda%20-%20Mani%20Sankar.pdf (Accessed : 6 May 2024).

14. In text citation : (Sankar, 2011, p.2)

✳ ✳ ✳

## Abbreviations

CWSV 1 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.1 : 'Karma in Its Effect on Character', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 1 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.1 : 'The Secret of Work', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 1 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.1 : 'What is Duty ?', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 1 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.1 : 'Non-Attachment is Complete Self-Abnegation', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 2 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.2 : 'The Necessity of Religion', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 2 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.2 : 'The Ideal of a Universal Religion', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 3 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.3 : 'The Mission of the Vedānta', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 3 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.3 : 'My Plan of the Campaign', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 4 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.4 : 'Reincarnation', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 4 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.4 : 'What we Believe In', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 4 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.4 : 'The Song of the Sannyāsin', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 5 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.5 : 'Epistles', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 5 : Vivekananda, Swami 2018. *The Complete Works of Swami*

*Vivekananda*, vol.5 : 'Sayings and Utterances', 3rd edn. Mayavati : Advaita Ashrama.

CWSV 6 : Vivekananda, Swami 2018. *The Complete Works of Swami Vivekananda*, vol.4 : 'The Song of the Sannyāsin', 3rd edn. Mayavati : Advaita Ashrama.

# कुवलयानन्ददिशा उपमालङ्कारनिरूपणम्

अमित-कुमार-गराइः *


## Abstract

['शब्दार्थौ सहितौ काव्यम्', 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोः शब्दार्थयोर्वर्तते' इत्यादौ सर्वत्र काव्यलक्षणे भामहवामनप्रभृतिभिः भूतपूर्वालङ्कारिकैः गुणालङ्कारसहित्वम् शब्दर्थयोः स्वीकृतमस्ति । अतः गुणस्य अलङ्कारस्य च प्राधान्यम् काव्यादिषु प्रथितमेव । अतः सम्प्रदायेषु अलङ्कारसम्प्रदायः इति पृथक् सम्प्रदाय एव वर्तते । अथ कोऽयमलङ्कारः- अलं शब्दः सौन्दर्यवचनः । सौन्दर्यं च चमत्कारोपायभूतः शब्दार्थयोर्धर्मः । अलङ्क्रियते अनेन इत्यलङ्कारः, कः अलङ्क्रियते? काव्यम् वाक्यार्थः, तद्वारा काव्यात्मा रसश्च । काव्यादर्शे तु – काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते । काव्यं ग्राह्यमलङ्कारात् इति वामनः । अलङ्काराः हारादिवद् भवन्ति । यथा शरीरस्य एकदेशे स्थिताः अलङ्काराः सम्पूर्णशरीरस्य शोभां वर्धयन्ति । तथा अलङ्काराः वाक्यैकदेशे स्थिताः अपि उपमादयः सम्पूर्णं वाक्यार्थमलङ्कुर्वन्ति । अलङ्कृते च वाक्यार्थे रसः समुज्ज्वलो भवति । शब्दार्थालङ्कारभेदेन अलङ्कारः द्विविधः । शब्दगताः अनुप्रासादयः, अर्थगताश्च उपमादयः । अत्र तावत् साद्दश्यमूलकेषु अन्यतमः उपमालङ्कार प्रपञ्चते ।]


### ०. उपक्रमः

उपपूर्वकात् माङ् माने शब्दे च इति धातोः भावे अङि प्रत्यये निष्पन्नः उपमाशब्दः साद्दश्यमिति तदर्थः । साद्दश्यमूलकाः अनन्वयोपमेयोपमाप्रतीपादयः नैके अलङ्कारास्तेषु सर्वत्रैव उपमालङ्कारस्य सञ्चारः वर्तते एव । अतः साद्दश्यमूलकेषु अस्य उपमालङ्कारस्य प्राणभूत्वात् तमेवालङ्कारं स्पष्टयितुमाचष्टे । सर्वत्र काव्यशास्त्र-प्रतिपादकग्रन्थेषु मम्मटादिभिरालङ्कारिकैः उपमा वर्णिता । तथापि अप्पय्यदीक्षितकृतालङ्कार-प्रधानप्रतिपादककुवलयानन्ददिशा उपमालङ्कारः स्पष्टीक्रियतेऽत्र । तथाहि उपमालङ्कारस्य लक्षणम्—

'उपमा यत्र साद्दश्यलक्ष्मीरुल्लसति द्वयोः' इति ।

यत्र द्वयोः उपममानोपमेययोः साद्दश्यलक्ष्मीः साद्दश्यातिशयः उल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्र उपमालङ्कारः इति

* शोधच्छात्रः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थाने

तदर्थः । तत्त्वचतुष्टयात्मक उपमालङ्कार इति सर्वेषां ज्ञानगोचरः । तानि हि उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकाः इवादिशब्दाः चेति । उपमालङ्कारः पूर्णोपमालुप्तोपमाभेदेन द्वेधा । यत्र उपमानोपमेयसाधारणधर्मोपमानवाचकानि सर्वाण्यपि पदानि एकत्र तिष्ठन्ति तत्र पूर्णोपमा । पूर्णोपमायाः उदाहरणं यथा तत्रैव ग्रन्थकारः—

'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते' इति ।

अत्र प्रकृते उदाहरणे उपमानं भवति हंसी, उपमेयं कीर्तिः, साधारणधर्मः स्वर्गङ्गावगाहनत्वम्, उपमावाचकशब्दः इवशब्दः । अतः अत्र हंसी, कीर्तिः, स्वर्गङ्गावगाहनत्वमिवशब्दश्चेत्येतेषाम् उपमानोपमेय-साधारणधर्मोपमानवाचकानां सर्वेषामप्युपादानात् पूर्णोपमा । किञ्च तत्र एक एव साधारणधर्मो भवेदिति नियमो नास्ति । नैके साधारणधर्माणाम् अवस्थानं सम्भवति । यथा तत्रैव ग्रन्थकारः—

गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

अत्र उपमानम् ईश्वरः, उपमेयं बुधः । उपमाने ईश्वरे शशिगरलयोः धारणं, तयोर्मध्ये पूर्वस्य शशिनः शिरसा श्लाघनं तस्यार्थः शिरसा वहनम्, किञ्च उत्तरस्य गरलस्य कण्ठे नियमनं तस्यार्थः कण्ठे संस्थापनम् । तद्वत् उपमेये बुधे गुणदोषयोः ग्रहणम् अत्र ग्रहणमित्यस्य ज्ञानमित्यर्थः । तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनम् अस्यार्थः शिरःकम्पनेन अभिवादनम्, उत्तरस्य दोषस्य कण्ठे नियमनम् अस्यार्थः दोषं ज्ञात्वाऽपि कण्ठादुपरि वाचा अनुद्घाटनम् । श्लाघनत्वं नियमनत्वं च साधारणधर्मौ । अत्र गृह्णन्नित्येकशब्दोपादानात् बिम्बप्रतिबिम्बभावेन[१] अभेदज्ञानं स्वीकृतमस्ति ।

## १. लुप्तोपमा

यत्र च एतेषु एकस्य द्वयोस्त्रयाणां वा प्रतिपादकशब्दानाम् अभावः तत्र लुप्तोपमा । लुप्तोपमायाः अष्टौ प्रकाराः ग्रन्थकारेण कृताः वर्तन्ते । ते च भेदाः–

क. वाचकलुप्ता
ख.धर्मलुप्ता
ग.धर्मवाचकलुप्ता

[१] भिन्नयोरप्युपमानोपमेययोः सादृश्यवशादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकसमयः । अप्पयदीक्षितः, कुवलयानन्दः. सम्पा.जयशङ्करलाल त्रिपाठी, पृ.२४ ।

घ. वाचकोपेमेयलुप्ता
ङ. उपमानलुप्ता
च. वाचकोपमानलुप्ता
छ. धर्मोपमानलुप्ता
ज. धर्मोपमानवाचकलुप्ता

लुप्तोपमाभेदानामुदाहरणानि अधः आलोच्यते। तत्र वाचकादयः चत्वारः भेदाः तडिद्गौरीत्यादिश्लोकेन प्रदर्शिताः । तच्छ्लोको हि—

तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥ इति ।

**क. वाचकलुप्ता**—

यत्र उपमायां उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु सादृश्यवाचकपदस्य एव लोपः भवति तत्र वाचकलुप्तोपमा । उदाहरणम्- तडिद्गौरी इति । तडिद् इव गौरी इति विग्रहे 'उपमानानि सामान्यवचनैः'[२] [अष्टाध्यायी २.१.५५] इति सूत्रेण समासः । समासे कृते सादृश्यवाचक-इवशब्दस्यात्र लोपः जातः अतः अत्र वाचकलुप्तोपमा । तडिद्गौरीत्यत्र उपमानं भवति तडित्, उपमेयं तन्वी, साधारणधर्मश्च गौरत्वम् ।

**ख. धर्मलुप्ता**—

यत्र उपमायां उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु साधारणधर्मस्य लोपः भवति तत्र धर्मलुप्तोपमा । उदाहरणम्- इन्दुतुल्यास्या इति । इन्दुना तुल्यम् आस्यं यस्याः इति विग्रहे बहुव्रीहिसमासे इन्दुतुल्यास्या इति रूपम् । अत्र कान्त्या इन्दुतुल्यास्या इत्यपि वक्तुं शक्यम् आसीत् । साधारणधर्मलोपविधायकसूत्राभावात् लोपः ऐच्छिकः । तस्मात् प्रकृते साधारणधर्मस्य लोपात् धर्मलुप्तोपमा । अत्र उपमानम् इन्दुः, उपमेयम् आस्यम्, सादृश्यवाचकः तुल्यशब्दः ।

**ग. धर्मवाचकलुप्ता**—

यत्र उपमायाम् उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु साधारणधर्मस्य पुनः सादृश्यवाचकपदस्य च लोपः भवति तत्र धर्मवाचकलुप्तोपमा । उदाहरणम्- कर्पूरन्ती दृशोर्मम इति । कर्पुरम्

[२] सादृश्यनिरूपकशब्दाऽपरपर्याया उपमानशब्दा उपमानोपमेयसाधारणधर्म-विशिष्टवाचिभि समानाधिकरणैः समस्यन्ते स तत्पुरुष इत्यर्थः । 'उपमानानि सामान्यवचनैः' [अष्टाध्यायी २.१.५५], बालमनोरमा ।

इव आचन्ती इति विग्रहे उपमानवाचकप्रातिपदिकात् आचारार्थे क्विप्प्रत्यये[३] क्विपः सर्वापहारिलोपे कर्पूर इति स्थिते 'सनाद्यन्ताः धातवः' [अष्टाध्यायी ३.१.३२] इत्यनेन धातुसंज्ञकत्वात् कर्पूर इत्यस्मात् शतृप्रत्ययेऽनुबन्धलोपे कर्पूरत् इति स्थिते 'उगितश्च' [अष्टाध्यायी ४.१.६] इत्यनेन ङीप्प्रत्ययेऽनुबन्धलोपे कर्पूरन्ती इति रूपम् । प्रक्रियायामेव क्विपा सह सादृश्यवाचक-इवशब्दस्यापि लोपः जातः । अत्रापि धर्मलोप ऐच्छिकः । नयनयोः आनन्दकरतया कर्पूरन्ती इत्यस्यापि वक्तुं शक्यत्वात् । अत्र उपमानम् कर्पूरः, उपमेयम् तन्वी ।

**घ. वाचकोपमेयलुप्ता—**

यत्र उपमायाम् उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु सादृश्यवाचकपदस्य उपमेयस्य च लोपः भवति तत्र वाचकोपमेयलुप्तोपमा । उदाहरणम् कान्त्या स्मरवधूयन्तीति । स्वात्मानं स्मरवधूमिव आचरन्तीति विग्रहे यथाक्रमं क्विप्प्रत्यये शतृप्रत्ययेऽनुबन्धलोपे प्रक्रियाकार्ये स्मरवधूयन्तीति रूपम् । अत्र उपमानम् स्मरवधूः, कान्तत्वं साधारणधर्मः । उपमेयस्य सादृश्यवाचकपदस्य च लोपात् वाचकोपमेयलुप्तोपमा । तन्वीति उपमेयं भवितुं नार्हति स्वात्मानमित्यस्य द्वितीयान्ततया निर्दिष्टत्वात् ।

वाचकादिचतुर्णां भेदानां उदाहरणप्रदानानन्तरम् उपमानलुप्तादीनां चतुर्णां भेदानां दृष्टान्तः यत्तया मेलनमित्यादिश्लोकेन प्रदर्शयन्ति—

> यत्तया मेलनमत्र लाभो मे यश्च तद्रतेः ।
> तदेतत्काकतालीयमवितर्कितसम्भवम् ॥

**ङ. वाचकोपमानलुप्ता—**

यत्र उपमायाम् उपमानोपमेयसाधारण-धर्मसादृश्यवाचकपदेष्वेतेषु उपमानस्य लोपः तत्र उपमानलुप्तोपमा । काकतालीयमित्यत्र काकतालशब्दौ स्वसमवेतक्रियावर्तिनौ । काकमिव तालमिव इति विग्रहे 'सह सुपा' [अष्टाध्यायी २.१.४] इत्यनेन समासे काकतालमिति निष्पद्यते । काकतालसमागमसदृशः इति तदर्थः । काकमिति पदं काकागमनमित्यस्य बोधकम्, तालमिति पदं तालपतनमित्यस्य बोधकम् । अत्र काकागमनम् तालपतनमित्येते उपमाने, नायकागमनमिति तन्व्याः अवस्थानमित्येतौ उपमेयौ । अत्र समासे उपमानशब्दयोः प्रयोगः नास्ति । पुनः सादृश्यवाचक-इवशब्दस्यापि प्रयोगः नास्ति । अत्र सादृश्यवाचकपदस्य उपमानस्य च

---
३ सर्वप्रातिपदिकेभ्यः क्विब्बा वक्तव्यः(वार्तिकम्) ।

लोपात् काकतालीयमित्यत्र काकतालमिति समासे वाचकोपमानलुप्तोपमा ।

काकमिव तालमिव इति विग्रहे समासविधायकसूत्रं तावत् किमपि नास्ति । तेन केनात्र समासः इत्युक्तौ सह सुपा इत्यनेन भवतु इति चेत् । न, सह सुपा इत्यनेन तथाविधसमासादर्शनात् । समासाच्च तद्विषयात् इति ज्ञापकादत्र समासः । सादृश्यवदर्थबोधकसमस्यमान-यावत्पदावयवकात्समासात् इवार्थे छप्रत्ययो भवतीति सूत्रार्थः । एवमर्थस्वीकारे सति कुत्रापि छप्रत्ययस्य विधानं न सम्भवति, सादृश्यवदर्थबोधकसमस्यमानयावत्पदावयवकात्समासाभावात् । घन इव श्याम घनश्याम इति तु सादृश्यवदर्थबोधकसमस्यमानः यावत्पदावयवकः समासः नास्ति । अतः इदं सूत्रं व्यर्थं भवति । व्यर्थीभूय ज्ञापयति यत् काकमिव तालमिव इति विग्रहेऽपि सह सुपा इत्यनेन समासो भवति । समासे सति कालतालमिति रूपं सिध्यति ।

**च. उपमानलुप्ता—**

यत्र उपमायां उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु सादृश्यवाचकपदस्य उपमानस्य च लोपः तत्र वाचकोपमानलुप्तोपमा । काकतालीयमित्यत्र समासे वाचकोपमानलोपः । काकतालम् इव इति इवार्थे 'समासाच्च तद्विषयात्' [अष्टाध्यायी ५.३.१०६] इति सूत्रेण छप्रत्यये काकतालीयमिति रूपम् । तदर्थश्च काककृततालफलोपभोगसदृश इति । प्रकृते काककृततालफलोपभोग उपमानम्, प्रियासम्भोग उपमेयम् । अत्र उपमानस्य लोपात् उपमानलुप्तोपमा । इवशब्दार्थश्च छप्रत्ययेन द्योतितो भवति । काकतालीयमिति सम्पूर्णपदस्य अर्थः भवति यथा पतनदलितं तालफलं यथा काकेन उपभुक्तं तथा रहोदर्शनक्षुभितहृदया तन्वी नायकेन उपभुक्ता ।

**छ. धर्मोपमानलुप्ता—**

यत्र उपमायाम् उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदेष्वेतेषु साधारणधर्मस्य उपमानस्य च लोपः तत्र धर्मोपमानलुप्तोपमा । यदा अवितर्कितसम्भवम् इत्यस्य स्थाने अभवत्किं ब्रवीमि ते इति पदम् दीयते तदा प्रत्ययार्थोपमायाम् उपमानस्य पुनः साधारणधर्मस्य अनुपादानात् धर्मोपमानलुप्ता ।

**ज. धर्मोपमानवाचकलुप्ता—**

यत्र उपमायाम् उपमानोपमेयसाधारणधर्मसादृश्यवाचक- पदेष्वेतेषु साधारणधर्मस्य उपमानस्य सादृश्यवाचकपदस्य च लोपः तत्र

धर्मोपमानवाचक-लुप्तोपमा । एवं च अत्रापि यदि अवितर्कितसम्भवम् इत्यस्य स्थाने अभवत्किं ब्रवीमि ते इति पदम् दीयते तदा समासार्थोपमायाम् उपमानस्य, साधारणधर्मस्य, सादृश्यवाचकपदस्य च अनुपादानात् धर्मोपमानलुप्ता ।

## २. उपसंहारः

उपमारूपकोत्प्रेक्षा-प्रतीप-दृष्टान्त-सन्देहापह्नुति-समासोक्तिनिदर्शनादयः सादृश्यमूलकाः नैके अलङ्काराः सन्ति । सादृश्यं च भेदाभेदघटितं भवति । रूपकादयः अभेदघटितालङ्काराः, दीपकादयश्च भेदघटितालङ्काराः । सत्स्वपि नैकेषु अलङ्कारप्रतिपादकेषु ग्रन्थेषु अप्पय्यदीक्षितकृतकुवलयानन्ददिशा उपमालङ्कारः यथामति निरूपितः । काव्यप्रकाशकाराः मम्मटभट्टपादाः उपमालङ्कारस्य पञ्चविंशतिभेदान् व्यदधिषत । भेदप्रियाः साहित्यदर्पणकाराः अपि उपमालङ्कारस्य सप्तदशभेदान् परिकल्पितवन्तः सन्ति । अतस्तेषां समेषाम् अवधारणं सुकुमारबुद्धीनां बुद्धिगोचरता च क्लेशायैव । अतः कुवलयानन्दस्थस्य उपमालङ्कारस्य तद्भेदानाञ्च निरूपणं अत्र मया विहितमिति शम् ।

✶ ✶ ✶

## Bibliography


1. *कुवलयानन्दः (भावबोधिन्याख्या हिन्दी-व्याख्यया च समलङ्कृतः)*; अप्पय्यदीक्षितः; आचार्य जयशङ्करलालत्रिपाठी; चौखम्बा संस्कृत सीरीज आफिस; वाराणसी; २०१६; मुद्रितम्
2. *रसगङ्गाधरः*; (*चन्द्रिका-संस्कृत-हिन्दीव्याख्योपेतः*); जगन्नाथः; पण्डित-श्रीबदरीनाथझा (व्याख्याकारः); पण्डित श्रीमदनमोहनझा (हिन्दीव्याख्याकारः); चौखम्बा विद्याभवन; वाराणसी; २०२१; मुद्रितम्
3. *साहित्यदर्पणः (सटिप्पण'लक्ष्मी'व्याख्याविभूषितः)*; विश्वनाथः; आचार्यः कृष्णमोहनशास्त्री (व्याख्याकारः); चौखम्भा संस्कृत संस्थान; वाराणसी; विं.सं. २०६८
4. *काव्यप्रकाशः (बालबोधिन्याख्यटीका)*; मम्मटभट्टः; भट्टवामनाचार्यः (व्याख्या); बालाजी इमेजिंग सिस्टम्स; दिल्ली; २०१९; मुद्रितम्
5. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिन्याख्यया च विभूषिता)*; भट्टोजिदीक्षितः; श्रीवासुदेवदीक्षितः श्रीज्ञानेन्द्रसरस्वती च (व्याख्याकारौ); मोतीलाल बनारसीदास; वाराणसी; २०१४; मुद्रितम् ।


✵ ✵ ✵

# सरस्वती नदीरूपा विद्यारूपा वा

गौराङ्ग-चौधुरी*

## Abstract

[वैदिकवाङ्मयं देवप्रधानम् । परन्तु एतेषां देवानां प्रकृतस्वरूपोद्घाटनं सत्यमेव सुदुष्करम् । वैदिकवाङ्मये एतादृशाः केचित् देवाः सन्ति येषां प्रकृतस्वरूपं किमिति विषये संशयो जायते । यथा वैदिकवाङ्मयस्य प्रारम्भादेव सरस्वतीदेव्याः प्रकृतस्वरूपोद्घाटने वेदभाष्यकारादारभ्य साधारणवेदपाठार्थिपर्यन्तं द्वैधीभावमवलोक्यते यत् सरस्वती नदीरूपा विद्यारूपा वा । सरस्वतीदेव्या एतादृशानि कानिचन वैशिष्ट्यानि अवलोक्य प्रतीयते यत् सरस्वतीनदी, पुनः वैदिकवाङ्मये एतादृशानि कानिचन वैशिष्टानि सन्ति यैः सरस्वती विद्याया अधीष्ठात्रीति प्रतीयते । इदानीन्तनकालेऽपि सरस्वती वाग्देवीरूपेण पूज्यते, पुनश्च पुरा नदीरूपेण पूज्यते । एतस्मात् कारणात् सरस्वत्याः प्रकृतस्वरूपोद्घाटनार्थं वैदिकवाङ्मयम् आधारीकृत्य शोधपत्रेऽस्मिन् यथासाध्यं प्रयासः क्रियते । यतः भाष्यकारेषु सममन्ते विचारवैभिन्नकारणात् सरस्वत्याः प्रकृतस्वरूपविषये द्वन्द्वः प्रतीयते, तस्मात् स्वल्पपरिसरकारणात् एकेन ऋग्वेदीयमन्त्रसहयोगेनैव सरस्वत्याः प्रकृतस्वरूपविषये अनुसन्धानं क्रियते । तत्र आधारो भविष्यति सायण- दयानन्दयोः ऋग्वेदभाष्यम् ।]

वेदाः सन्ति सर्वेषां ज्ञानानामाधारग्रन्थाः । एतस्मात् कारणात् संस्कृतवाङ्मये वेदानां महत्त्वं सर्वोपरि वर्तते, इत्यस्मिन् विषये नास्ति कश्चित् संशयः । वेद इत्यभिधानेन यदेकं सुविस्तृतं वाङ्मयम् अवगम्यते, तदेव वैदिकवाङ्मयम् इत्यभिधीयते । अयं ‘वेद’ इति शब्दो ज्ञानार्थकात् विद्-धातोः उत्पद्यते । ज्ञानमिदं न केवलमेव साधारणज्ञानम् अपि तु अतीन्द्रियज्ञानम् इति । प्रमुखैः आचार्यैः वेदस्यास्य बहुविधानि लक्षणानि निश्चीयन्ते । प्रसङ्गेऽस्मिन् सायणाचार्येण कृष्णयजुर्वेदस्य तैत्तिरीयभाष्यभूमिकायां परिभाषितं यत्–

“इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।” [तैत्तिरीयभाष्यभूमिका]

याज्ञवल्केनापि वेदलक्षणं क्रियते–

“प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता ॥” [याज्ञवल्क्यस्मृतिः]

---

* शोधच्छात्रः, विश्वभारती, शान्तिनिकेतनम्

अर्थात् प्रत्यक्षानुमानाभ्यां य उपायः अधिगन्तुं न शक्यते, स उपायो वेदेनैव ज्ञायते ।

मुख्यतया वैदिकसाहित्यस्यास्य मन्त्रभेदेन ब्राह्मणभेदेन च भागद्वयं वर्तते । परन्तु सौकर्याय वैदिकवाङ्मयस्यास्य विभाजनचतुष्टयं सम्पन्नं- संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् चेति ।

वैदिकमन्त्रा मुख्यतो देवस्तुत्यात्मकाः । अस्मात् ज्ञायते यत् सर्वेषु मन्त्रेषु ऋषिभिः कस्यचित् देवस्य स्तुतिः क्रियते । ऋग्वेदे अधिकेषु सूक्तेषु इन्द्रदेवः स्तूयते, तस्मात् इन्द्रदेवस्यैव प्रामुख्यं वर्तते । यद्यपि ऋग्वेदे इन्द्रदेवस्य प्रामुख्यं वर्तते, तथापि अपरे देवा अत्र नोपेक्षिताः । ऋग्वेदेऽस्मिन् सरस्वत्या अपि स्तुतिः परिलक्ष्यते । अखिले ऋग्वेदे स्वतन्त्ररूपेण सम्मिलितरूपेण च पञ्चसु सूक्तेषु सरस्वतीदेव्या वर्णनं समुपलभ्यते । ऋग्वेदीयसूक्तानां सामान्याध्ययनेनैव नदीरूपं स्वरूपं प्रकाशते । यस्य प्रमाणरूपेण बहवः मन्त्राः सन्ति । यत्र 'नदीनां सरस्वती' [ऋग्वेदः ७.९५.२], 'गिरिभ्य आसमुद्रात्' [ऋग्वेदः ७.९५.२], 'गिरीणां तविषेभिरूर्मिभिः' [ऋग्वेदः ६.६१.२], 'अह्रुतस्त्वेषश्चरिष्णुरर्णवः' [ऋग्वेदः ६.६१.८] 'ऋतावरी' [ऋग्वेदः ६.६१.९], 'पयसा' [ऋग्वेदः ६.६१.१४] इत्यादीनां शब्दानां प्रयोगेण स्पष्टतया नदीरूपमेव परिज्ञायते । न केवलं सरस्वतीसूक्ते अपि तु भिन्नसूक्तेषु नदीनां वर्णनसमये सरस्वत्या नाम आयाति–

"इमं मे गङ्गे यमुने सरस्वती शुतुद्रि स्तोमं सचसा पुरुष्णा ।
असिकन्या मरूद्वृधे वितस्तयार्जीकीये श्रृणुह्या सुषोमया ॥"

[ऋग्वेदः १०.७५.५]

न केवलमेव ऋग्वेदे यजुर्वेदादीष्वपि नदीरूपः अर्थो दरीदृश्यते ।यथा–

"पञ्चनद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशो अभवत्सरित् ॥" [यजुर्वेदः ३४.११]

संहिताकालादनन्तरं ब्राह्मणेषु, धर्मशास्त्रेषु, केषुचित् पुराणेषु च नदीविषयकः प्रमाणः परिलक्ष्यते । आधुनिकी भूवैज्ञानिकीदृष्ट्या अपि एषा सरस्वती ई.पू. द्वितीय-तृतीयशतके पूर्वहिमालयस्य मानस-सर – इति अंशतः भारतवर्षस्य उत्तर-पश्चिमप्रान्तेषु प्राभवत् । इत्यस्मिन् विषये भूवैज्ञानिकैरुच्यते यत्–

"The evidences from the archaeological remains associated with old river courses have suggested that a major river stemming from the same source as the present suttes, plowed

through northern Rajasthan, Bahawalpur, and sind to the south east of the Present course of the sutlej and indus in the third to second millennium B.C." (Allchin Goudie and Hegde, 1987)। इतोऽपि उलड्हाम्, उयाडिया, स्टेइन्, कृषन्, उइलहेल्मी इत्यादयो भूवैज्ञानिकाः पुरातत्त्वविदः च सरस्वतीनद्याः स्थानविषये विविधमतानि दत्तवन्तः । सर्वे एव स्वीकृतवन्तो यत् भूविपर्ययात् एषा नदी विलुप्ता जाता ।

अतो मनसि प्रश्नः आगच्छति यत् सरस्वत्याः वाग्देवीत्वं कुत उत्पद्यते? कथ्यते सूक्तानां भाष्याभिमुखीविशेषाध्ययनाद् अनन्तरम् अस्याः सरस्वत्याः प्रकृतस्वरूपविषये द्वन्द्वः जायते। विशेषतः सायण-दयानन्दयोर्मध्ये स्वरूपविषये पार्थक्यं परिलक्ष्यते। एकस्यैव मन्त्रस्य व्याख्यानसमये सरस्वतीदेवता सायणाचार्येण नदीरूपेण स्तुता, अपरपक्षे दयानन्देन विद्याधिष्ठातृदेवीरूपेण स्तूयते। अतः सा सरस्वती विद्यारूपा नदीरूपा वा इत्यस्मिन् विषये मनसि संशयः उत्पद्यते, यतो हि वेदे न केवलमं शरीरधारिदेवानाम् एव स्तुतिर्भवति, अपि तु विविधवस्तुषु देवत्वमारोप्य स्तुतिर्भवति । निरुक्तकारेण यथोक्तम्–

"यत्काम ऋषिर्थस्यां देवतायामर्थपत्यमिच्छन् स्तुतिंप्रयुक्ते तद्धेवतः स मन्त्रो भवति ।" [निरुक्तम् ७.१२]

अधुना प्रश्नो जायते यदि सर्वत्रैव एषा नदीरूपा व्याख्या परिलक्ष्यते, तर्हि दयानन्दस्य अस्या वाकस्वरूपा इति व्याख्यायाः प्रासङ्गिकता कुत्र वर्तते? परन्तु न, अस्य कथनस्यापि पुष्टिवर्धनाय कानिचित् प्रमाणानि विद्यन्ते। ऋग्वेदे एव सा सरस्वती विद्याधिष्ठात्रीदेवीरूपेणापि स्तूयते–

"अम्बितमे नदीतमे देवीतमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि ॥" [ऋग्वेदः २.४१.१६]

पुनः- "इळा सरस्वती मही तिस्रो देवीर्मयोभुवः ..." [ऋग्वेदः १.१३.९]

एतद्विहाय केषुचित् पुराणेष्वपि सा विद्याधिष्ठात्रीदेवीरूपेण स्तूयते । न केवलम् अत्रैव, यास्काचार्येणापि सरस्वत्याः निर्वचनसमये उल्लिखितं यत्- "तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति ।" [निरुक्तम् २.२३.३]

अतो भाष्यकारभेदेन सरस्वत्या वर्णनवैचित्र्यप्रदर्शनाय ऋग्वेदस्य सप्तममण्डलान्तर्गतस्य पञ्चनवतितमसूक्तस्य प्रारम्भिकमन्त्रस्य सायणदयानन्दभाष्ययोः तुलनात्मकमध्ययनं क्रियते अत्र ।

**सम्पूर्णमन्त्रः**

"प्र क्षोदसा धायसा सस्त्र एषा सरस्वती धरूणमायासो पः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥"

[ऋग्वेदः ७.९५.१]

| मन्त्रपदानि | सायणाचार्यकृतार्थः | दयानन्दकृतार्थः |
|---|---|---|
| प्र | | |
| क्षोदसा | उदकेन | अज्ञाननाशकेन |
| धायसा | धारकेण | वेगेन |
| सस्त्रे | प्रधावति शीघ्रं गच्छति | सततप्रवाहेण संसारं सिञ्चतीव |
| एषा सरस्वती | नदीवन्निगमा एषा दृश्यमाना नदीरूपा सरस्वती | इयं ब्रह्मविद्यात्मिका सरस्वती विद्या |
| धरूणम् | लिङ्गव्यत्ययः धरूणा धारयित्री | अखिलज्ञानाधारोऽस्ति |
| आयासो | अयसा निर्मिता | लोहमिव दृढा चास्ति |
| पूः | पुरीव | अभ्युदये च नगरीव |
| प्रबाबधाना | भृशं बाधमाना | अत्यन्त वेगेन |
| रथ्येव | प्रतोलीव विस्तीर्णा सती | नदीव |
| याति | गच्छति | गच्छति |
| विश्वाः अपः | सर्वा आपगाः | सर्वजलानां नेत्री |
| महिना | महिम्ना | स्वमहिम्ना |
| सिन्धुः | स्यन्दनशीला नदीरूपा | स्यन्दमाना |
| अन्याः | अन्याः | इतरास्ति |

मन्त्रोऽयं दशमण्डलसमन्वितस्य ऋग्वेदस्य सप्तममण्डले पञ्चनवतितमे सूक्ते समुपलभ्यते । मन्त्रेऽस्मिन् वसिष्ठर्षिणा त्रिष्टुप्-छन्दसा सरस्वती स्तुता । अस्य पञ्चनवतितमसूक्तस्य प्राथमिकमन्त्रस्य सायण-दयानन्दभाष्ययोः तुलनात्मकमध्ययनं क्रियते ।

मन्त्रांशस्थितस्य 'प्र' इति उपसर्गः सायणाचार्यदृष्ट्या 'सस्रे' इति पदस्यान्वयिभूतः। अपरपक्षे दयानन्देन 'क्षोदसा' इति पदेन अयमुपसर्गो युज्यते। उपसर्गा नामपदेन आख्यातपदेन वा संयुज्य नामाख्यातयोः अर्थपरिवर्तनं कुर्वन्ति। प्रसङ्गेऽस्मिन् शाकटायनाचार्येणापि उच्यते–

"न निर्बद्धा उपसर्गा अर्थान्निराहुः।" [निरुक्तम् १.३]

पुनः यास्काचार्येणापि उच्यते–

"नामाख्यातयोस्तु, कर्मोपसंयोगद्योतका भवन्ति।" [निरुक्तम् १.३]

अतः सायणदयानन्दाभ्यां 'प्र' इत्युपसर्गो नामपदाभ्यां संयुक्तः सन् भिन्नार्थं प्रकाशते। सायणाचार्यदृष्ट्या 'प्रसस्रे' नाम प्रधावति। अर्थात् अत्र 'प्र' इत्युपसर्गः प्रकृष्टार्थे प्रयुज्यते। अपि च दयानन्ददृष्ट्या 'प्रक्षोदसा' नाम अज्ञाननाशकेन। अत्र प्र उपसर्गयुक्तं पदद्वयं सायणभाष्ये नद्या विशेषणरूपेण, अपि च दयानन्दभाष्ये विद्याया विशेषणरूपेण परिदृश्यते।

अनन्तरं 'क्षोदसा' इति पदस्यालोचनायां सायणाचार्येण 'उदकेन' इति पदं प्रयुक्तम्, यस्यार्थो भवति जलेन। अर्थात् 'क्षोदस्' इति वैदिकशब्दस्य अर्थः उदकम् इति। अपरपक्षे अस्य 'क्षोदसा' इति पदस्य आलोचनावसरे दयानन्देन 'अज्ञाननाशकेन' इति पदं प्रयुक्तम्। येन ज्ञानरूपार्थः प्रकटितो भवति। अर्थात् एकमेव पदं भाष्यभेदेन अर्थान्तरम् बोधयति। सायणाचार्येण 'क्षोदसा' इति पदस्य व्याख्यायां 'जलम्' इति अर्थः प्रदीयते। परन्तु दयानन्ददृष्ट्या तदेव पदं अज्ञाननाशकार्थम्। अर्थात् समपदे सायण-दयानन्दयोर्मध्ये अर्थनिष्काशने स्वातन्त्र्यं परिलक्ष्यते।

अथ मन्त्रांशभूते 'धायसा' इति पदेऽपि सायण-दयानन्दयोर्मध्ये काचिद् विचित्रता परिलक्ष्यते। यथा सायणाचार्येण 'धायसा' इति पदस्यार्थबोधेन 'धारकेन' इति पदम् उपस्थाप्यते। अपरपक्षे दयानन्देन 'वेगेन' इति पदं प्रयुक्तम्। सायणाचार्येणात्र 'धायसा' अर्थात् धारकेन इति पदं 'क्षोदसा'अर्थात् उदकेन इत्यस्य पदस्य विशेषणरूपेण स्वीक्रियते। दयानन्दो'धायसा' अर्थात् वेगेन इति पदं 'क्षोदसा' अर्थात् अज्ञाननाशकेन इत्यस्य पदस्य विशेषणरूपेण उल्लिख्य वेगयुक्ताम् अज्ञाननाशिकां विद्यामेव सूचयति। अर्थात् परिलक्ष्यतेऽत्र सायणदृष्ट्या दयानन्ददृद्या च अन्वये किञ्चिद् वैषम्यं न विद्यते परन्तु अर्थदृष्ट्या सरस्वती तु नदी, अपि च दयानन्ददृष्ट्या सा एव सरस्वती विद्यारूपा।

तदनु मन्त्रस्थितस्य 'सस्रे' इत्यस्य पदस्य विश्लेषणसमये सायणाचार्यः 'प्रधावति शीघ्रं गच्छति' इत्यर्थं चकार। येन नद्याः स्वभाव एव बोध्यते। पुनः दयानन्देन अर्थः क्रियते 'सततप्रवाहेण संसारं सिञ्चतीव' इति। अर्थात्

अनेन वेगयुक्ता अज्ञाननाशिका सततप्रवाहयुक्ता विद्या एव बुध्यते, या संसारं ज्ञानेन सिञ्चति । अतः अत्र 'सस्त्रे' इति क्रियापदं सायणदृष्ट्या प्रकृष्टगमनार्थे प्रकृष्टधावनार्थे च प्रयुक्तो भवति । अपि च दयानन्ददृष्ट्या सेचनार्थे प्रयुक्तो भवति । अतः समानेषु मन्त्रेषु व्यवहृते समाने क्रियापदे सायण-दयानन्दयोः प्रयोगदृष्ट्या अर्थवैचित्र्यं परिलक्ष्यते ।

पुनः मन्त्रस्यास्य 'एषा सरस्वती' इति विशेष्यपदं सायणाचार्येण 'नदीवन्निगमा एषा दृश्यमाना नदीरूपा सरस्वती' इति पदानि उल्लिखितानि । येन स्पष्टरूपेण सरस्वती एका दृश्यमाना नदी इतिरूपेण प्रस्फुटिता अस्ति । परन्तु दयानन्दस्य 'इयं ब्रह्मविद्यात्मिका सरस्वती विद्या' इत्यभिधानेन ब्रह्मविद्यास्वरूपिणी वाग्रूपा-सरस्वती इत्यनेनोपायेन वर्णिता । अनेन सायण-दयानन्दयोर्मतवैचित्र्येण सरस्वत्या द्विविधरूपं प्रकाशितमस्ति, नदीरूपा विद्यारूपा च ।

अनन्तरं 'धरूणं' इति पदं स्पष्टतया धारणकर्तारमेव बोधयति । सायणाचार्यः अपि 'धरूणा धारयित्री' इत्यर्थं चकार । दयानन्देनापि तस्य भाष्ये पदस्यास्य अर्थबोधने 'आधार' इति पदग्रहणेन मूलार्थो न परित्यक्तः, परन्तु 'अखिलज्ञानाधारोस्ति' इति सम्पूर्णपदप्रयोगेन अखिललोकेषु ज्ञानानाम् आधारभूतां विद्यामेव सूचयति । अतः दयानन्दस्य ज्ञानम् इति अतिरिक्तपदप्रयोगेण अर्थवैचित्र्यं परिदृश्यते ।

तदनन्तरं मन्त्रांशस्थितस्य 'आयासी' इत्यस्य पदस्य तुलनात्मकाध्ययनात् परं दृश्यते यत् पदस्यास्य अर्थविषये सायण-दयानन्दयोर्मध्ये अर्थनैकट्यं परिलक्ष्यते । सायणदयानन्दाभ्याम् अत्र 'आयासी' इत्यस्य पदस्य लौहार्थः एव स्वीक्रियते ।

पुनः मन्त्रांशभूतस्य 'पूः' इत्यस्य व्याख्यानविषये सायण-दयानन्दयोः अर्थसाम्यं परिदृश्यते । केवलमेव ताभ्यां यथाक्रमे पुरीव नगरीव च भिन्नपदं प्रयुक्तम् । अत्र सायणाचार्येण 'अयोनिर्मिता पूरिव धारयित्री सरस्वती' अनेन विशेषणसंयुक्तं कृतम् । परन्तु दयानन्देन सरस्वती 'लौहमिव नगरीव सरस्वती' इति भिन्नविशेषणैर्भूषिता ।

तदनु 'प्रबाबधाना' इति पदे सायणाचार्यो 'भृशं बाधमाना' इति अर्थं चकार । अर्थात् सा नदीरूपा सरस्वती अपरासां सर्वासां नदीनां बाधस्वरूपा अर्थात् सा बाधां प्रयच्छन्ती सम्मुखे गच्छति । परन्तु अस्यैव पदस्यार्थबोधने दयानन्देन 'अन्यन्तं वेगेन' इति पदं प्रयुक्तम् । अर्थात् सा विद्यारूपा सरस्वती

रथ्या इव अत्यन्तवेगेन सम्मुखवर्तिनी भवति । अनेन सायण-दयानन्दयोः अर्थवैचित्र्यं परिलक्ष्यते ।

पुनः 'रथ्येव' इत्यस्य पदस्यार्थबोधने सायणचार्येण उच्यते 'प्रतोलीव विस्तीर्णा सती' इति, अर्थात् सा नदीरूपा सरस्वती प्रबाबधाना सती सारथीव भवति । स्पष्टीकरणार्थं तेन पुनरुच्यते 'रथिनेव' यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चुर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं पिषंती गच्छतीत्यर्थः । अर्थात् तया नदीरूपिण्या सरस्वत्या सह रथः तुल्यते, यतः सा सर्वं विनश्य सम्मुखं गच्छति । अपरपक्षे दयानन्देन 'नदीव' इति पदं व्यवहृतम् । दयानन्देन सरस्वती नदी इव उच्यते, न तु नदीरूपा । अर्थात् तस्य मतानुसारेण सा विद्यारूपा सरस्वती प्रबाबधाना अर्थात् अत्यन्तवेगयुक्ता नदीव गच्छति ।

अथ 'याति' इति तिङन्तपदस्यालोचनायां सायण-दयानन्दयोः कुत्रापि मतवैभिन्न्यं न परिलक्ष्यते । भाष्यकारद्वयेन यातीति गच्छति इति मतं स्वीकृतम् ।

तस्मात् 'विश्वा अपः' इति पदस्य व्याख्यानप्रसङ्गे सायणाचार्यः 'सर्वा आपगाः' इति पदप्रयोगेण सर्वाः नदीः एव बोधयति । अन्वयात् अनन्तरं प्रबाबधाना अन्याः विश्वा अपः इत्यस्य वाक्यस्यार्थो जायते यत्- सा अयोनिर्मिता गतियुक्ता नदीरूपा सरस्वती अपरासां सर्वासां नदीनां बाधस्वरूपा सती 'रथ्या' अर्थात् सारथीव अग्रं गच्छति । अपरपक्षे दयानन्देन अस्यैव पदस्य व्याख्याप्रसङ्गे 'सर्वजलानां नेत्री' इति पदं प्रयुक्तम् । तेनोच्यते सा नदीवत् गतिशीला विद्यारूपा सरस्वती अखिलज्ञानरूपजलानां नेतृरूपेण अग्रे स्थिता सती सर्वाणि जलानि अर्थात् ज्ञानानि आनयति । अतः अत्र पदार्थबोधने सायण-दयानन्दयोः अर्थनैकट्यं प्रदर्श्यते । परन्तु अन्वयानुसारेण व्याख्यानसमये अर्थवैचित्र्यं प्रकटितं भवति ।

अथ 'महिना''सिन्धुः''अन्याः' चेति अन्तिमपदानां पदार्थबोधने सायण-दयानन्दयोर्मध्ये अर्थसाम्यता परिलक्ष्यते । परन्तु ताभ्यां भिन्नपदं प्रयुक्तम् । अपि च अन्वयानुसारेण वाक्यार्थबोधने किञ्चिद्वैचित्र्यं परिलक्ष्यते ।

**उपसंहारः**

ऋग्वेदीयमन्त्रस्यास्य सायण-दयानन्दभाष्ययोः पदभेदेन तुलनात्मकाध्ययनात् सुस्पष्टो भवति यत् सायणाचार्यदृष्ट्या सा सरस्वती नदीरूपेण परिगण्यते । अपि तु दयानन्ददृष्ट्या सा विद्याधिष्ठातृदेवीरूपेण

स्वीक्रियते । तर्हि सरस्वत्याः प्रकृतस्वरूपं किं नदी विद्या वा? अध्ययनात् एतद् वक्तुं शक्यते यत्- मन्त्रेषु यानि पदानि प्रयुक्तानि, तानि अधिकतया नदीमेव सूचयति, न तु विद्याम् । अतः सायणदृष्ट्या नदीरूपा सरस्वती एव ग्रहणीया । परन्तु दयानन्दस्य मतमपि न प्रत्याख्यानयोग्यं, यतः लौकिके सा सरस्वती विद्यारूपेण एव स्तूयते । अतः अनेन एतदेव वक्तुं शक्यते यत् भाष्यकाराणां दृष्टिभेदेन समयभेदेन च वेदमन्त्राणाम् अर्थवैचित्र्यम् आयाति । यत् भाषातात्त्विकदृष्ट्या अपि सिद्ध्यति ।

✶✶✶

## Bibliography


1. *ऋग्वेद-भाष्यम्* (सम्पूर्णम्) ; दयानन्दः सरस्वती ; वैदिक पुस्तकालय ; अजमेर ; राजस्थान ; २००८
2. *ऋग्वेद-संहिता* सायणासाचार्यकृतभाष्यसंवलिता (सम्पूर्णम्) ; पण्डित रामगोविन्द त्रिवेदी (अनुवादक) ; चौखम्बा विद्याभवन प्रकाशन ; वाराणसी ; २०११
3. *निरुक्तम्* (सम्पूर्णम्) ; अमरेश्वर ठाकुर (सम्पा.) ; कलिकाता विश्वविद्यालय ; २०१६
4. *River Sarasvati*; Anand Damle ; Shri Baba Saheb Apte ; Bangalore ; 2012


✳ ✳ ✳

# Advaita Philosophy of Śaṅkarācārya in light of Buddhism

**Brahmachari Bhudharachaitanya (Sabuj)***

### Abstract

[This paper examines the philosophical dialogue between Śaṅkarācārya's Advaita Vedanta and Buddhist thought, particularly *Madhyamaka* philosophy. While Buddhism negates the self through *Śūnyatā* (emptiness), *Advaita* asserts the ultimate reality as *Brahman*— an indivisible, non-dual consciousness. The study explores key Buddhist arguments like Nāgārjuna's *Catuṣkoṭi* and Candrakīrti's Sevenfold Reasoning and presents Śaṅkara's refutations using *Vivartakāraṇa* (illusory transformation). The discussion highlights the intricate similarities between Advaita's Pure Awareness and Buddhism's Buddha-Nature, revealing how both traditions describe an ineffable absolute reality from different perspectives.]

Since the inception of human civilization, the quest to alleviate suffering has been a central theme in the human experience. Early humans sought to mitigate pain and discomfort by creating shelters and discovering fire for cooking, demonstrating a persistent drive to overcome adversity. However, as humanity advanced, the complexity and nature of suffering seemed to evolve concurrently, often expanding in response to increasingly intricate and superficial remedies. In the context of Indian philosophy, numerous sages and scholars have delved into the profound inquiry of suffering and its cessation. The Indologist Heinrich Zimmer in his book, 'Philosophies of India' posits that there exists a shared optimistic perspective across various Indian

* Saradananda Bhavan (The Headquarters), Ramakrishna Math & Ramakrishna Mission, Belur Math

philosophical traditions. He states - "Philosophic theory, religious belief, and intuitive experience support each other in India in the basic insight that, fundamentally, all is well. A supreme optimism prevails everywhere."[1]

